BHARAVI'S KIRATARJUNIYAM

CANTOS XII & XIII.

With the commentary of Mallinath.

Edited by

SARADARANJAN RAY, M. A. **Vidyavinoda,**

Late Principal, Vidyasagar Collage.

AND

KUMUDRANJAN RAY, M. A.

Author of Meghadutam, Laghu-Kaumudi &c.,

With analysis, Prose, Translations. Anglo-Sanskrit critical notes &c.

Published by

K. Ray.

17, Bhawani Datta Lane, Calcutta.

Rs. 1/8/-.

Printed by—H. K. Ghosh,
AT THE **Rudra Printing Works,**
66, Manicktola Street,
CALCUTTA.

INTRODUCTION.

It is needless to say anything about the poet Bharavi (of 5th century A. D. See our Introduction in Canto I.) after what has already been said of him in Canto I and in Canto XI.

In canto XI we see that Indra advises Arjuna to worship Siva.

Accordingly in Canto XII we see Arjuna's unprecedented penance for winning Siva's favour. All creatures there approach Siva to know who is the man that is carrying on such unbearable penance. Siva spoke that he is नरनारायण ; and the Lord now approached towards Arjuna in the garb of a *kirat*, for a demon was going to attack him in the form of a boar. As the boar advanced towards Arjuna Siva followed him.

In Canto XIII we see that as the demon boar faced Arjuna is an inimical attitude he was compelled to strike it with an arrow that pierced its body ; simultaneously Siva in the guise of a kirat also hit the boar with an arrow from behind, to save his devotee (Arjuna). This arrow went deep into the earth after piercing the boar. The boar died and Arjuna went to it to take up his arrow therefrom. A kirat put in appearance before Arjuna immediately when he went there to take up his arrow. As already said only one arrow

was on the body of the boar. Thus both claimed this as his own. The kirata put Arjuna to shame by saying that as a sage he should not take away other's arrow, nor should he vainly try to prove that the boar is killed by him ; for it was killed by किरातपति। So rather he should form friendship with the said lord of kiratas. For then having gained such a strong ally he will be able to fulfil all his desires.

[N. B.—This Kirat, was Siva's messenger come in that guise Siva being pleased with Arjuna's penance, devised this plan to test his powers and valour].

N. B.—For Metre and अलङ्कार here, the students are referred to see Mallinatha always.

किरातार्जुनीयम्

द्वादशः सर्गः ।

[N. B.—द्वाधिका दश इति द्वादश, शाकपार्थिवादिवत् उत्तरपदलोपिसमासः । द्वि becomes द्वा by the rule "द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः" । Then द्वादशानां पूरणः gives द्वादशन् + डट् = द्वादशः twelfth. It qualifies सर्गः ॥ सृज्यते इति सृज + घञ् कर्मणि = सर्गः canto. उक्तार्थे or प्रातिपदिकार्थे १मा ।]

1. *Arjuna begins to worship Siva.*

अथ वासवस्य वचनेन रुचिरवदनस्त्रिलोचनम् ।
क्लान्तिरहितमभिराधयितुं विधिवत् तपांसि विदधे धनञ्जयः ॥१॥

Prakasika.—अथ धनञ्जयः विधिवत् तपांसि विदधे [Arjuna duly carried on penance]. He did so before as well—त्रिलोचनम् अभिराधयितुं तपांसि विदधे [He now practised penance to please Siva]. Why did he now try to pacify Siva ?—वासवस्य वचनेन [He did so at the direction of Indra]. Was he not tired in penance ? रुचिरवदनः धनञ्जयः क्लान्तिरहितं तपांसि विदधे [No, he even now practised penance with a smiling attitude and untiringly].

Prose.—अथ रुचिरवदनः धनञ्जयः वासवस्य (इन्द्रस्य) वचनेन त्रिलोचनं क्लान्तिरहितं (यथा तथा) अभिराधयितुं (प्रीणयितुं) विधिवत् (यथाशास्त्रम्) तपांसि विदधे ।

Eng.—Now Arjuna having mild countenance, duly and untiringly carried on penance at the words of Indra, to pacify Siva, the three-eyed.

Beng.—অনন্তর প্রিয়দর্শন অর্জ্জুন, ইন্দ্রের কথায় শিবকে প্রসন্ন করিবার জন্য যথাবিধি ও ক্লান্তিহীনভাবে তপস্যা করিতে লাগিলেন।

Malli—अथेति। 'अथ' इन्द्रतिरोधानानन्तर' 'रुचिरवदनः' इन्द्रसाक्षात्कार-सन्तोषात् प्रसन्नमुखः, धनञ्जयः 'अर्जुनः' 'वासवस्य वचनेन' उपदेशेन 'त्रिलोचनं' शिवं 'क्लान्तिरहितं' यथा तथा 'अभिराधयितुं' प्रसादयितुं 'तपांसि विधिवत्' विध्यर्हं यथाशास्त्रम् इत्यर्थः ["तदर्हम्" इति वतिप्रत्ययः] 'विदधे' चक्रे। [अस्मिन् सर्गे उद्गता वृत्तम्—"सजसादिमे सलघुकौ च न सजगुरुकैरथोद्गता। त्र्यङ्घ्रिगतभन जलागयुताः सजसाजगौ चरणमेकतः पठेत्" ॥ इति लक्षणात्] ॥१॥

Charcha.

1. वासवस्य—वासव is a name of Indra. तस्य। शेषे ६ष्ठी, related to वचनेन।

2. वचनेन—वच + ल्युट् भावे = वचनम् word. तेन। इत्थं ३या।

3. रुचिरवदनः—रुचिरं वदनं यस्य, बहु। Qual. धनञ्जयः। He was प्रसन्नमुख, for he was sure of success and already won over Indra. See Malli "इन्द्रसाक्षात्कारसन्तोषात् प्रसन्नमुखः"।

4. क्लान्तिरहितम्—क्लम् + क्तिन् भावे = क्लान्ति fatigue. तया रहितम्, ३तत्। Adverb qual. विदधे। He practised penance untiringly (क्लान्ति-रहितम्)। Malli connects it with अभिराधयितुम्; but क्लान्तिराहित्य in आराधन sounds queer. Further our construction shows his unceasing तपस्या।

5. अभिराधयितुम्—अभि + राध + णिच् + तुमुन्। To pacify.

6. विधिवत्—विधि is sastric विधि (injunction); विधिमर्हति इति विधि + वति (अर्हार्थे) = विधिवत् duly. Adverb qual. विदधे। See Malli. also. The तपस्याविधान was विधिवत् and क्लान्तिरहित (unceasing).

7. विदधे—वि + धा + लिट् ए। Performed. Nom. धनञ्जयः॥ धनं

जयतीति gives धन + जि + खच् कर्त्तरि – धनञ्जयः a name of Arjuna. Arjuna is yet to achieve शिवप्रसाद, so the epithet धनञ्जय here is significant. For details in deriv. &c. of धनञ्जय see Canto I sl. 35 & XI sl. 45.

8. *Voice*—रुचिरवदनेन धनञ्जयेन तपांसि विदधिरे।

2. *Arjuna's Penance.*

अभिरश्मिमालि विमलस्य धृतजयधृतेरनाशुषः।
तस्य भुवि वहुतिथास्तिथयः प्रतिजग्मु रेकचरणं निषीदतः॥२॥

Prak.—तस्य बहुतिथाः तिथयः प्रतिजग्मुः [Many days elapsed with regard to Arjuna]. This is but natural with all—भुवि एकचरणं निषीदतः तस्य [Many days passed even though he carried on penance by standing on one leg only]. To pass so many days in this way is creditable indeed—अभिरश्मिमालि एकचरणं निषीदतः तस्य [Not only he practised penance by standing on one leg, but he also faced the Sun in this posture]. Anything more of him ?—विमलस्य धृतजयधृतेः अनाशुषः तस्य [He assumed this posture by fasting all along. And he was thus internally pure and sanguinely entertained the idea of full success.].

Prose.—अभिरश्मिमालि (अभिसूर्य्यं) भुवि एकचरणं निषीदतः (एकचरणेन तिष्ठतः) विमलस्य धृतजयधृतेः अनाशुषः (अनश्नतः) तस्य वहुतिथाः तिथयः (दिवसाः) प्रतिजग्मुः (व्यतीताः)।

Eng.—Of him thus remaining on one leg by facing the sun, (so) becoming internally pure and entertaining the idea of success and fasting as well, many days rolled on.

Beng.—সূর্য্যাভিমুখে একপায়ে দাঁড়াইয়া থাকিয়া (তপস্যাচরণ

হেতু) শুদ্ধ ও জয়েচ্ছায় প্রণোদিত, এবং অনাহারে স্থিত সেই অর্জ্জুনের বহুসংখ্যক দিন কাটিয়া গেল।

Malli.—অভিরশ্মীতি। 'অভিরশ্মিমালি' অভিসূর্য্যং সূর্য্যাভিমুখং 'ভুবি 'একচরণং নিষীদতঃ' একচরণেন তিষ্ঠতঃ 'বিমলস্য' বাহ্যান্তরশুদ্ধিমতঃ 'ধৃতজয়ধৃতেঃ ধৃতা জয়ধৃতিঃ জয়েচ্ছা যেন তস্য 'অনাশুষঃ' অনশ্নতঃ ["উপেয়িবাননাশ্বাননূচানশ্চ" ইতি নিপাতঃ] 'তস্য' অর্জ্জুনস্য বহূনাং পূরণাঃ 'বহুতিথাঃ' বহুসংখ্যকাঃ ইত্যর্থঃ ["তস্য পূরণে ডট্"। "বহুপূগগণসঙ্ঘস্য তিথুক্" ইতি তিথুগাগমঃ] 'তিথয়ঃ' দিনানি 'প্রতিজগ্মুঃ'। [অত্র তিথিশব্দঃ পুংলিঙ্গঃ। "তদাদ্যাস্তিথয়ো দ্বয়োঃ" ইতি অভিধানাৎ। অন্যথা 'বহুতিথাঃ' ইতি অত্র টিত্বাৎ ঙীপ্ স্যাৎ] ॥২॥

[N. B.—Malli is where necessary explained in charcha, so its notes are not separately given].

Charcha.

1. অভিরশ্মিমালি—রশ্মি ray. রশ্মেঃ মালা line of rays. ষষ্ঠীতৎ। সা অস্তি অস্য ইতি রশ্মিমালা+ইনি=রশ্মিমালিন্ a name of সূর্য্য। Or better —রশ্মিনা মলতে (সংবধ্নাতি সর্বান্) ইতি রশ্মি+মল+ণিনি কর্ত্তরি=রশ্মিমালিন্ Sun. রশ্মিমালিনম্ অভি (লক্ষ্যীকৃত্য) ইতি অভিরশ্মিমালি, towards sun, অব্যয়ীভাবঃ by the rule "লক্ষণেনাভিপ্রতী আভিমুখ্যে"। Adv. Qual. নিষীদতঃ।

2. ধৃতজয়ধৃতেঃ—জয়স্য ধৃতিঃ (ধৈর্য্যম্ ইচ্ছা ইত্যর্থঃ) জয়ধৃতিঃ desire for victory (success), ৬তৎ। ধৃতা (গৃহীতা) জয়ধৃতিঃ যেন, বহু। তস্য। Qual. তস্য। He stood on one leg staring the sun during his penance. [This is a sort of severe penance. Cf.—অনন্যদৃষ্টিঃ সবিতারমৈক্ষত—Kumara V.]. By such penance he was বিমল, and felt sign of victory, so he was ধৃতজয়ধৃতি as well.

3. অনাশুষঃ—নঞ্ + অশ (ভক্ষণে) ক্র্যাদি + ক্বসু (লিটস্থানে)=

अनाश्वस् not eating. तस्य। Qual. तस्य। This is irregularly formed by the rule "उपेयिवाननाश्वान्—" (See Malli.) Thus Bhattoji says "नञपूर्वादश्नातेः क्वसुरिडभावश्च। धृतव्रतश्च तेऽनाश्वषः इति भारविः"।

4. बहुतिथाः—बहु + (डट् स्थाने) तिथुक् (पूरणार्थे) – बहुतिथाः many. Qual. तिथयः। For rules here see Malli. Here masculine तिथि is used, so we have बहुतिथाः in the masc. Its fem. form is बहुतिथी with ङीप्, for डट् is a टित् प्रत्यय and तिथुक् its substitute is also here टित्।

5. प्रतिजग्मुः—प्रति + गम + लिट उस्। Passed on. Nom. तिथयः।

7. *Voice*,—बहुतिथैः तिथिभिः प्रतिजग्मिरे...।

3. Arjuna's calmness.

वपुरिन्द्रियोपतपनेषु सततमसुखेषु पाण्डवः।
व्याप नगपतिरिव स्थिरतां महतां हि धैर्यमविभाव्यवैभवम् ॥३॥

Prak.—पाण्डवः नगपतिरिव स्थिरतां व्याप [Arjuna assumed firmness like that of Himalaya]. Did not severity of penance torment him ?—सततं वपुरिन्द्रियोपतपनेषु असुखेषु अपि स्थिरतां व्याप [He assumed firmness in spite of emaciating troubles of penance]. I can't understand this—हि महतां धैर्यम् अविभाव्यवैभवम् [The penance of the great is unfathomable. So in spite of all difficulties Arjuna attained firmness].

Prose.—पाण्डवः (अर्जुनः) सततं वपुरिन्द्रियोपतपनेषु (शरीरादितापकरेषु) असुखेषु अपि नगपतिः इव स्थिरतां व्याप (प्राप)। हि (यतः) महतां धैर्यम् अविभाव्यवैभवम् (भवति)।

Eng.—Inspite of constant troubles that tormented his

body and senses, Arjuna attained firmness like that of lord of mountains (i. e. Himalaya); for the happiness of the great has inscrutable majesty.

Beng.—শরীর ও ইন্দ্রিয়ের পীড়াকর উপবাসাদি দুঃখ সত্ত্বেও অর্জুন গিরিরাজ হিমালয়ের ন্যায় দৃঢ়তা ধারণ করিলেন ; কারণ মহৎদের ধৈর্য্যের শক্তি দুর্বোধ হইয়া থাকে।

Malli.—'पाण्डवः' अर्जुनः 'सतत' वपुरिन्द्रियोपतपनेषु' वपुषः इन्द्रियाणां च उपतपनेषु सन्तापकरेषु [करणे ल्युट्] 'असुखेषु' अनशनादिदुःखेषु अपि नगपतिः' गिरीन्द्रः इव 'स्थिरतां' दार्ढ्यं 'व्याप' प्राप। 'हि' तथाहि 'महतां धैर्य्यम् अविभाव्य-वैभवम्' अविभाव्यं दुर्बोधं वैभवं सामर्थ्यं यस्य तत् तथोक्तम्। धीराणाम् अकिञ्चित्-करं दुःखम् इति भावः ॥३॥

Charcha.

1. वपुरिन्द्रियोप &c—उपतप्यते अनेन इति उप+तप+ल्युट् करणे=उप-तपनम् tormentor ; though तपि is in the नन्द्यादि list still उपतपि will not take ल्यु, for the Varttika "समासप्रत्ययविधौ तदन्तविधेः प्रतिषेधो वक्तव्यः" prohibits it after सोपसर्ग तपि। वपुष् body. इन्द्रिय senses. वपुश्च इन्द्रियाणि च इति वपुरिन्द्रियम्, प्राण्यङ्गत्वात् द्वन्द्वैकवद्भावः—by the rule "द्वन्द्वश्च प्राणितूर्य्यसेनाङ्गानाम्"। वपुरिन्द्रियस्य तपनानि, ६तत्। तेषु। Qual असुखेषु। असुख here refers to troubles of penance, e. g. उपवास, एकपदवर्त्तन &c. असुखेषु has भावे ७मी ॥

2. पाण्डवः—पाण्डोः अपत्यं पुमान् इति पाण्डु+अण्=पाण्डवः son of Pandu ; here refers to अर्जुन।

3. व्याप—वि+आप+लिट अ। Attained, assumed ; nom. पाण्डवः ॥ नगपतिः (नगानां पतिः, ६तत्) the उपमान of पाण्डवः, refers to हिमालय here.

4. हि—Here indicates हेतु। Cf. "हि हेताववधारणे"।

5. अविभाव्य &c—वैभव is lit. 'wealth, secondarily it means 'सामर्थ्य' (or माहात्म्य)। वि+भू+णिच्+यत्=विभाव्य to be known. न विभाव्यम् inscrutable, नञतत्। अविभाव्यं वैभवं यस्य, बहु। Qual. धैर्य्यम्। See Malli. also. The power of धैर्य्य of the great is unfathomable. By this patience they win all by disregarding दुःख। See Malli. "धीराणाम् दुःखम् अकिञ्चित्करम्"।

6. *Voice.*—पाण्डवेन नगपतिना इव व्यापे........धैर्य्येण अविभाव्यवैभवेन भूयते......।

4. His mind unperturbed.

न पपात सन्निहितपक्तिसुरभिषु फलेषु मानसम्।
तस्य शुचिनि शिशिरे च पयस्यमृतायते हि सुतपः सुकर्मणाम्॥४॥

Prak.—Easy.

Prose—तस्य मानसम् (मनः) सन्निहितपक्तिसुरभिषु फलेषु न पपात, तथा शुचिनि शिशिरे पयसि (न पपात)। हि सुकर्मणाम् सुतपः अमृतायते (अमृतवत् आचरति)।

Eng.—His mind did not set in neighbouring fruits that were fragrant through maturity, nor did it fall on pure cold waters ; for good penance of the meritorious, acts like nectar (i. e. is itself nectar-like food),

Beng.—অর্জুনের মন নিকটস্থ পক্কতাজন্য সুরভি ফলেতে পতিত হয় নাই, এবং পবিত্র শীতল জলেও পড়ে নাই ; কারণ কর্মিগণের সুতপস্যাই অমৃতের ন্যায় সুখাদ্যস্বরূপ হয়।

Malli.—'तस्य' अर्जुनस्य 'मानसं' मनः 'सन्निहितपक्तिसुरभिषु' सन्निहितानि समीपस्थानि यानि पक्तिसुरभीणि पाकसुगन्धीनि तेषु 'फलेषु', तथा 'शुचिनि' स्वच्छे

'शिशिरे' शीतले 'पयसि च न पपात' न किञ्चित् आचकाङ्क्ष इति भावः। प्राणधारणं तु तस्य तपः एव इत्याह—'हि' तथाहि 'सुकर्मणां' सुकृतिनां शोभनं तपः 'सुतपः' एव 'अमृतायते' अमृतवत् आचरति। "किं तपस्तुमाणां तदर्थान्तरैः" इति भावः। ["लोहितादि डाज्भ्यः क्यष्"। "वा क्यषः" इति आत्मनेपदम्। लोहितादिराकृति -गणः (?) (See Char.)] ॥४॥

Charcha.

1. पपात—पत+लिट अ। Fell on. Nom. मानसम्॥ मनः एव इति मन +अण् (स्वार्थे प्रज्ञादि) = मानसम् mind.

2. सन्निहित etc—पच+क्तिन् भावे = पक्ति i. e. maturity (पक्वता); सुरभि fragrant. पक्त्या सुरभीणि fragrant through maturity (ripening). सुप्सुपा। सन्निहितानि च तानि पक्तिसुरभीणि, कर्मधा। तेषु। Qual. फलेषु (which has अधिः ७मी)। Similarly पयसि has अधिः ७मी।

3 अमृतायते—अविद्यमानम् मृतमनेन इति अमृतम् nectar, बहु। अमृतमिव आचरति इति अमृत+क्यङ् = अमृताय (नाम धातु) + लट ते = अमृतायते acts like nectar. Nom. सुतपः। Penance to the good is itself a nectar—like food ; thus they require no other food. Here the rule for क्यङ् is "कर्त्तुः क्यङ् सलोपश्च" i. e. —if an उपमानवाची word is at the same time also कर्त्तृवाची it will take क्यङ् to imply behaviour. Thus अमृतायते = behaves as nectar does. *Malli.* also says "अमृतायते अमृतवत् आचरति"। Here Malli's reference to the rule "लोहितादिडाज्भ्यः क्यष्" is uncalled for. For these words take क्यष् in the sense of भवति (भवत्यर्थे), whereas the meaning here is *not* अमृतं भवति but अमृतमिव आचरति। Also comp. "अमृतायमानं वचोनिशम्य" in Raghu II. Sl. 61, where also अमृतायमान is derived as अमृतमिव आचरतीति क्यङ्। Malli should say here "कर्त्तुः क्यङ्सलोपश्च" इति अत्र क्यङ्।

4. सुकर्मणाम्—सुशोभनं कर्म येषां ते सुकर्माणः the meritorious, बहु । तेषां । Adj. used substantively. शेषे षष्ठी, related to सुतपः ।

5. *Vioce*—मानसेन न पेते......सुतपसा अमृताय्यते... ।

5. *His mentality firm.*

न विसिस्मिये न विषसाद मुहुरलसतां न चाददे ।
सत्त्वमुरुधृति रजस्तमसी न हतः स्म तस्य हतशक्तिपेलवे ॥५॥

Prak.—Easy.

Prose.—(सः) न विसिस्मिये, न विषसाद, च मुहुः अलसतां न आददे । हतशक्तिपेलवे (क्षीणवीर्य्ये भङ्गुरे च) रजस्तमसी (तदाख्यौ गुणौ) उरुधृति सत्त्वं न हतः स्म (न जघ्नतुः) ।

Eng.—He did not wonder at (his तपस्या), nor did he feel dejection therein, nor did he assume laziness at all. His qualities of *Rajas* and *Tamas* that were powerless and were on the wane, did not destroy his unflinching *Sattaguna.*

Beng.—অর্জুন তপস্যা করিয়া বিস্মিত হইলেন না, বিষণ্ণ হইলেন না, এবং আলস্য ও গ্রহণ করিলেন না। তার নির্বীর্য্য ও লুপ্তপ্রায় রজোগুণ ও তমোগুণ, তদীয় শক্তিমান সত্ত্বগুণকে নষ্ট করিতে পারিল না।

Malli.—स अर्जुनः 'न विसिस्मिये'—"अहो महत् तपः तप्तम्" इति न विस्मयं जगाम ["तपः क्षरति विस्मयात्" इति स्मृतेः इति भावः]। 'न विषसाद' फलविलम्बात् गतोत्साहः न बभूव ["विषादश्चेतसो भङ्गः" इति लक्षणात् ॥ "सदि रप्रतेः" इति षत्वम्]। 'मुहुः अलसतां' तपसि मन्दोद्यमत्वं 'च न आददे' न अगमत् । किञ्च 'हतशक्तिनी' हतसारे अतएव 'पेलवे' भङ्गुरे ते 'हतशक्तिपेलवे रजस्तमसी' गुणौ 'उरुधृति' महासारं 'तस्य' अर्जुनस्य 'सत्त्वं' सत्त्वगुणं 'न हतः स्म' न हतवती [हन्तेः "लट् स्मे" इति भूतार्थे लट्] ॥

Charcha.

1. विसिस्मिये—वि + स्मि + लिट ए। He did not wonder at his तपस्या। Nom. सः understood. See Malli also.

2. विषसाद—वि + सद + लिट अ Fell dejected (for delay in फललाभ) । Nom. सः। See Malli for cerebral in विषसाद।

3. आददे—आ + दा + लिट ए। Did assume. Nom. सः। The आत्मनेपद is due to the rule "आङोदोनास्यविहरणे"।

4. उरुधृति—उरुः (महती) धृतिः यस्मिन्, having great fortitude (happiness), बहु। Qual. सत्त्वम् (which is object of हतः)।

5. हतः—हन + लट तस्। Nom रजस्तमसी। Here we have भूतार्थे लट owing to स्म here. The rule is "लट् स्मे"।

6. हतशक्तिपेलवे—हता शक्तिः ययोः, बहु। His रजस् and तमस् were on the wane due to तपस्या, so these were हतशक्ति, so also these were पेलव (i. e. भङ्गुर)। हतशक्तिनी च ते पेलवे च, इति हतशक्तिपेलवे, कर्मधा। Qual. रजस्तमसी। His penance was destroying his रजस् and तमस् and increasing his indestructible सत्त्वगुण।

7. *Voice*—तेन......विषेदे...अलसता......रजस्तमोभ्यां......पेलवाभ्याम्... हन्यते...।

6. *His body attractive and dreadful.*

तपसा कृशं वपुरुवाह स विजितजगत्त्रयोदयम् ।
त्रासजननमपि तत्त्वविदां किमिवास्ति यत् न सुकरं मनस्विभिः ॥६॥

Prak.—Easy.

Prose—सः तपसा कृशं (तथापि) विजितजगत्त्रयोदयं (विजित-त्रिभुवनोत्कर्षं) अपि तत्त्वविदां त्रासजननं वपुः उवाह। यत् मनस्विभिः न सुकरं (तत्) किमिव अस्ति (न किमपि इत्यर्थः)।

Eng.—He bore a body which though emaciated by penance excelled the excellence of all the three worlds, and which was a source of danger to the wise even. There is nothing which can not be easily done by the high-souled one.

Beng.—তপস্যাদ্বারা কৃশ হইলেও অর্জুনের শরীর ত্রিভুবনস্থ উৎকর্ষকে পরাভূত করিয়াছিল, এবং উহা তত্ত্বজ্ঞদের ত্রাস জনক হইয়াছিল। এমন কোন্ জিনিষ আছে যাহা মনস্বিগণের নিকট সুসাধ্য না হয় ?

Malli.—'सः' अर्जुनः 'तपसा कृशं' तथापि 'विजितजगत्त्रयोदयं' विजितः जगत्त्रयस्य भुवनत्रयस्य उदयः उत्कर्षः येन तत् तथोक्तम्। किञ्च 'तत्त्वविदाम् अपि' लोकहितार्थतत्त्वं जानताम् अपि 'त्रासजननं' भयङ्करं 'वपुः उवाह' वहति स्म। न च एतत् चित्रम् इत्याह—किमिति। 'यत् मनस्विभिः न सुकरं' तत् 'किमिव अस्ति' न किमपि इत्यर्थः। [इव—शब्दः वाक्यालङ्कारे। 'मनस्विनाम्' इति पाठे, शेषे षष्ठी स्यात् एव ; कृद्योगलक्षणायाः "न लोकाव्यय—" इत्यादिना निषेधात्]॥

Charcha.

1. तपसा—हेतौ तृतीया।

2. उवाह—वह+लिट् अ। Bore. Nom सः।

3. विजित etc.—उद्+इ+अच् भावे=उदयः excellence (उत्कर्ष)। जगतां त्रयम्। ६तत्। वि+जि+क्त कर्मणि=विजित conquered i. e, surpassed, जगत्त्रयस्य उदयः exellence of the three worlds, ६तत्। विजितः जगत्त्रयोदयः येन, बहु। Qual. वपुः। This is cause of त्रासजनन।

4. त्रासजननम्—जनयतीति जन+ल्युट् कर्त्तरि=जननम् producer. त्रासस्य (भयस्य) जननम्, ६तत्। Qual. वपुः। It struck awe to the तत्त्वविद् also, for they can't withstand its brilliance ; for from such resplendent body they inferred that his तपस्या will overpower them. Hence the body was त्रासजनक to them also.

5. सुकरम्—सुखेन क्रियते इति सु+कृ+खल् कर्म्मणि=सुकरम् to be easily done. Pred. to यत्। मनस्विभिः has अनुक्ते कर्त्तरि ३या। See Malli, also.

6. *Voice.*—तेन ऊहे......येन सुकरेण भूयते तेन केन न भूयते [the root अस् changes to भू when आर्धधातुक affixes follow by the rule "अस्तेर्भूः"]।

7. *His calm attitude described.*

ज्वलतोऽनलादनुनिशीथम् अधिकरुचिरम्भसां निधेः।
धैर्य्यगुणमवजयन् विजयी ददृशे समुन्नततरः स शैलतः ॥७॥

Prak.—Easy.

Prose.—अनुनिशीथम् (अर्द्धरात्रे) ज्वलतः अनलात् अधिकरुचिः, अम्भसां निधेः धैर्य्यगुणम् अवजयन् विजयी स (अर्जुनः) शैलतः (शैलात् अपि) समुन्नततरः ददृशे।

Eng.—Being more dazzling then the fire shining at midnight and having surpassed the calmness of oceans even, Arjuna seemed victorious (i. e., successful) and was seen higher than the mountain.

Beng.—গভীর রাত্রে দীপ্যমান অগ্নি হইতেও সমধিক উজ্জ্বল এবং সমুদ্রের গাম্ভীর্য্য বিজয়ী (অতএব) কৃতী অর্জ্জুন সেই পর্ব্বত হইতেও উন্নত বলিয়া দৃষ্ট হইল।

Malli.—'विजयी सः' अर्जुनः 'अनुनिशीथम्' अर्द्धरात्रे [विभक्त्यर्थे अव्ययीभावः। "अर्द्धरात्रनिशीथौ द्वौ" इत्यमरः] 'ज्वलतः' दीप्यमानात् 'अनलात्' अग्नेः 'अधिकरुचिः' दीप्यमानः तथा 'अम्भसां निधेः धैर्य्यगुणं' धैर्य्यं गाम्भीर्य्यं, तत् एव गुणः, तम् 'अवजयन्'। किञ्च 'शैलतः' शैलात् अपि 'समुन्नततरः ददृशे' दृष्टः। [अत्र रुच्यादिभिः अनलाद्याधिक्यासम्बन्धे सम्बन्धाभिधानात् अतिशयोक्तिः अलङ्कारः]॥

Charcha

1. अनलात्—"पञ्चमी विभक्ते" इति विभागे (उत्कर्षद्योत्ये) ५मी ॥ ज्वल + शतृ = ज्वलत् shining ; तस्मात् । Qual. अनलात् ।

2. अनुनिशीथम्—निशीथ midnight. निशीथे इति अनुनिशीथम्, विभक्त्यर्थे अव्ययीभावः। or—निशीथस्य समीपे इति अनुनिशीथम् at about midnight. सामीप्ये अव्ययीभावः। Adverb-qual. ज्वलतः। The fire shining in the deep darkness of midnight seems brighter than fire shining at other times. Now Arjuna owing to brilliancy of his internal तपोबल seemed brighter than even such fire.

3. अधिकरुचिः—रुचिः is दीप्ति। अधिकारुचिः अस्य, बहु। Qual. सः।

4. धैर्यगुणम्—धैर्यमेव गुणः, कर्मधा। तम्। obj. of अवजयन्। He during तपस्या surpassed ocean's गाम्भीर्य even.

5. अवजयन्—अव + जि + शतृ = अवजयत् surpassing. सः। Qual. सः। This अवजयन् is the reason why Arjuna seemed विजयी ; hence शतृ here comes in the sense of हेतु by the rule "लक्षणहेत्वोः क्रियायाः"।

6. विजयी—विजेष्यते इति वि + जि + इनि (उनादि) कर्त्तरि = विजयी one who will conquer all by his austeritics. As by penance he surpassed all, so evidently he is to be successful in his तपस्या। Arjuna was not finally विजयी as yet, for he has not as yet got Siva's grace, but he seemed to be विजयी, so भविष्यति इनिः seems correct here. And so also our construction in prose is better than Malli's rendering, which makes विजयी as an established epithet of Arjuna.

7. ददृशे—दृश + लिट ए कर्म्मणि। was seen. It agrees with its उक्तकर्म्म—सः।

8. शैलत:—शैलात् इति शैल + ङसि (५मी) + तसि स्वार्थे = शैलत: than a mountain. विभागे ५मी as in अनलात्। His तपस्या made him appear so.

9. *Voice.*—अधिकरुचिम् अवजयन्तं विजयिनं तं जना: समुन्नततरं ददृशु:।

8. *His face like sun's disc.*

जपत: सदा जपमुपांशु वदनमभितो विसारिभि:।
तस्य दशनकिरणै: शुशुभे परिवेषभीषणमिवार्कमण्डलम् ॥८॥

Prak—Easy.

Prose.—सदा उपांशु (रह:) जपं जपत: तस्य (अर्जुनस्य) वदनम्, अभित: विसारिभि: (इतस्तत: प्रसरणशीलै:) दशनकिरणै: (हेतुभि:) परिवेषभीषणम् अर्कमण्डलम् इव शुशुभे।

Eng.—Ever muttering *japa* (mantram) secretly, his face, with diffusing lustres of teeth therein, shone like sun's disc terrible owing to its halo of light.

Beng.—সর্ব্বদা শব্দ উচ্চারণ না করিয়া জপ করিতে করিতে তার বদন, ইতস্ততঃ প্রসরণশীল দন্তকিরণহেতু, পরিধিভীষণ সূর্য্যমণ্ডলের ন্যায় শোভিত হইয়াছিল।

Mallt.—'सदा उपांशु' रह:, गूढम् इत्यर्थ: ["रह-श्चोपांशु चालिङ्गे" इत्यमर:। "करणवदशब्दमनुप्रयोग उपांशु" इति कौमारे लक्षणम्]। जप्यते इति जप:, तं 'जपं' मन्त्रम् इत्यर्थ: ; 'जपत:' पठत: 'तस्य' अर्जुनस्य 'वदनं' कर्तृ 'अभित: विसारिभि:' प्रसरणशीलै: 'दशनकिरणै:' हेतुभि: 'परिवेषभीषणम् अर्कमण्डलम् इव शुशुभे' ["परिवेषस्तु परिधिरुपसूर्य्यकमण्डले" इत्यमर:]॥

Charcha.

1. जपत:—जप + शतृ = जपत् muttering, uttering. तस्य। Qual. तस्य।

2. उपांशु—An अव्यय meaning 'secretly'. That is without outwardly uttering *mantra* so as to be heard by others. Adv. Qual. जपतः ।

3. दशनकिरणैः—दशन teeth. तेषां किरणानि, इतत् । तैः ; इेतौ ३या । The lustre of bright teeth is well-known, Cp. "अथान्धकारं गिरि-गह्वराणां दंष्ट्रामयूखैः शकलानि कुर्वन्"—Raghu II. The दशनकिरण was अभितः विसारिन् ॥ वि+सृ+णिनि=विसारिन् going, diffusing. तैः । Qual. दशनकिरणैः ।

4. शुशुभे—शुभ+लिट ए । Nom. वदनम् ।

5. परिवेष etc.—परिवेष is circle of light seen round sun's disc. परिवेषेण भीषणम् terrible i e., powerful owing to halo of light, सुप्सुपा । Qual. अर्कमण्डलम् (which is उपमान of वदनम्) ।

6. *Voice.*—वदनेन &c.......easy.

9. *Arjuna with his bow described.*

कवचं स बिभ्रदुपवीतपदनिहितसज्यकार्मुकः ।
शैलपतिरिव महेन्द्रधनुः-परिवीतभीमगहनो विदिद्युते ॥९॥

Prak.—कवचं बिभ्रत् स (अर्जुनः) शैलपतिरिव विदिद्युते [Wearing the armour Arjuna looked like a gigantic mountain and so appeared like the king of mountains]. The point is not clear as yet—स उपवीतपदनिहितसज्यकार्मुकः सन् शैलपतिरिव विदिद्युते [Having placed the fit bow in place of his sacred thread, Arjuna appeared like a mountain]. I cant follow you—स उपवीतपद-निहितसज्यकार्मुकः सन् महेन्द्रधनुःपरिवीतभीमगहनः शैलपतिः इव विदिद्युते [the fit bow being placed on Arjuna's black armoured body, he

seemed like the dark—forest—surrounded Himalaya encircled by rain-bow].

Prose.—कवचं बिभ्रत् अर्जुनः उपवीतपदनिहितसज्यकार्मुकः (सन्), महेन्द्रधनुःपरिवीतभीमगहनः शैलपतिः इव विदिद्युते ।

Eng.—Wearing the armour Arjuna with his fit bow placed in the place of his sacred thread, shone like the Himalaya having its dark forests encircled by rain-bow.

Beng.—বর্ম্ম পরিধান করিয়া ও যজ্ঞোপবীতস্থানে সজ্যধনুঃ ধারণ করিয়া অর্জ্জুন, ইন্দ্রধনুব্যাপ্তবনগহনযুক্ত হিমালয়ের ন্যায় দেখাইতেছিলেন ।

Malli.—'कवच' वर्म 'बिभ्रत्, उपवीतपदनिहितसज्यकार्मुकः' उपवीतपदे यज्ञोपवीतस्थाने निहितम् आरोपितम् सज्यं कार्मुकं येन स तथोक्तः 'स' अर्जुनः 'महेन्द्रधनुःपरिवीतभीमगहनः' महेन्द्रधनुषा परिवीतं भीमं गहनं वनं यस्य स 'शैलपतिः इव'। हिमवान् इव 'विदिद्युते' शुशुभे ॥

Charcha.

1. उपवीत etc.—उपवीत is sacred thread. पद is स्थान (place). ज्या is 'the string' of bow. तया सह वर्त्तमानम् इति सज्यम् with string fit, बहु। कार्मुकम् = arrow. सज्यं कार्मुकम्, कर्म्मधा। उपवीतस्य पदम् ६तत्। तत्रनिहितम्, सुप्सुपा। तादृशं सज्यं कार्मुकं यस्य सः, बहु। Qual. सः।

2. महेन्द्रधनुः etc—महेन्द्रधनुः is rain-bow. परि + वि + इ + क्त कर्मणि = परिवीत surrounded. भीमं (भयङ्करं) गहनम् (वनम्), कर्मधा। महेन्द्रधनुषा परिवीतम्, ३तत्। तादृशं भीमगहनं यस्य, बहु। Qual. शैलपतिः। Arjuna was dark owing to the armour on (कवचं बिभ्रत्), Himalaya was so owing to its भीमगहन ; one had a fit arrow on the shoulder, while the other had rain-bow encircling it. Thus both were similar in appearance.

3. विदिद्युते—वि + द्युत + लिट ए। Shone ; nom. सः।

4. *Voice*—विभ्रता तेन......सज्यकार्मुकेन सता शैलपतिना......परिवीत भीमगहनेन ...।

10. Himalaya seemed gone down to earth through his weight.

प्रविवेश गामिव कृशस्य नियमसवनाय गच्छतः।
तस्य पदविनमितो हिमवान् गुरुतां नयन्ति हि गुणाः न संहतिः ॥१०॥

Prak—Easy.

Prose.—कृशस्य (अपि) नियमसवनाय (नियमस्नानाय) गच्छतः तस्य (अर्ज्जनस्य) पदविनमितः हिमवान् गां (पृथिवीं) प्रविवेश इव। हि (यतः) गुणाः गुरुतां नयन्ति, संहतिः (मूर्त्तिः) न (गुरुतां नयति)।

Eng.—Though emaciated (by penance), still as he (Arjuna) was going for his religious bath, the Himalaya seemed gone deep into the earth through the weight of his feet. Because it is quality and not mere frame that contributes to weight.

Beng.—যদিও তপঃকৃশ, তবুও নিয়মস্নানে যাইবার সময় অর্জ্জুনের পদভরে হিমালয় বিনমিত হইয়া ধরণীর মধ্যে ঢুকিয়া গেল বলিয়া মনে হইল। কারণ, গুণই, মূর্ত্তি নয়, গুরুতা বিধান করিয়া থাকে।

Malli.—'नियमसवनाय' नियमस्नानाय ["सवनं त्वध्वरे स्नाने सोमनिर्दलेपि च" इति विश्वः] 'कृशस्य' तपःकर्शितस्य तथा 'गच्छतः तस्य' अर्जुनस्य 'पदविनमितः' पदैः पादन्यासैः विनमितः 'हिमवान्, गां' भुवं 'प्रविवेश इव' इति उत्प्रेक्षा। ननु कृशस्य कथम् इयत् गौरवम्?—तत्राह। 'गुणाः' सारादयः 'गुरुतां नयन्ति' प्रापयन्ति हि। 'संहतिः' संघातः मूर्त्तिः इति यावत् 'न' नयति। [अन्तः-सारात् हि गौरवं भवति, न तु बाह्यात् स्थौल्यात्; तत्र च हेमपिण्डतूलपिण्डौ एव निदर्शनम् इति भावः] ॥ १० ॥

Charcha.

1. प्रविवेश—प्र + विश + लिट अ। Entered ; nom. हिमवान् ॥ 'गाम्' here means 'भुवम्'—obj. of प्रविवेश।

2. नियमसवनाय—सवनम् is स्नान। नियमस्य सवनम् religious ablution, ६तत्। तस्मै। तादर्थ्ये ४र्थी।

3. कृशस्य—कृश (तनूकरणे दिवादि) + क्त कर्त्तरि = कृश: emaciated, तस्य, Qual. तस्य। Here कृशस्य means तप:कृशस्य॥ The word कृश is irregularly formed with क्त when preceded by no उपसर्ग by the rule "अनुपसर्गात् फुल्लक्षीवकृशोल्लाघा:"।

4. पदविनमित:—पद is पादन्यास। वि + नम + णिच् क्त कर्मणि—विनमित: weighed down. पदै: विनमित:, ३तत्। Qual. हिमवान्। Though emaciated, still Arjuna's internal vitality gave him weight and owing to this his footstep pulled down Himalaya. See Malli "अन्त:सारात् हि गौरवं भवति...तिदर्शनम्"।

5. नयन्ति—नी + लट अन्ति। contributes to ; nom. गुणा:।

6, *Voice*...विनमितेन हिमवता गौ: प्रविवेशे......गुणै: नीयते गुरुता न संहत्या...।

II. His bodily lustre overshadows all.

परिकीर्णमुद्यतभुजस्य भुवनविवरे दुरासदम्।
ज्योतिरुपरि शिरसो विततं जगृहे निजान्मुणिदिवौकसांपथ: ॥११॥

Prak.—Easy.

Prose.—उद्यतभुजस्य (तस्य) शिरस: उपरि विततं भुवनविवरे (द्यावा-पृथिव्यो: अन्तराले) परिकीर्णं (व्याप्तम्) दुरासदं ज्योति:, मुनिदिवौकसां च निजान् पथ: (मार्गान्) जगृहे (रुरोध)।

Eng,—The unparalleled lustre of him (Arjuna) who had his hand uplifted, and lustre that diffused overhead and that pervaded the interspace between the heaven and the earth, covered i. e. obstructed his path as well as the paths of the gods and the sages.

Beng,—উন্নতবাহু অর্জ্জুনের মস্তকোপরি বিস্তৃত স্বর্গ ও মর্ত্ত্যের অন্তরালে ব্যাপ্ত দুর্দ্ধর্ষ তেজঃ নিজের, মুনিগণের ও দেবতাদের পথরোধ করিয়াছিল।

Malli.—'उद्यतभुजस्य' ऊर्द्ध्वबाहोः तस्य 'शिरसः उपरि' ["षष्ठ्यतसर्थप्रत्ययेन" इति षष्ठी] 'विततं' विस्तृतं 'भुवनविवरे' भुवनयोः विवरे द्यावापृथिव्योः अन्तराले 'परिकीर्णं' व्याप्तं 'दुरासदं' दुर्द्धर्षं 'ज्योतिः' तेजः 'मुनिदिवौकसां' मुनीनां दिवौकसां च 'निजान्' नियतान् 'पथः' मार्गान् 'जगृहे' जग्राह प्रतिबबन्ध इत्यर्थः ॥११॥

Charcha.

1. परिकीर्णम्—परि + कृ + क्त कर्त्तरि = परिकीर्णम् pervaded. (व्याप्तम्)। Qual. ज्योतिः। This divine ज्योतिः issued from his head, evidently due to penance.

2. उद्यतभुजस्य—उद् + यम + क्त = उद्यत uplifted. उद्यतौ भुजौ यस्य, बहु। तस्य। Qual. तस्य understood.

3. भुवनविवरे—विवर is lit, hole ; hence here it means the "interspace which is like a hole" so to say. भुवनयोः विवरम्, ६तत्, तस्मिन्। See Malli. अधि' ७मी।

4. दुरासदम्—Deriv. in Canto XI. sl. 63, under दुरासदवनज्यायान्। Qual. ज्योतिः।

5. शिरसः—शिरस् head, तस्य। ऊर्द्ध्व + रिल् = उप + रिल् = उपरि above. An अव्यय having sense of ७मी। अधि' ७मी। शिरसः

has षष्ठी in connection with अतसर्थकप्रत्यय प्रत्यय in उपरि, see Malli for rule.

6. विततम्—वि + तन + क्त कर्त्तरि = विततम् diffused. Qual. ज्योतिः।

7. जगृहे—ग्रह + लिट् ए। Obstructed. Nom, ज्योतिः। The action of मार्गग्रहण will benefit the agent (for it shows agent's majesty), so we have कर्त्रभिप्राये आत्मनेपद by the rule "स्वरितञितः कर्त्रभिप्राये क्रियाफले"।

8. मुनि etc.—दिव् heaven. द्यौः ओकः (स्थानं) येषां ते दिवौकसः वा दिवौकस. (पृषोदरादित्वात् साधु) Gods, बहु। Or—दिव is the base. दिवम् ओकः स्थानं येषाम्। Cp. "खं दिवं नभः" in त्रिकाण्डशेष। मुनयश्च दिवौकसश्च, द्वन्द्व। तेषाम्। शेषे षष्ठी, related to पथः। निजान् पथः refers to Arjuna's usual path to tread on.

9. *Voice.*—परिकीर्णेन दुरासदेन विततेन ज्योतिषा निजाः पन्थानः जगृहिरे...।

12. *His lustre was like jyotsna.*

रजनीषु राजतनयस्य बहुलसमयेऽपि धामभिः।
भिन्नतिमिरनिकरं न जहे शशिरश्मिसङ्गमयुजा नभः श्रिया ॥१२॥

Prak.—नभः श्रिया न जहे [The sky was not bereft of lustre]. Whence did this lustre come in the sky ?—राजतनयस्य धामभिः भिन्नतिमिरनिकरं नभः [The sky was bright, for its darkness was dispelled by Arjuna's divine lustre]. What kind of lustre was this ?—शशिरश्मिसङ्गमयुजा श्रिया [the lustre seen in the sky was like that of moon-light]. Perhaps moon herself was shining there ?—बहुलसमयेऽपि रजनीषु नभः श्रिया न जहे [No, it was Arjuna's

divine lustre ; for this lustre was seen in the sky even in nights of darkfortnight].

Prose.—बहुलसमये (कृष्णपक्षे) अपि रजनीषु राजतनयस्य (अर्जुनस्य) धामभिः भिन्नतिमिरनिकरं नभः शशिरश्मिसङ्गमयुजा श्रिया न जहे (न त्यक्तम्)।

Eng.—The sky with its crowd of darkness dispelled even in nights of the darknight by the lustre of Arjuna (the son of a king), was not destitute of the glory got in contact with the moon's rays.

Beng.—কৃষ্ণপক্ষের রাত্রিতেও অর্জ্জুনের দিব্য জ্যোতিদ্বারা অন্ধকার বিনষ্ট হওয়ায় আকাশ, চন্দ্রকিরণের সঙ্গম জন্য প্রভা দ্বারা কখনও ত্যক্ত হইল না।

Malli.—'बहुलसमये' कृष्णपक्षे 'अपि रजनीषु' रात्रिषु 'राजतनयस्य' अर्जुनस्य 'धामभिः' तेजोभिः 'भिन्नतिमिरनिकरं' भिन्नः तिमिरनिकरः यस्य तत् 'नभः, शशिरश्मिसङ्गमयुजा' शशिरश्मीनां सङ्गमेन हेतुना युजासङ्गतया 'श्रिया' तच्छ्रीतुल्यया श्रिया इत्यर्थः [अतएव निदर्शनालङ्कारः] 'न जहे' न त्यक्तम् [जहातेः कर्म्मणि लिट्]। ज्योत्स्नातुल्यं ज्योतिर्जातम् इत्यर्थः ॥ १२ ॥

Charcha.

1. रजनीषु—Both रजनि and रजनी mean 'night'. अधि' ७मी।

2. राजतनयस्य—राज्ञः तनयः, ६तत्। तस्य। Refers to Arjuna who was the son of king Pandu. शेषे षष्ठी, related to धामभिः।

3. बहुलसमये—बहुल is कृष्ण here. बहुलस्य समयः, ६तत्। तस्मिन्। अधि' ७मी।

4. धामभिः—धामन् is lustre (किरण, ज्योतिः)। तैः। अनुक्ते कर्त्तरि ३या, अनुक्त कर्त्ता of भिन्न—भिन्नतिमिरनिकरम।

5. भिन्न etc—निकर is समूह। तिमिरस्य निकरः, ६तत्। भिद + क्त कर्म्मणि

भिन्न i. e. destroyed. भिन्नः तिमिरनिकरः यस्य, बहु। तत्। Qual. नभः।

6. जहे—हा त्यागे + लिट ए कर्म्मणि। was forsaken. Its अनुक्त कर्त्ता is श्रिया। नभः is here उक्तकर्म्म in agreement with जहे।

7. शशि etc.—सङ्गम is contact. रश्मि is किरण। शशिनः रश्मिः, ६तत्। शशिरश्मीनां सङ्गमः, ६तत्। तं युनक्ति इति शशिरश्मिसङ्गम + युज + क्विन् कर्त्तरि = शशिरश्मिसङ्गमयुज् that which gets contact with moon's rays (lustre), उपपदतत्। तया। Qual. श्रिया। See Malli also.

8. *Voice.*—...युक् श्रीः···न जहौ...।

13. *His lustre surpasses sun's rays.*

महता मयूखनिचयेन शमितरुचि जिष्णुजन्मना।
ह्रीतमिव नभसि वीतमले न विराजते स्म वपुरंशुमालिनः ॥१३॥

Prak.—Eng.

Prose.—जिष्णुजन्मना (अर्जुनोद्गतेन) महता मयूखनिचयेन शमितरुचि (हतप्रभम्) अंशुमालिनः (सूर्य्यस्य) वपुः ह्रीतमिव (लज्जितमिव) (सत्) वीतमले नभसि न विराजते स्म।

Eng—The disc of the sun with its brilliancy destroyed by the powerful lustres issued from Arjuna's body, was thus put to shame and (so) did not shine well in the clear sky.

Beng.—অর্জ্জুনশরীরোদ্ভূত প্রখর তেজোমালা সূর্য্যের বিম্বকে হতপ্রভ করিয়া লজ্জা দান করায়, উহা নির্ম্মল গগনেও তেজোদান করিতে পারে নাই।

Malli.—'जिष्णुजन्मना' जिष्णोः अर्जुनात् जन्म यस्य तेन [जन्मोत्तरपदत्वात् व्यधिकरणः बहुव्रीहिः] 'महता मयूखनिचयेन' बहुकिरणसमूहेन 'शमितरुचि' हतप्रभम् 'अंशुमालिनः वपुः' अर्कबिम्बं 'ह्रीत' निजत्वात् लज्जितम् 'इव' [इति उत्प्रेक्षा] 'वीतमले' विमले मेघनीहाराद्यावरणरहितेपि 'नभसि न विराजते स्म' ॥१३॥

Charcha.

1. मयूखनिचयेन—नि + चि + अच् भावे = निचयः i. e, समूह। मयूख is lustre. तेषां निचयः, ६तत्। तेन। अनुक्ते कर्त्तरि ३या, अनुक्ते कर्त्ता of शमित in शमितरुचि।

2. जिष्णुजन्मना—जि + गस्नु = जिष्णु a name of Arjuna. जिष्णोः जन्म (प्रभवः) यस्य, व्यधिकरण बहु। तेन। Qual. मयूखनिचयेन। Generally व्यधिकरण बहु is not sanctioned (Cp. व्यधिकरणानां मा भूत् in भाष्य); but व्यधिकरणबहु—is sometimes resorted to as is ज्ञापित in the rule "सप्तमीविशेषणे बहुव्रीहौ"। And indeed व्यधिबहु—is unavoidable when जन्म, गर्भ &c. follow as उत्तरपद, thus Vamana says "अवर्ज्यो हि बहुव्रीहिर्जन्माद्युत्तरपदः"।

3. ह्रीतम्—ह्री [illegible] + क्त कर्त्तरि = ह्रीतम् ashamed. pred. to वपुः। The sun's वपुः was ashamed (ह्रीतम्)।

4. शमित etc—रुचि is lustre. शम् + णिच् + क्त कर्मणि = शमित or शान्त dispelled. शमिता रुचिर्यस्य, बहु। Qual. वपुः। Both शमित + शान्त are correct in णिच् by the rule "वा दान्तशान्तपूर्णदस्तस्पष्टछन्नज्ञप्ताः"।

5. वीतमले—वि + इ + क्त कर्त्तरि = वीत gone. वीतं मलं यस्य, बहु। तस्मिन्। Qual. नभसि।

6. विराजते—वि + राज + लट ते। Shines well. Nom. वपुः। वि is intensive. वि विशेषेण राजते इति विराजते। स्म-योगे अतीते लट (see sl. 5 under हतः स्म)।

7. अंशुमालिनः—अंशु is rays. तेन मलते (सर्वान् संवध्नाति) इति अंशु + मल + णिनि कर्त्तरि = अंशुमालिन् a name of Sun. (Prefer this derivation); तस्य। शेषे षष्ठी, related to वपुः।

8. *Voice*—शमितरुचिना ह्रीतेन वपुषा.........विराज्यते...।

14. He was like Siva as if.

तमुदीरितारुणजटांशुम् अधिगुणशरासनं जनाः ।
रुद्रमनुदितललाटदृशं ददृशुर्मिमन्थिषुमिवासुरीः पुरीः ॥ १४ ॥

Prak.—Easy.

Prose.—जनाः (तत्रत्यसिद्धादिगणाः) उदीरितारुणजटांशुम् अधिगुण-शरासनम् (अधिज्यचापं) तम् (अर्जुनम्), आसुरीः पुरीः मिमन्थिषुम् अनुदित-ललाटदृशं रुद्रम् इव ददृशुः ।

Eng.—The demi-gods there looked upon him (Arjuna) from whom red brilliance of matted locks radiated and who had his bow strung,—as Rudra himself without his eye on the forehead and trying to destroy the city of Asura (i. e. Tripurasura).

Beng.—সেখানকার সিদ্ধাদিগণ অর্জ্জুনের জটা হইতে উদ্‌গত অরুণ কিরণ দেখিয়া ও তার হস্তে সজ্জিত ধনু দেখিয়া, তাকে ত্রিপুর মথনে ইচ্ছু ভাললোচনহীন রুদ্রের ন্যায় দেখিলেন।

Mall.—उदीरिताः उद्गताः अरुणाः जटानाम् अंशवः यस्य तम् 'उदीरितारुणजटांशुम्', अधिगुणं अधिज्यं शरासनं यस्य तम् 'अधिगुणशरासनं तम्' अर्जुनं 'जनाः' सिद्धगणाः, 'आसुरीः' असुरसम्बन्धिनीः 'पुरीः मिमन्थिषु' मथितुमिच्छुम् [मथेः सन्नन्तात् उप्रत्ययः] तथा 'अनुदितललाटदृशं' अनुदिता अनुत्पन्ना ललाटदृक् (नयनं) यस्य तं साक्षात् त्रिपुरविजयोद्यतम् अभालाक्षं 'रुद्रमिव ददृशुः'। [अत्र अभालाक्षस्य रुद्रस्य असम्भवात् स्वतःसिद्धोपमानासिद्धेः न इयम् उपमा किन्तु उत्प्रेक्षा। सा च अभालाक्षम् इति उपमानात् उपमेयस्य न्यूनत्वकथनार्थं अन्वय-व्यतिरेकेण उज्जीविता, इति अनयोः अङ्गाङ्गिभावेन सङ्करः। उपमा तु व्यज्यते एव इति अलङ्कारेण अलङ्कारध्वनिः (See Char.)] ॥ १४ ॥

Charcha.

1. उदीरितारुण &c—उद् + ईर (गतौ) + क्त कर्मणि = उदीरित issued. अरुणा जटांशवः, कर्मधा। उदीरिता अरुणजटांशवः यस्य, बहु। तम्। Qual. तम्। Red lustre issued from his locks of matted hair.

2. अधिगुण &c.—शरासन is bow. गुण is string. गुणमधिगतम् इति अधिगुणम् with string on, प्रादितत्। अधिगुणं शरासनं यस्य, the bow with stiring on, बहु। Qual. तम्।

3. अनुदित etc.—दृश्यते अनेन इति दृश + क्विप् करणे = दृश् eye. ललाटस्थादृक् the eye on the forehead, शाकपार्थिवादिवत् समासः। वा ललाटस्य दृक्, ६तत्। उद् + इ + क्त कर्त्तरि = उदित risen. न उदिता अनुदिता, नञ्तत्। अनुदिता ललाटदृक् यस्य, बहु। Qual. रुद्रम्। He was like Rudra without his third eye on the forehead.

4. ददृशुः—दृश + लिट उस्। Saw. Nom. जनाः।

5. मिमन्थिषुम्—मथितुम् इच्छुः इति मन्थ (भ्वादि) + सन् + उ = मिमन्थिषुः wishing to churn i. e. destroy. तम्। Qual. रुद्रम्।

6. आसुरीः पुरीः—असुरस्य (त्रिपुरासुरस्य) इयम् इति असुर + अण् + ङीप् = आसुरी। ताः। Qual. पुरीः। पुरीः is obj. of मिमन्थिषुम्। See Malli also—अनुदिता···ददृशुः।

7. *Voice.*—जनैः स...जटांशुः...शरासनः सः रुद्रः इव ददृशे &c. easy.

8. *Remark.*—The figure here is उत्प्रेक्षा and not उपमा so इव here implies उत्प्रेक्षा (surmise), for Rudra without भाललोचन is not found anywhere—He being three-eyed always (स्वतःसिद्ध)। And this उत्प्रेक्षा is enlivened by उपमा in which the उपमेय (as अर्जुन here) is less than उपमान (as रुद्र here) ; thus both these figures are commixed here like an अङ्ग and अङ्गिन्। Lastly as

उपमा is suggested through उत्प्रेक्षा, so here is अलङ्कारध्वनि by अलङ्कार। See Malli "अत्र......अलङ्कारध्वनिः"।

15. *He is guessed as Indra &c.*

मरुतां पतिः स्विदहिमांशुः उत पृथुशिखः शिखी तपः।
तप्तुममसुकरमुपक्रमते न जनोऽयमित्यवयये स तापसैः॥ १५॥

Prose.—मरुतां पतिः स्वित्, उत अहिमांशुः (वा) पृथुशिखः शिखी (अग्निः), असुकरं तपः तप्तुमुपक्रमते। अयं न जनः (प्राकृतः जनः न)—इति स तापसैः अवययौ (अवगतः)।

Eng.—Is the lord of the gods, or the sun, or the blazing fire, trying to practise severe penance? He is not an ordinary man —he was so known by the sages there.

Beng.—দেবরাজ, অথবা তিগ্মরশ্মি সূর্য্য অথবা বিশালজ্বালাযুক্ত অগ্নিদেব কি দুষ্কর তপস্যা করিতে আরম্ভ করিয়াছেন? ইনি সাধারণ লোক নন্—ইহা তত্রস্থ মুনিগণ কর্ত্তৃক জ্ঞাত হইয়াছিল।

Malli.—'मरुतां पतिः स्वित्' देवेन्द्रः वा 'अहिमांशुः उत सूर्य्यः वा 'पृथुशिखः' महाज्वालः 'शिखी' पावकः वा, 'असुकरं' दुष्करं 'तपः तप्तुम् उपक्रमते'। 'अयं जनः' कश्चित् प्राकृतः पुरुषः 'न इति सः' अर्जुनः 'तापसैः' तपस्विभिः ["अणाच" इति मत्वर्थीयः अण्प्रत्ययः] 'अवययौ' अवगतः [यातेः अवपूर्वात् कर्म्मणि लिट्॥ अत्र इन्द्रत्वादिकं धर्म्ममारोप्य जनत्वापवादात् साम्यमारोप्य अपह्नवालङ्कारः। सामान्यलक्षणं तु—"निषिद्ध विषये साम्यारोपोह्यपह्नवः" इति लक्षणात्।]॥ १५॥

Charcha.

1. अहिमांशुः—हिम is snow i e. cold (here). न हिमाः अहिमाः नञ्तत्। अहिमाः अंशवः (रश्मयः) यस्य, बहु। This is a name of सूर्य्य। पतिः, अहिमांशुः, शिखी—these are all separately. Nom. to उपक्रमते।

2. स्वित्, उत—These are अव्यय denoting विकल्प।

3. पृथुशिखः—शिखा is flame. पृथ्वी शिखा यस्य, बहु। पुंवद्भावश्च। Qual. शिखी॥ शिखा अस्ति अस्य इति शिखा+इनि (व्रीह्यादि)=शिखी a name of fire. As already described, अर्जुन was full of divine lustre owing to his severe penance So sages there were guessing so.

4. असुकरम्—सु सुखेन क्रियते इति सु+कृ+खल् कर्म्मणि=सुकरम् easily to be done. न तथा इति असुकरम्, नञतत्। Qual. तपः।

5. उपक्रमते—उप+क्रम+लट ते। Begins. Nom. शिखी, पतिः &c. Here उप+क्रम takes आत्मनेपदी in the sense of आरम्भ by the rule "प्रोपाभ्यां समर्थाभ्याम्"।

6. अवययै—अव+या+लिट ए कर्म्मणि। Was known. Agrees with उक्तकर्म्म—सः here. The अनुक्तकर्म्म here is तापसैः (तप+अण् मत्वर्थीय=तापस a sage—तैः)।

7. *Voice*—Easy.

16. *His majesty unbearable.*

न ददाह भूरुहवनानि हरितनयधाम दूरगम्।
न स्म नयति परिशोषमपः सुसहं बभूव न च सिद्धतापसैः॥१६॥

Prose.—दूरगं हरितनयधाम (अर्जुनतेजः) भूरुहवनानि न ददाह, अपः (जलानि) परिशोषं न नयति स्म, च (तथापि) सिद्धतापसैः सुसहं न बभूव।

Eng.—The diffusing lustre of Arjuna did not burn the trees, nor did it dry up water, still it was not tolerable to the liberated sages.

Beng.—অর্জ্জুনের তপস্যাজনিত ব্যাপক তেজ বৃক্ষসমূহ পোড়ায় নাই;

ইহা জল শোষণও করে নাই, তবুও ইহা সিদ্ধ মুনিগণের নিকট সুসহ হইল না।

Malli.—'दूरगम्' व्यापकमित्यर्थः 'हरितनयधाम' हरितनयस्य इन्द्रसुतस्य अर्जुनस्य धाम तेजः 'भूरुहवनानि' वृक्षषण्डान् 'न ददाह' अग्निवत् इति भावः। तथापि इति शेषः 'सिद्धतापसैः' सिद्धाश्च तापसाश्च तैः 'सुसहं न च बभूव'। अतः अस्य अलौकिकं तेजः इति भावः। [अतएव दुःसहत्व दाहाद्यजनकत्वयोः विरोधात् विरोधाभासः अलङ्कारः। "आभासत्वे विरोधस्य विरोधालङ्कृतिर्मता" इति लक्षणात्] ॥१६॥

Charcha.

1. ददाह—दह (भ्वादि) + लिट अ। Nom. हरितनयधाम (for which see Malli).

2. भूरुहवनानि—भुवि रुहन्ति इति भू + रुह + क कर्त्तरि = भूरुहाः trees. वन is here समूह or forest. भूरुहाणां वनानि, ६तत्। Obj. of ददाह।

3. दूरगम्—दूरं गच्छति इति दूर + गम + ड कर्त्तरि = दूरग going far. Qual. हरितनयधाम।

4. नयति—नी + लट ति। स्म योगे अतीतार्थे लट। Nom....धाम।

5. सुसहम्—सु सुखेन सह्यते इति सु + सह + खल् कर्मणि = सुसहम् easily tolerable. Pred to हरितनयधाम। Its अनुक्तकर्त्ता is सिद्धतापसैः (for which see Malli).

6. बभूव—भू + लिट अ। Nom. हरितनयधाम॥ Here च in the last line should denote the sense of अपि। Though अर्जुनतेजः was not like fire or sun, still (च) it was unbearable (सुसहं न बभूव)। So also Malli says "तथापि...सिद्धतापसैः" &c.

7. *Voice.*—Easy.

17. *So sages there take shelter under Siva.*

विनयं गुणा इव विवेकम् अपनयभिदं नया इव ।
न्यायमवधय इवाशरणाः शरणं ययुः शिवमथो महर्षयः ॥१७॥

Prak.—अथ महर्षयः शिवं शरणं ययुः । Why did they do so ? अशरणाः महर्षयः । How is this ? गुणाः विनयम् इव [As qualities are seen growing under proper training, so sage were seen collecting under Siva. They went under Siva as protector, for they were afraid of Arjuna's penance]. I can't follow you ;—नयाः अपनयभिदं विवेकम् इव [This is like right policies living under discrimination that destroys foolishness]. This is true indeed—अवधयः न्यायम् इव [As observances of vows are seen under the jurisdiction of righteousness, so sages were seen taking protection under Siva].

Prose.—अथ अशरणाः महर्षयः, गुणाः विनयम् इव, नयाः अपनयभिदं विवेकम् इव, अवधयः (समयाः) न्यायम् (सत्यम) इव, शिवं शरणं (रक्षितारं) ययुः (प्रापुः) ।

Eng.—The helpless sages took Siva as their protector, like qualities seen under proper training, like policies seen in discrimination that dispels foolishness, like vows seen within the range of righteousness.

Beng.—(অর্জ্জুনের তপোভয়ে) অসহায় মহর্ষিগণ, ঔদার্য্যাদিগুণ যেমন শিক্ষার মধ্যে আশ্রিত থাকে, নীতিপ্রয়োগ যেমন অজ্ঞতানাশক বিবেকের গোচরে থাকে, সময়রক্ষণ যেমন সত্যকে আশ্রয় করিয়া থাকে, তেমনি শিবকে আশ্রয় করিয়াছিলেন।

Malli—'अथो' अनन्तरम् 'अशरणा महर्षयः' मुनयः, 'विनयं' शिक्षां 'गुणाः' औदार्यादयः 'इव'। अशिक्षितस्य तदभावात् इति भावः। 'अपनयभिदं' दुर्नीतिवारकं 'विवेकं' सदसज्ज्ञानं 'नयाः' नाचयः 'इव', अविवेकिनः नाद्यभावात् इति भावः। [नीतिः षाड्गुण्यप्रयोगः]! 'न्यायं' नीयते अनेन इति न्यायः नियामकं प्रमाणम्, तम् 'अवधयः' समयाः 'इव'। अप्रामाणिकस्य समयोल्लङ्घितत्वात् इति भावः। 'शिवं' विनयनं 'शरणं' रक्षितारम् ["शरणं गृहे रक्षित्रोः" इत्यमरः] 'ययुः' जग्मुः, शरणत्वेन प्रापुः इत्यर्थः। अशरणा शरणं इति च उपमासु अपि यथायोग्यं योज्यम्। [उपमालङ्कारः] ॥ १७ ॥

Charcha.

1. अपनयभिदम्—नी + अच् बाहुलकात् = नयः rightness. justice. अपस्थितः नयः, अपनयः, प्रादितत्। Or—अप + नी + अच् भावे = अपनयः injustice. अपनयं भिनत्तीति अपनय + भिद + क्विप् कर्त्तरि = अपनयभिद् destroyer of injustice, उपपदतत्। तम्। Qual. विवेकम्। नय (justice) is seen in good discrimination, so justice is said to gather under intelligence. This is compared with sages taking shelter under Siva through intolerance of Arjuna's penance. The other similes are also to be interpreted thus. See Malli and Prak also.

2. अशरणाः—शरण is सहाय here. अविद्यमानं शरणं येषां, बहु। Qual. महर्षयः।

3. शरणम्—शरण here is रक्षित (protector). Pred. to शिवम्। "'शरणं' गृहरक्षित्रोः" इत्यमरः।

4. ययुः—या + लिट उस्। Nom. महर्षयः।

5. अथो—An अव्यय meaning 'अथ' (अनन्तर)।

6. *Voice*—महर्षिभिः शिवः शरणं ययै [शरण is always neuter like प्रधान]।

18. But Siva unseen for his lustre.

परिवीतमंशुभिरुदस्तदिनकरमयूखमण्डलैः ।
शम्भुमुपहतदृशः सहसा न च ते निचायितुमभिप्रसेहिरे ॥१८॥

Prak.—ते सहसा शम्भुम् निचायितुम् न अभिप्रसेहिरे [The sages were not for the time being able to see Siva]. Why were they not able to see Siva ?—. उपहतदृशः ते [Their sight was blurred]. whence did this incapacity of vision came to them ?—उदस्तदिनकरमयूखमण्डलैः अंशुभिः परिवीतं शिवम् निचायितुम् [Siva was surrounded by light that overpowered sun's rays ; so this light of Siva blurred down their vision, and hence they were not able to see Siva for the time being].

Psose.—उदस्तदिनकरमयूखमण्डलैः अंशुभिः परिवीतं शम्भुं उपहतदृशः ते सहसा निचायितुं न अभिप्रसेहिरे ।

Eng.—The sages, having their sight vitiated, were not suddenly able to see Siva (Sambhu) surrounded by light that outclassed the sun's circle of rays.

Beng.—সূর্য্যবিজয়ী তেজঃ দ্বারা ব্যাপ্ত হওয়ায়, প্রতিহতদৃষ্টিমহর্ষিগণ, শম্ভুকে তখন দেখিতে পারিলেন না ।

Malli.—'उदस्तदिनकरमयूखमण्डलैः' उदस्तं निरस्तं छादितं दिनकरमयूखमण्डलं यैः तैः, सूर्यतेजोविजयिभिः इत्यर्थः । 'अंशुभिः' तेजोभिः 'परिवीतं' व्याप्तं 'शम्भुं' शिवम् 'उपहतदृशः' प्रतिहतदृष्टयः 'ते' महर्षयः 'सहसा' झटिति निचायितुं निशमयितुं द्रष्टुम् इत्यर्थः ["चायृ पूजानिशामनयोः" इति धातोः "शकधृष—" इत्यादिना तुमुन्] 'न च अभिप्रसेहिरे' न शेके ॥ १८ ॥

Charcha.

1. परिवीतम्—परि + वि + इ + क्त कर्मणि = परिवीतम् surrounded. Qual. अम्बुम्।

2. उदस्त &c.—उद् + अस् (क्षेपे) दिवादि + क्त कर्मणि = उदस्त covered overpowered. दिनकरस्य मयूखमण्डलम्, ६तत्। उदस्तं दिनकरमयूखमण्डलम् यै:, वहु। तै:। Qual. अंशुभि: (which has अनुक्ते कर्त्तरि ३या। अनुक्त कर्त्ता of परिवीतम्। As इ धातु in परिवीत is गत्यर्थक and so सकर्मक; hence अनुक्त कर्त्ता in अंशुभि: seems logical)

3. उपहतदृश:—दृश् is vision, or eye. उपहता दृक् येषान्, वहु। Qual. ते (महर्षय:)।

4. निचायितुम्—नि + चाय् (भ्वादि) + तुमुन्। To see. See Malli also.

5. अभिप्रसेहिरे—अभि + प्र + सह + लिट इरे। Nom. ते।

6. *Vioce*—उपहतदृग्भि: तै: अभिप्रसेहे......।

I9. Siva however was seen through laudation.

अथ भूतभव्यभवदीशम् अभिमुखयितुं कृतस्तवा:।
तत्र महसि ददृशु: पुरुषं कमनीयविग्रहमयुग्मलोचनम् ॥१८॥

Prose.—अथ भूतभव्यभवदीशम् अभिमुखयितुं कृतस्तवा: ते तत्र महसि (तेजसि) कमनीयविग्रहं अयुग्मलोचनं पुरुषं (शिवस्वरूपं) ददृशु:।

Eng.—Now having made laudation to attract the lord of the past future and the present, towards them, the sages saw a man (i. e. Siva) of charming frame and having odd eyes, within that light.

Beng.—ভূত ভবিষ্যৎ ও বর্ত্তমানের কর্ত্তা শিবকে অভিমুখীকরণের

জন্য স্তব করিয়া মহর্ষিগণ সেই অংশুতে, কমনীয় দেহ ত্রিলোচন পুরুষকে (শিবকে) দেখিলেন।

Malli.—'अथ' इगुपघातानन्तरं 'भूवभव्यभवदीशं' भूतभव्यभवतां भूतभविष्यद्वर्त्तमानाम् ईशं' देवम् 'अभिमुखयितुम्' अभिमुखीकर्त्तम् 'कृतस्तवाः' कृतस्तोत्राः सन्तः ["स्तवः स्तोत्रं स्तुतिर्नुतिः" इत्यमरः] 'तत्र' पूर्व्वोक्ते 'महसि' तेजसि 'कमनीयविग्रहं' रम्यमूर्त्तिम् 'अयुग्मलोचनं' अयुग्मानि त्रीणि लोचनानि यस्य तं 'पुरुषं' ददृशुः' ॥

Charcha.

1. भूतभव्य etc—Refers to Siva. See Malli for समास and meaning.

2. अभिमुखयितुम्—अभिमुखं कर्त्तुम् इति अभिमुख + णिच + तुमुन ; to draw towards. "तत् करोति तदाचष्टे" इति णिच्।

3. कृतस्तवाः—कृतः (विहितः) स्तवः यैः, वहु। ते। Qual. ते। Siva was however seen being pacified by their laudation.

4. ददृशुः—दृश + लिट उस्। Saw. Nom. ते।

5. अयुग्मलोचनम्—युग्म is even. अयुग्म is odd. i. e. three here अयुग्मं लोचनं यस्य, वहु। तम्। Qual. पुरुषम्। See Malli also.

6. कमनीयः विग्रहः यस्य, वहु। तम। Qual. पुरुषम्।

7. *Voice*—कृतस्तवैः तैः कमनीयविग्रहः अयुग्मलोचनः पुरुषः ददृशे...।

20 *Siva described as having his hand on bull's hump.*

ककुदे वृषस्य कृतवाहुम् अकृशपरिणाहशालिनि।
स्पर्शसुखमनुभवन्तमुमाकुचयुग्ममण्डल इवार्द्रचन्दने ॥२०॥

[N. B.—Indelicate—Malli alone follows].

Prose.—अकृशपरिणाहशालिनि वृषस्य ककुदे, आर्द्रचन्दने उमाकुचयुग्ममण्डले इव कृतवाहुं (अतः) स्पर्शसुखमनुभवन्तम् (शिवरूपं पुरुषं ददृशुः इति अन्वयः)।

Malli.—अथ पञ्चभिः पुरुषं विशिनष्टि ककुद इत्यादिना। कीदृशं पुरुषं ददृशुः ?—'अक्लशपरिणाहशालिनि' अक्लशेन महता परिणाहेन विशालतया शालते इति तथोक्ते ["परिणाहो विशालता" इत्यमरः] 'वृषस्य' वृषभस्य 'ककुदे' अंसकूटे आश्रयीकृते इति शेषः। 'आर्द्रचन्दने उमाकुचयुग्ममण्डले 'इव, कृतवाहुं न्यस्तहस्तम् अतएव स्पर्शसुखम् अनुभवन्त"; ककुदस्य तथाविधस्पर्शसुखकारत्वात् इति भावः [उपमालङ्कारः] ॥२०॥

21. *Siva remains covering all universe with his divinity.*

स्थितमुन्नते तुहिनशैलशिरसि भुवनातिवर्त्तिना।
साद्रिजलधिजलवाहपथं सदिगश्नुवानमिव विश्वमोजसा ॥२१॥

Prose.—उन्नते तुहिनशैलशिरसि स्थितं (तथापि) भुवनातिवर्त्तिना ओजसा साद्रिजलधिजलवाहपथम् सदिक् विश्वम् अश्नुवानम् इव (पुरुषं ददृशुः इतिपूर्वेण अन्वयः)।

Eng.—Though remained in one part of the high peak of Himalaya, still 'he (Siva) remained as if covering by his majesty the entire universe including the quarters the mountains, the oceans and the sky.

Beng.—যদিও হিমালয়ের উন্নত শিখরৈকদেশে অবস্থিত তথাপি সেই পুরুষ নিজ তেজে, পর্ব্বত, সমুদ্র, আকাশ ও দিক্ সহ বিশ্বকে ব্যাপিয়া ছিল মনে হইল।

Malli—'उन्नतेतुहिनशैलशिरसि' हिमवतः शिखरे 'स्थितं' क्वचित् कोणे स्थितम् इत्यर्थः। तथापि 'भुवनातिवर्त्तिना' सर्वलोकातिशायिना 'ओजसा' तेजसा, 'साद्रिजलधिजलवाहपथम्' अद्रिभिः पर्व्वतैः जलधिभिः समुद्रैः जलवाहपथेन आकाशेन च सह वर्त्तते इति तथोक्तम्। दिग्भिःसह वर्त्तते इति 'सदिक्' [उभयत्रापि "तेन सहेति तुल्ययोगे" इति बहुव्रीहिः] 'विश्वम् अश्नुवानं" व्याप्नुवन्तम् इव' स्थितम् [इति उत्प्रेक्षा। "अशूङ्व्याप्तौ" इति धातोः शानच्] ॥२१॥

Charcha.

1. तुहिन etc—तुहिन is snow. तुहिनस्य शैलम्, ६तत्। तस्य शिरः (शिखरम्), ६तत्। तस्मिन्। अधि ७मी।

2. भुवनाति etc—भुवनम् अतिवर्त्तते यत् इति भुवन+अति+वृत+णिनि कर्त्तरि=भुवनातिवर्त्तिन् surpassing the universe. तेन। Qual. तेजसा (which has करणे ३या)। Though Siva was in one part of Himalaya still his ओजस् (तेजस्) surpassed the Himalaya and the universe as well.

3. साद्रि etc—अद्रि is mountain. जलानि धीयन्ते अस्मिन् इति जल+धा+कि अधिकरणे=जलधिः ocean. जलं वहति यः इति जल+वह+अण् कर्त्तरि=जलवाहः carrier of water i. e. cloud. जलवाहस्य पन्थानः (the course of cloud i. e. sky) इति जलवाहपथः, ६तत्। Here समासान्त (अ) after पथिन् comes by the rule "ऋक्पूरब्धूः पथामानक्षे"। अद्रिश्च जलधिश्च जलवाहपथश्च, द्वन्द्व। तैः सह वर्त्तमानम्, तुल्ययोगे वहु—by "तेन सहेति" (See Malli). Qual. विश्वम्।

4. सदिक्—दिश् is quarter. ताभिः सह वर्त्तमानम् सदिक्, वहु। Qual. विश्वम्।

5. अश्नुवानम्—अश व्याप्तौ+शानच् कर्त्तरि=अश्नुवानः pervading. Qual. पुरुषम्।

6. *Voice.*—Easy.

22. *Siva's gigantic figure.*

अनुजानुमध्यमवसक्तविततवपुषा महाहिना।
लोकमखिलमिव भूमिभृता रवितेजसामवधिनाधिवेष्टितम् ॥२२॥

Prose.—अनुजानुमध्यम् अवसक्तविततवपुषा महाहिना अधिवेष्टितम् (पुरुषम्) रवितेजसाम् अवधिना भूमिभृता अधिवेष्टितम् अखिलम् लोकम् इव (ददृशुः)।

Eng.—The person (Siva) encircled in his knees with a great serpent having its great frame stuck therein, was seen like the universe surrounded by the Lokaloka mountain which is the limit of the sun's rays.

Beng.—জানুমধ্যে লগ্ন বিশালদেহযুক্ত সর্পকর্ত্তৃক বেষ্টিত পুরুষ (মহাদেব), সূর্য্যকিরণের সীমাভূত লোকালোক পর্ব্বতদ্বারা বেষ্টিত পৃথিবীর ন্যায় দেখা গিয়াছিল।

Malli—जानुनोः मध्ये 'अनुजानुमध्यम्' [विभक्त्यर्थे अव्ययीभावः]। 'अवसक्त विततवपुषा' अवसक्तं लग्नं विततम् आयतं च वपुः यस्य तेन 'महाहिना' अवसक्तिकावन्धभूतेन इत्यर्थः, 'अधिवेष्टितम्', अतएव रवितेजसाम् अवधिना' पर्य्यन्तभूतेन 'भूमिभृता' लोकालोकाचलेन 'अधिवेष्टितम् अखिलम् लोकम् इव स्थितम् (?) [इति उपमा]। असूर्य्यम्पश्यापरभागः लोकालोकाचलः इति आगमः ॥२२॥

Charcha.

1. अनुजानुमध्यम्—जानु knee. तयोः मध्यम्, ६तत्। तस्मिन्, इति अनुजानुमध्यम् in the middle of the knee. विभक्त्यर्थे अव्ययीभावः as in अनुनिशीथम् sl. 7.

2. अवसक्त &c.—अव + सञ्ज + क्त कर्त्तरि = अवसक्तम् stuck (लग्नम्)। वि + तन + क्त कर्त्तरि = विततम् vast. अवसक्तं च तत् विततं च, कर्मधा। अवसक्तविततं वपुः यस्य, बहु। तेन। Qual. महाहिना॥ महान् अहिः (सर्पः) कर्मधा। तेन। अनुक्ते कर्त्तरि ३या, अनुक्तकर्त्ता of अधिवेष्टितम्। It is thus उपमान of भूमिभृता। The great snake encircling Siva's knee, is like Lokaloka mountain surrounding the earth.

3. लोकम्—This is उपमान of पुरुषम्। अहिवेष्टित Siva was like the Earth surrounded by लोकालोकपर्वत।

4. अवधिना—Qual. भूमिभृता॥ भूमिं बिभर्त्ति इति भूमि + भृ + क्विप् कर्त्तरि

=भूमिभृत् mountain. तेन। अनुक्तकर्त्ता of अधिवेष्टितम्। लोकालोकपर्व्वत is at the end of the Earth. It surrounds the earth there and on its other side sun's rays cannot go ; so great the mountain is. Thus runs पौराणिक tradition.

5. अधिवेष्टितम्—अधि+वेष्ट+णिच क्त कर्म्मणि=अधिवेष्टितम् surrounded. Qual. पुरुषम् and लोकम् as well, Here the word 'स्थितम्' in Malli seems superfluous. See our Prose.

23. *Siva's throat-colour reflected in Vasuki on his body.*

परिणाहिना तुहिनराशिविशदमुपवीतसूत्रताम्।
नीतमुरगमनुरञ्जयता शितिना गलेन विलसन्मरीचिना ॥२३॥

Prose.—तुहिनराशिविशदम् (हिमशुभ्रम्) उपवीतसूत्रताम् नीतम् उरगम् (शेषाहिम्) अनुरञ्जयता परिणाहिना विलसन्मरीचिना शितिना गलेन (उपलक्षित' पुरुष' ददृशुः)।

Eng.—They saw the lord characterised by blue resplendent huge throat : The colour whereof tinged the snow-white snake Vasuki that was like the sacred thread (hanging on his shoulder).

Beng.—বিশাল প্রসৃতকিরণ নীল গলযুক্ত পুরুষকে দেখিলেন ; এই পুরুষের নীল গলদেশ তদীয় স্কন্ধে উপবীতরূপে স্থিত হিমশুভ্র বাসুকিকে রঞ্জিত করিয়াছিল।

Malli.—पुनः च 'तुहिनराशिविशदं' तुहिनराशिवत् विशदं शुभ्रम् 'उपवीतसूत्रतां 'नीत'' प्रापितम् 'उरग'' शेषाहिम् 'अनुरञ्जयता' स्वगुणोपरक्तं कुर्वता श्यामीकुर्वता इत्यर्थः। 'परिणाहिना' विशालेन 'विलसन्मरीचिना' प्रसृतकिरणेन 'शितिना' नीलेन 'गलेन' कण्ठेन उपलक्षितम् ["कण्ठो गलोऽथ ग्रीवायाम्" इत्यमरः। अत्र

उरगस्य स्व-धवलिमत्यागेन अन्यजन्य-नीलिम ग्रहणात् तद्गुणालङ्कारः ; "तद्गुणः स्वगुणत्यागात् अन्योत्कृष्टगुणग्रहः" इति लक्षणात्] ॥२३॥

Charcha.

1. परिणाहिना—परि + नह + घञ् भावे = परिणाह। परिणाह + इनि मत्वर्थे = परिणाहिन् having hugeness ; तेन। Qual. गलेन।

2. तुहिन etc.—तुहिनस्य (हिमस्य) राशिः, इतत्। स इव विशदः (शुभ्रः) उपमानतत्—by the rule "उपमानानि सामान्यवचनैः"। तम्। Qual. उरगम्।

3. उपवीत etc.—उपवीत is sacred thread. उपवीतमिव सूत्रम्, कर्मधा। तस्य भावः इति तम्। तत्ताम्। Obj. of नीतम्।

4. उरगम्—उरस् breast. तेन गच्छतीति उरस् + गम + ड कर्त्तरि = उरगः a snake. तम्। Obj. of अनुरञ्जयता। Here the स् of उरस् elides when ड follows by the varttika "उरसो लोपो वक्तव्यः"।

5. अनुरञ्जयता—अनु + रञ्ज + शतृ। तेन। Qual. गलेन। Siva's throat coloured the white body of Vasuki that was like a उपवीत on his shoulder.

6. विलसन्मरीचिना—मरीचि is किरण। वि + लस + शतृ = विलसत् shining i. e. radiating. विलसन्तः मरीचयः यस्य, बहु। तेन। Qual. गलेन (which has उपलक्षणे ३या)।

24. Siva with white moon-beams.

प्लुतमालतीसितकपालकुमुदमवरुद्धमूर्द्धजम्।
शेषमिव सुरसरित्पयसां शिरसा विसारि शशिधाम बिभ्रतम् ॥२४॥

Prose.—प्लुतमालतीसित-कपालकुमुदम् अवरुद्धमूर्द्धजम् सुरसरित्पयसां शेषमिव शिरसा विसारि शशिधाम बिभ्रतम् (पुरुषं ददृशुः)।

Eng.—They saw Siva bearing the diffusing moon-beams

by his head—these Malati-white moon-beams innundated his lily-like forehead, pervaded his matted locks and were white like the remnant water of the divine river (Ganges).

Beng.—মস্তককেতে বিসরণশীল শশিকিরণ ধারণ করিয়া স্থিত পুরুষকে তাঁরা দেখিলেন। এই মালতীপুষ্পতুল্য শুভ্র শশিকিরণ তদীয় কপালরূপ-কুমুদপুষ্পকে আপ্লুত করিয়াছিল, জটা ব্যাপিয়া ছিল এবং সুরধুনী গঙ্গার অবশিষ্টজলের ন্যায় শুভ্র ছিল।

Malli.—पुनः च 'प्लुतमालतीसित—कपालकुमुदं' मालती जातीकुसुमम् ["सुमना मालती जातिः" इति, "पुंसि जाती प्रभृतयः स्वलिङ्गाः ब्रीह्यः फले" इति चामरः] तद्वत् सितं यत्, कपालमेव कुमुदं, तत प्लुतम् आप्लुतं येन तत् तथोक्तम्। 'अवरुद्धमूर्द्धजम्' व्याप्तशिरोरुहम्, अतएव 'सुरसरित्पयसां शेषम् इव' निर्यातावशिष्टं गाङ्गम् अम्भः इव स्थितमित्यर्थः [उत्प्रेक्षालङ्कारः]। 'विसारि' विसृत्वरं 'शशिधाम' चन्द्रतेजः 'शिरसा बिभ्रतम्' पुरुषं ददृशुः इति पूर्व्वेण अन्वयः ॥२४॥

Charcha.

1. प्लुत etc.—प्लु + क्त कर्म्मणि = प्लुत flooded. मालती is जातीपुष्प (? Jasmine). मालती इव सितम्, उपमानतत्। कपालमेव कुमुदम lily-like white forehead, कर्म्मधा। मालतीसितम कपालकुमुदम्, कर्म्मधा। प्लुतम् मालतीसितकपालकुमुदम् येन, बहु। Qual. शशिधाम। The Jasmine-white moon-beams flooded his lily-like forehead.

2. अवरुद्ध ect.—मूर्ध्नि जातम् इति मूर्धन् + जन + ड कर्त्तरि भूते = मूर्द्धज hair. अव + रुध + क्त = अवरुद्ध pervaded. अवरुद्धं मूर्द्धजम् येन, बहु। तत्। Qual. शशिधाम।

3. शिरसा—करणे ३या।

4. शशिधाम – धामन् is तेजस् light. शशिनः धाम, ६तत्। तत्। Obj. of बिभ्रतम्।

5. बिभ्रतम्—भृ + शतृ = बिभ्रत् bearing. तम्। Qual. पुरुषम्।

25. Siva like Malaya mount.

बहुभिश्च बाहुभिरहीनभुजगवलयैर्विराजितम् ।
चन्दनतरुभिरिवालघुभिः प्रवलायतैर्मलयमेदिनीभृतम् ॥२५॥

Prose—अहीनभुजगवलयैः बहुभिः बाहुभिः विराजितम् (शोभितम्) (पुरुषम्) अलघुभिः प्रवलायतैः चन्दनतरुभिः विराजितम् मलयमेदिनीभृतम् इव ददृशुः (इत्यन्वयः)।

Eng.—They saw the person shining with many arms having several armlets of snakes, like the Malaya mountain shining with immense sandal trees of big sizes.

Beng.—(মহর্ষিগণ) সর্পবলয়যুক্ত বহু বাহুতে শোভিত পুরুষকে (শিবকে), বহু বৃহৎ চন্দনতরুতে শোভিত মলয় পর্ব্বতের ন্যায় দেখিতে পাইল।

Malli.—'अहीनभुजगवलयैः' अहीनाः महान्तः भुजगाः सर्पाः, त एव वलयानि कटकानि येषां तैः 'बहुभिः च' अनेकैः च 'बाहुभिः' भुजैः 'विराजितं' शोभितं अतएव 'अहीनभुजगवलयैः' बृहद्विषधरवेष्टनैः 'अलघुभिः' अनेकैः 'प्रवलायतैः' प्रवलैः बृहत्तनुभिः आयतैः दीर्घैः च [विशेषणमेतत् बाहुपक्षेपि योज्यम्। तत्र तु प्रवलैः वीर्य्यवद्भिः आयतैः दीर्घैः इत्यर्थः उन्नेयः]। चन्दनतरुभिः' मलयजवृक्षैः 'विराजित' मलयमेदिनीभृतमिव' मलयाचलमिव स्थित' (?) पुरुष' ददृशुः [इति पूर्वेणान्वयः]। अत्र मलयपदस्य श्लिष्टत्वात् श्लेषसङ्कीर्णेयमुपमा ॥२५॥

Charcha.

1. बाहुभिः—करणे ३या। Similarly parse चन्दनतरुभिः॥ चन्दनः तरुः, कर्म्मधा। Or चन्दनाख्यः तरुः, शाकपार्थिवादिवत् उत्तरपदलोपिसमासः। See below also.

2. अहीन etc.—This epithet can be taken as qualifying both बाहु and चन्दनतरु। बाहुपक्षे—अहीन is 'huge'. भुजगाः एव वलयानि,

कर्म्मधा। अहीनानि भुजगवलयानि येषाम्, बहु। तै.। Qual. बाहुभिः। तरुपक्षे—अहीन is large; वलय is वेष्टन। भुजगानां वलयानि circles of serpents, अहीनानि भुजगवलयानि यस्मिन्, बहु। Qual. चन्दनतरुभिः।

3. विराजितम्—वि+राज+क्त कर्त्तरि—विराजितः shining. तम्। Qual. both पुरुषम् and मेदिनीभृतम्। See Malli also.

4. प्रवलायतै.—प्रवलाश्चते आयताः, कर्म्मधा। तै॰। See Malli for meaning. Qual. both बाहुभिः & तरुभिः।

5 मलय etc.—मेदिनीं बिभर्त्ति इति मेदिनी+भृ+क्विप्=मेदिनीभृत् supporter of earth i. e., mountain, मलयाख्यः मेदिनीभृत्, शाकपार्थिवादितत्। or मलयः मेदिनीभृत्, कर्म्मधा। उपमान of पुरुषम्। Though generally adj. and noun enter into कर्म्मधा तत्—by "विशेषणं विशेष्येण बहुलम्", still कर्म्मधा of such विशेष्यद्वय is allowed, Cp. "कथं मेरुपर्व्वतः, कैलासाद्रिः...? बहुलवचनात् भविष्यति"—Durghata Vritti.

26. Sage's narration about Arjuna's penance.

मुनयस्ततोऽभिमुखमेत्य नयनविनिमेषनोदिताः।
पाण्डुतनयतपसा जनितं जगतामशर्म भृशमाचचक्षिरे ॥२६॥

Prak.—Easy.

Prose—ततः मुनयः अभिमुखमेत्य नयनविनिमेषनोदिताः (सन्तः) पाण्डुतनयतपसा जनितं जगताम् अशर्म्म (असुखम्) भृशम् आचचक्षिरे।

Eng.—Then the sages approached towards Siva and being urged (to speak) by the winking of his eyes, rightly narrated the difficulty caused in the world by Arjuna's penance.

Malli.—'ततः' दर्शनानन्तरं 'मुनयः' अभिमुखमेत्य, शिवस्य इति शेषः। 'नयनविनिमेषनोदिताः' नयनविनिमेषेण नेत्रसंज्ञया नोदिताः प्रेरिताः सन्तः 'पाण्डु-

तनयतपसा' पाण्डुतनयस्य अर्जुनस्य तपसा 'जनित' तत् पूर्वोक्तं 'जगताम् अशर्म' असुखम् दुःखमित्यर्थः ["शर्मशान्तसुखानि च" इत्यमरः] 'भृशं' सम्यक् 'आचचक्षिरे' कथितवन्तः ॥२६॥

Charcha

1. एत्य—आ + इ + ल्यप्। Having approached.

2. नयन etc.—वि + नि + मिष + घञ् भावे = विनिमेषः closing. नुद + णिच् + क्त कर्म्मणि = नोदित urged. नयनस्य विनिमेषः, ६तत्। तेन नोदिताः, ३तत्। Pred. to मुनयः। Siva by his नेत्रसंज्ञा exhorted the sages to speak out.

3. पाण्डुतनयतपसा—अनुक्तं कर्त्तरि ३या, अनुक्त कर्त्ता of जनितम् (जन + णिच् + क्त कर्म्मणि)।

4. आचचक्षिरे—आ + चक्ष + लिट इरे। narrated. Nom. मुनयः।

5. *Voice.*—मुनिभिः आचचक्षे &c. easy.

6. Remark—The अशर्म due to Arjuna's तपस्या was overpowering all, and making all tremble thereby—See ante.

27. *Some one's unprecedented penance is seen here.*

तरसैव कोऽपि भुवनैकपुरुष पुरुषस्तपस्यति ।
ज्योतिरमलवपुषोऽपि रवेः अभिभूय वृत्र इव भीमविग्रहः ॥२७॥

Prose—हे भुवनैकपुरुष, वृत्र इव भीमविग्रहः कोऽपि पुरुषः तरसा एव (स्वबलेनैव) अमलवपुषः रवेः ज्योतिः अभिभूय तपस्यति।

Eng.—O the great Lord of the universe, someone having a terrible frame like Vritrasura is carrying on penance here by overpowering the rays of the luminous sun by his power.

Beng.—হে পুরুষোত্তম, বৃত্রাসুরের ন্যায় ভয়ঙ্কর দেহযুক্ত কোন্ এক

ব্যক্তি, নিজবলে, উজ্জ্বলমূর্তি রবির তেজকেও পরাভূত করিয়া তপস্যাচরণ করিতেছে।

Malli.—हे 'भुवनैकपुरुष' पुरुषोत्तम, 'वृत्र.' वृत्रासुर इव 'भीमविग्रह: क: अपि' अविज्ञात: इत्यर्थ: 'पुरुष:, तरसा' बलातकारेण 'एव' ["तरसा बलरंहसी" इति विश्व:] 'अमलवपुष:' उज्ज्वलमूर्त्तेः रवे: अपि ज्योति: अभिभूय तपस्यति' तप: चरति ["कर्म्मणो रोमन्थतपोभ्यां वर्त्तिचरो:" इति क्यङ्] ॥

Charcha

1. तरसा—Acc. to some it is an अव्यय meaning 'बल' (strength, power). Here it has the sense of करण ३या। He overpowered रवितेजस् by his own power (i. e. दिव्यतेजस्)। Or—तरस् is वेग। तेन। करणे तया। करण of अभिभूय (अभि+भू+ल्यप्)।

2. भुवनैकपुरुष—भुवन world, universe. एक is श्रेष्ठ। "एकोन्य: केवले श्रेष्ठे"। एक: पुरुष:, कर्म्मधा। भुवनस्य एकपुरुष: (श्रेष्ठ पुरुष:), ६तत्। तत् सम्बुद्धौ। Addressed to Siva.

3. तपस्यति—तप: चरति इति तपस्+क्यङ्=तपस्य नामधातु+लट ति= तपस्यति is practising penance. Nom. पुरुष:। Here the word तपस् takes क्यङ् in the sense of चरण by the rule "कर्म्मणो—" (see Malli). As क्यङ् ends in ङ, so आत्मनेपद is due here by the rule "अनुदात्तङित आत्मनेपदम्" but the Vartika "तपस: परस्मैपदं च" directs परस्मैपद here is तपस्+क्यङ। So we get तपस्यति ।

4. अमलवपुष:—अमल is bright. वपुस् is body. अमलं वपु: यस्य, बहु। तस्य। Qual. रवे:। His majesty overpowered Sun's rays as well. Arjuna was black and terrible like वृत्र, still he by his divinity overpowered the pure body of the Sun.

5. भीमविग्रहः—वि + ग्रह + अप् = विग्रह body. भीम is terrible. भीमः विग्रहः यस्य, बहु। Qual. पुरुषः। Arjuna was like इव in point of his herculean (so terrible) frame.

6. *Voiee*—पुरुषेण तपस्यते etc. easy.

28. *Arrows, barks &c.—all consistent with him.*

स धनुर्महेषुधि बिभर्त्ति कवचमसिमुत्तमं जटाः।
वल्कमजिनमिति चित्रमिदं मुनिताविरोधि न च नास्य राजते ॥२८॥

Prose.—स महेषुधि धनुः, कवचम्, उत्तमम् असिं, जटाः, वल्कम्, अजिनं बिभर्त्ति इति इदं चित्रं (आश्चर्यं) भाति ; मुनिताविरोधि अस्य न राजते इति न (अपि तु राजते एव)।

Eng.—He carries a bow having a large quiver, an arrow, a good sword, matted locks, barks and skin—this is wonderful no doubt ; but everything though incompatible wit h his asceticism indeed befits him.

Malli—किञ्च 'सः' पुरुषः महान्तौ इषुधी यस्य तत् 'महेषुधि धनुः, कवचं' वर्म 'उत्तमम् असिम्' खड्गं 'जटाः, वल्कं' चीरम् 'अजिनं' चर्म 'बिभर्त्ति, इति' एवं रूपम् इदम् विरुद्धवेषधारणं (? चित्रम आश्चर्यम्)। 'मुनिताविरोधि' मुनित्वप्रतिबन्धकं तथापि 'अस्य न राजते' इति 'न च' किन्तु राजते एव इत्यर्थः। 'चित्रम्' आश्चर्यम् (?) ["सम्भाव्य निषेधनिवर्त्तने द्वौ प्रतिषेधौ" इति वामनः]॥

N. B.—Here Malli's reading is defective. 'चित्रम्' आश्चर्यम् should be after विरुद्धवेषधारणम् and not after राजते एव इत्यर्थः as is seen in several editions.

Charcha.

1. महेषुधि—इषुधि both masc. and fem. is quiver. Deriv. in XI Sl. 16, महान्तौ इषुधी यस्य, बहु। Qual. धनुः। धनुः, कवचम् &c are all obj. of बिभर्त्ति।

2. विभर्त्ति—भृ+लट ति। Bears. Nom. सः।

3. मुनिताविरोधि—मुनेः भावः इति मुनि+तल्=मुनिता asceticism. मुनितां विरुणद्धि इति मुनिता+वि+रुध+णिनि कर्त्तरि=मुनिताविरोधि that which is inconsistent with asceticism. Adj used substantively. Nom. to राजते (राज+लट ते)।

4. न, न—The two negations is for a strong affirmation doing away with all other probable negatives. See Malli also.

5. *Voice*—Easy.

29. His unparalleled penance-power.

चलनेऽवनिश्चलति तस्य करणनियमे सदिङ्मुखम्।
स्तम्भमनुभवति शान्तमरुद्ग्रहतारकागणयुतं नभस्तलम् ॥२८॥

Prak.—Easy.

Prose.—तस्य चलने अवनिः चलति, करणनियमे (इन्द्रियसंयमे) शान्तमरुद्ग्रह-तारकागणयुतं सदिङ्मुखं नभस्तलम् स्तम्भम् (निश्चलताम्) अनुभवति।

Eng.—The Earth moves with his movement, and the firmament of the sky having wind, planets and stars fixed therein and along with the quarters, attain immobility during his complete control (or withdrawal) of senses.

Beng.—অর্জ্জুনের গতিতে পৃথিবী গমনশীল হয়, এবং তদীয় ইন্দ্রিয়-রোধকালে, দিগ্‌সহ নভস্তল স্থিরভাব ধারণ করে; আর নভস্তলের বায়ু, সূর্য্যাদিগ্রহ এবং তারকগণও তখন শান্ত থাকে।

Malli.—কিঞ্চ 'तस्य' पुंसः 'चलने अवनिः' पृथिवी 'चलति' तथा 'करणनियमे' समाधिना इन्द्रियनिरोधे सति ["करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपि" इत्यमरः]

'शान्तमरुद्ग्रहतारकागणयुत' शान्तैः स्तिमितैः मरुतां वायूनां ग्रहाणां सूर्य्यादीनां तारकाणां नक्षत्रादीनां च गणैः युतं 'नभस्तलं' व्योम 'सदिङ्मुखं' दिङ्मुखसहितं 'स्तम्भ' निश्चलताम् 'अनुभवति' इत्यर्थः। अतः विश्वातिशायिनी तस्य शक्तिः उपलभ्यते इति भावः ॥२९॥

Charcha.

1. चलति—चल + लट ति। Moves on. Nom. अवनिः। So great is his तपस्तेजः that the earth (अवनिः) moves (चलति) during his movement (तस्य चलने)।

2. करणनियमे—करण (कृ + ल्युट करणे) = senses. नि + यम + अप् = नियमः control (निरोध); करणानां नियमः, ६तत्। तस्मिन्। भावे ७मी। Thus करणनियमे = करणनियमे सति। Similarly parse चलने। Here करणनिरोध during समाधि is meant. When he is still, all else becomes fixed.

3. सदिङ्मुखम्—दिश् quarter. दिशां मुखानि points of quarters. तैः सह वर्त्तमानम् इति तुल्ययोगे बहु—by the rule "तेन सहेति तुल्ययोगे"। सहदिङ्मुखम् is also correct by the rule "वोपसर्जनस्य"। Qual. नभस्तलम्।

4. अनुभवति—अनु + भू + लट ति। Attains. Nom. नभस्तलम्।

5. शान्त etc.—यु + क्त कर्म्मणि युत mixed, united. शम + क्त कर्त्तरि = शान्त still, fixed. ग्रह is सूर्य्यादिग्रह, तारका is stars. मरुतश्च ग्रहाश्च तारकाश्च इति द्वन्द्वः। तासां गणाः, ६तत्। शान्ताः मरुद्ग्रहतारकागणाः, कर्म्मधा। तैः युतम्, ३तत्। Qual. नभस्तलम्। Note the diff. between ग्रह and तारका as here and in "अशेषग्रहतारकासङ्कुलापि ज्योतिष्मती चन्द्रमसैव रात्रिः"—Raghu

30. He can do anything and everything.

स तदोजसा विजितसारम् अमरदितिजोपसंहितम् ।
विश्वमिदमपिदधाति पुरा किमिवास्ति यन्न सुकरं खलु तेन ॥३०॥

Anal.—Let him do his own penance, you just mind your own—स इदं विश्वं पुरा अपिदधाति [He will erelong overpower this entire world. So we cant neglect his penance. Let us know who he is and what for is he doing penance]. Gods will do the remedy. You need not bother yourself—ओजसा विजितसारम् अमरदितिजोपसंहितम् इदं पिदधाति [He has set at naught and has won the essence of the entire universe including the gods and the demons]. What do you mean ? -यत तेन सुकरं न, तत् किमिव अस्ति [In fact, there is nothing that cannot be done by him. So let us be on the look out about him].

Prose.—स ओजसा विजितसारम अमरदितिजोपसंहितम् तत् इदं विश्वं पुरा (सत्वरम्) अपिदधाति। यत् खलु तेन सुकरं न तत् किमिव अस्ति ?

Eng.—He will ere long pervade this entire universe the essence whereof is already surpassed by him by his power (of penance)—universe along with the gods and the demons. Indeed there is nothing that cannot easily be done by him.

Beng.—এই ব্যক্তি নিজক্ষমতায়, দেবদানবগণসহিত তাবৎ বিশ্ব-ব্রহ্মাণ্ডের সারভাগ জয় করিয়াছে এবং সত্বর সমস্তই আয়ত্ত করিবে। এমন জিনিষ নাই, যাহা নাকি এর কাছে সুকর নয়।

Malli—"न च एतत् उपेक्ष्यम्" इति आशयेन आह, स इति। 'सः पुमान् 'ओजसा विजितसार" निरस्तसत्त्वम् 'अमरदितिजोपसंहितम्' सुरासुरसहितं 'तत् इदं विश्वं पुरा अपिदधाति' अपिधास्यति इत्यर्थः। शीघ्रमेव हरिष्यति इति

भाव: ["निकटागामिके पुरा" इत्यमर:। "यावत् पुरानिपातयोर्लट्" इति भविष्यत्यर्थे लट्]। तथाहि 'यत्' कर्म्म 'खलु तेन' पुंसा 'न सुकर' तपसा दुष्कर' तत् 'किमिवास्ति' न किञ्चित् तेन दुष्करमस्ति इत्यर्थ:। [सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यास:] ॥३०

Charcha.

1. ओजसा—ओजस् is power i. e. तपोवीर्य्य। तेन। अनुक्ते कर्त्तरि ३या, अनुक्त कर्त्ता of विजित in विजितसारम्। So connect ओजसा with विजितसारम् and not with अपिदधाति। The universe being ओजसा विजितसार, it will be अपिहित as well.

2. विजितसारम्—सार is essence. "सारो बलेस्थिरांशे च"। वि+जि+क्त कर्म्मणि=विजित conquered. विजित: सार: यस्य, बहु। Qual. विश्वम्। The essence of the विश्व is won by his penance.

3. अमर etc.—उप+सम्+धा+क्त=उपसंहित वा उपसहित along with. The म of सम् elides optionally when तत or हित follows by the Varttika "समो वा ततहितयो:"। दितिज is demon. अमर is god. अमराश्च दितिजाश्च, अमरदितिजम्, समाहार द्वन्द्व by the rule "येषाञ्च विरोध: शाश्वतिक:"। Or better say that समाहार here does not apply, for in this particular instance विरोध is not meant. And by इतरेतर समास we get अमरदितिजा:। तै: उपसंहित:, ३तत्। Qual. विश्वम्।

4. अपिदधाति—अपि+धा+लटति। Shall cover or conquer. Nom. स:। Here भविष्यति लट् is used in connection with the अव्यय word पुरा। For rules see Mall

5. खलु—An अव्यय here indicating certainty (निश्चय)।

6. सुकरम्—सु+कृ+खल् कर्म्मणि=सुकरम् easily to be done. Pred, to यत्। The अनुक्त कर्त्ता is तेन here; and it cannot take

षष्ठी in connection with कृत् in सुकर, for the कृत् here is खल् which prohibits कृद्योगे षष्ठी by the rule "न लोकाव्ययनिष्ठाखलर्थतृनाम्" ।

7. *Voice.*—तेन अपिधीयते...केन भूयते येन सुकरेण न भूयते... ।

31. And we cant stand his powers.

विजिगीषते यदि जगन्ति युगपदथ सञ्जिहीर्षति ।
प्राप्तुमभवमभिवाञ्छति वा वयमस्य नो विषहितुं क्षमा रुचः ॥३१॥

N. B.—If you say, let him conquer all, then we answer वयमस्य...न क्षमाः ।

Prose.—स जगन्ति युगपत् विजिगीषते, यदि (वा) अथ सञ्जिहीर्षति वा, अभवम् (मोक्षम्) प्राप्तुम् अभिवाञ्छति वा (इति न विद्मः) ; (किन्तु) वयम् अस्य रुचः विषहितुं न क्षमाः ।

Eng.—(We do not know) whether he wishes to conquer all the world at a time, or tries to destroy these or wishes to attain to liberation ; (anyhow) we can not tolerate his powers.

Beng.—এই সমস্ত জগৎ একসঙ্গে জয় করিতে বা সংহার করিতে ইচ্ছা করিতেছে বা মোক্ষ পাইতে ইচ্ছা করিতেছে—এ জানি না ; কিন্তু আমরা এর তপোবীর্য্য সহিতে পারিতেছি না ।

Malli.—"न च एतत् अन्यफलकं तपः" इति आह विजिगीषते इति । स पुरुषः 'जगन्ति' भुवनानि 'युगपत् विजिगीषते यदि' विजेतुमिच्छति वा ["पूर्ववत् सन." इति आत्मनेपदम्] 'अथ' युगपत् 'सञ्जिहीर्षति' संहर्तुमिच्छति वा । 'अभवम्' अपवर्गं 'प्राप्तुम् अभिवाञ्छति वा'—न विद्मः, इति शेषः । किन्तु 'वयम्' अपि 'अस्य रुचः तेजांसि 'विषसितु'' सोढम् ["तीषसहलुभरुषरिषः" इति विकल्पात् इड गमः] 'न क्षमाः' न शक्ताः । [केचित् "रुचः कामितानि विषहितुम् अवधारयितुम्" इति व्याचक्षते । तत्र सहेः अवधारणार्थे तात्पर्य्यम्] ॥

Charcha.

1. विजिगीषते—वि+जि+सन्+लट्, ते। Wishes to conquer. Nom. सः। वि+जि is आत्मनेपदी by "विपराभ्यां जेः", so विजि in सन् will also be आत्मनेपदी by the rule "पूर्ववत् सनः" ॥ यदि has the sense of "वा" here.

2. सञ्जिहीर्षति—संहर्त्तुमिच्छति इति सम्+हृ+सन्+लटति। Wishes to destroy. Nom. सः।

3. अभवम्—भवतीति भू+अच् कर्त्तरि=भवः birth. This is Kasika's deriv. of भव। Madhava derives as भू+घ करणे=भवः birth. न भवः अभवः liberation. नञ्तत्। तम्; obj. of प्राप्तुम् (प्र+आप+तुमुन्)।

4. अभिवाञ्छति—अभि+वाञ्छ+लटति। Nom. सः।

5. विषहितुम—वि+सह+तुमुन्। विसोढुम् is also correct here. See Malli for rule. The base रुच् is fem. meaning तेजस्। ताः,—obj. of विषसितुम्।

6. क्षमाः—क्षमन्ते इति क्षम+अच् कर्त्तरि=क्षमाः। Pred. to वयम्।

7. *Voice*—अनेन विजिगीष्यन्ते सञ्जिहीर्ष्यन्ते......अभवः अभिवाञ्छ्यते...... अस्माभिः क्षमैः भूयते...।

32. So please don't overlook his तपस्या।

किमुपेक्षसे कथय नाथ न तव विदितं न किञ्चन ।
त्रातुमलमभयदार्हसि नः त्वयि मास्म शासति भवत् पराभवः ॥३२॥

Anal.—Easy.

Prose.—हे नाथ, किम् उपेक्षसे कथय। तव किञ्चन न विदितम् (इति) न। हे अभयद, नः अलं (शक्त्या) त्रातुम् अर्हसि। त्वयि शासति (सति) पराभवः मा स्म भवत् (न भवतु इत्यर्थः)।

Eng.—O Lord, Say why do you overloo k this. It is not that you are unaware of anything. O the giver of assurance, let there be no molestation while you are protecting all.

Beng.—হে নাথ, আপনি কেন এটী উপেক্ষা করিতেছেন, বলুন। আপনি যে জানেন না ইহা ও নয়। হে অভয়দ, আমাদের নিজশক্তিতে আপনি ত্রাণ করুণ। আপনি শাসন করিতে থাকিলে আমাদের যেন পরাভব না হয়।

Malli.—हे 'नाथ ! किम्' किमर्थम् 'उपेक्षसे, कथय' त्वम् इति शेषः। 'तव न विदित' त्वया अज्ञायमानम् इत्यर्थः ["क्तस्य च वर्त्तमाने" इति षष्ठी] 'न किञ्चन' किमपि न। हे 'अभयद, नः' अस्मान् 'अल' त्रातुम् अर्हसि'। 'त्वयि शासति' सति 'पराभवः मा स्म भवत्' माभूत् ["स्मोत्तरे लङ् च" इति लङ्] ॥ ३२ ॥

Charcha.

1. उपेक्षसे—उप+ ईक्ष+लट से। Do overlook. Nom. त्वम्। Here किम् (the अव्यय) implies interrogation.

2. कथय—कथ+णिच् (चुरादि) +लोट हि। Nom. त्वम्।

3. न, न—See Sl. 28. These imply a strong affirmation.

4. विदितम्—विद+क्त कर्म्मणि वर्त्तमाने=विदितम् is known. Agrees with उक्तकर्म्म—किञ्चन here. The अनुक्त कर्त्ता takes षष्ठी here by the rule "क्तस्य च वर्त्तमाने"। And विद being बुद्ध्यर्थ takes वर्त्तमाने क्त by the rule "मतिबुद्धिपूजार्थेभ्यश्च"।

5. अलम्—This अव्यय implies शक्ति here. Has the sense of করণ হয়া here. "अलम् भूषणपर्य्याप्ति शक्तिवारणवाचकम्" ॥ अर्ह+लटसि= अर्हसि Do behove. Nom. त्वम्।

6. त्वयि—भावे ७मी ॥ शास्+(लट) शतृ=शासत् ruling. तस्मिन्। Pred. to त्वयि।

7. भवतु—भू+लङ् ट। Let be. Nom. पराभव: (meaning आक्रमणम्)। Here लोडर्थे लुङ् is due in connection with माङ् by the rule "माङि लुङ्", but as स्म follows मा, so again we get optionally लङ् as well in such cases by the rule "स्मोत्तरे लङ् च"। Lastly अडागम of लुङ् etc. is prohibited in connection with माङ् by the rule "न माङ्योगे"।

8. *Voice.*—त्वया उपेक्ष्यते कथ्यताम etc. easy.

33. *Siva speaks out.*

इति गां विधाय विरतेषु मुनिषु वचनं समाददे।
भिन्नजलधिजलनादगुरु ध्वनयन् दिशां विवरमन्धकान्तक: ॥३३॥

Prose.—इति गाम् (वाचं) विधाय मुनिषु विरतेषु (सत्सु) अन्धकान्तक: (शिव:) भिन्नजलधिजलनादगुरु (यथा तथा) दिशां विवरं ध्वनयन् वचनं समाददे (उदाजहार)।

Eng.—The sages having stopped after saying this word, Siva uttered the following speech by resounding the interspaces of quarters, with a rumbling like that of disturbed sea-water.

Malli.—'इति' इमं 'गां' वाचं 'विधाय' अभिधाय इत्यर्थ:। [सामान्यस्य विशेषपर्य्यवसानात्] 'मुनिषु विरतेषु' तूष्णीम्भूतेषु सत्सु 'अन्धकान्तक:' शिव: 'भिन्नजलधिजलनादगुरु' भिन्नस्य उद्वेलस्य 'जलधे:' जलस्य नादम् इव गुरु गम्भीरं यथा तथा 'दिशां विवरम्' अन्तरालं 'ध्वनयन् वचनं समाददे' स्वीचकार उवाच इत्यर्थ: ॥

Charcha.

1. विधाय—वि+धा+ल्यप्। Here विधाय having a general sense (सामान्यार्थ) of 'doing', ends in the particular meaning (विशेष) e. g. अभिधाय। So Malli says "सामान्यस्य विशेषपर्य्यवसानात्"।

2. सुनिषु—भावे ७मी by the rule "यस्य च भावेन भावलक्षणम्"।

3. समाददे—सम्+आ+दा+लिट ए। Said. Nom. अन्धकान्तकः॥

4 भिन्न &c.—See Malli for samasa. भिन्नः (उद्वेलः) जलधिः, कर्म्मधा। तस्य जलम्। तस्य नादः। स इव गुरु। तत् यथा तथा; Adv. Qual. ध्वनयन्।

5. अन्धकान्तकः—अन्ति+ण्वुल्=अन्तकः destroyer. अन्धक is the name of a demon. तस्य अन्तकः, शेष षष्ठीतत्। Refers to Siva.

34. Siva says that he is Vishnu's incarnation.

वदरीतपोवननिवासनिरतमवगात मा अन्यथा।
धातुरुदयनिभनेजगतां नरमंशमादिपुरुषस्य गां गतम् ॥३४॥

Prak.—Easy.

Prose.—वदरीतपोवननिवासनिरतं गां (भुवम्) गतम् (आगतम् एतम्), जगताम् उदयनिधने धातुः (विधातुः) आदिपुरुषस्य अंशम् नरम् अवगात (जानीत), अन्यथा मा अवगात।

Eng.—Know this one that is come to this world and is engaged in penance in Vadarıkasrama, as the human incarnation of the Supreme one, the doer of creation and destruction ; don't take him otherwise.

Beng.—বদরিকাশ্রমে তপস্যারত, ভুবনাগত একে, জগতের প্রলয় ও সৃষ্টির বিধায়ক আদিপুরুষ নারায়ণের অংশ বলিয়া জানিবে; একে অন্যভাবে ধরিও না।

Malli.—'वदरीतपोवननिवासनिरतं' वदरीतपोवने वदरिकाश्रमे निवासनिरतं नित्यनिवासिनं 'गां गतम्' भुवम् अवतीर्णम् 'जगताम् उदयनिधने' सृष्टिसंहारौ 'धातुः' तयोः कर्त्तुः इत्यर्थः ["तृन्" इति दधातेः तृन् प्रत्ययः। अतएव "न

लोकाव्यय—" इत्यादिना कर्म्मणि षष्ठीप्रतिषेधः] 'आदिपुरुषस्य' विष्णोः 'अंशम्' अंशभूतम् 'नरम्' नरसंज्ञकम् इत्यर्थः। यः नारायणसखः इति भावः। 'अन्यथा' वैपरीत्येन एनं 'मा अवगात' मनुष्यमात्रं मा जानीत इत्यर्थः ["इणो गालुङि" इति गादेशः] ॥ ३४ ॥

Charcha.

1. वदरी &c.—निवासे निरतः, सहसुपा। वदरीनामकं तपोवनम् इति वदरीतपोवनम्; तत्र निवासनिरतः for समास &c. see also *Malli.* तपसो वनम् इति तपोवनम्, अश्वघासादिवत् तादर्थ्ये षष्ठीतत। Or—तपःसाधनम् वनम् इति शाकपार्थिवादितत्। Qual. एतम् understood see Prose.

2. गाम्—It here means पृथिवी। Obj. of गतम्। Note its meaning in sl. 33. Cp.—"स्वर्गेषु पशुवाग्वज्रदिङ्नेत्रघृणिभूजलेलक्ष्यदृष्ट्यां स्त्रियां पुंसि गौः"।

3. अवगात—अव+इ+लुङ् त। Do know. Nom. यूयम् understood. In लुङ् of इ, गा is ordered—yielding अगात्, अगाताम्, अगुः &c. Here लोडर्थे लुङ् comes in connection with माङ् by the rule "माङिलुङ्"। Then अडागम of लुङ् is prohibited in connection with माङ् by the rule "न माङ्योगे"।

4. उदयनिधने—उद्+इ+अच् भावे=उदय here creation. निधन is destruction. उदयश्च निधनञ्च उदयनिधने, द्वन्द्वे। ते। Obj. of धातुः। धा+तृन्=धाता doer. तस्य। Qual. आदिपुरुषस्य। As धाता has तृन्, so उदयनिधने takes २या & not षष्ठी by the rule "न लोकाव्यय—"। See Malli. also.

5. अंशम्—Qual. नरम् (which again is Pred. to एतम् understood).

35. His penance is for extinction of powerful enemies.

द्विषतः परासिसिषुरेषः सकलभुवनाभितापिनः ।
क्रान्तकुलिशकरवीर्य्यबलान् मदुपासनं विहितवान् महत्तपः ॥ ३५

Prak—एषः मदुपासनं महत्तपः विहितवान् [He has done great penance in the shape of worshipping me]. Why has he done so ?—द्विषतः परासिसिषुः एषः [For he is eager to root out his enemies] Then let him war against the enemies ?—सकलभुवनाभितापिनः द्विषतः [But the enemies has already agitated the entire world. They do not care for ordinary warfare]. Then, I see they are powerful enemies—क्रान्तकुलिशकरवीर्य्यबलान् [They have surpassed the power and army-strength of Indra even. So they are very strong antagonists. These can not be defeated but by god's grace to be gained by तपस्। So he is practising penance].

Prose.—एषः सकलभुवनाभितापिनः क्रान्तकुलिशकरवीर्य्यबलान् द्विषतः परासिसिषुः मदुपासनं (मदाराधनरूपं) महत् तपः विहितवान् ।

Eng.—This one being desirous of ousting enemies that have oppressed the entire world and that have surpassed the power and army-strength of Indra even, has done great penance in the form of my worship.

Beng.—এ ব্যক্তি, সকল পৃথিবীর অভিতাপক, ইন্দ্র ও তদীয় সৈন্য হইতেও সমধিক বলবীর্য্যশালী শত্রুদের নিরাস করিতে ইচ্ছুক হইয়া আমার আরাধনারূপ কঠোর তপস্যা করিয়াছে।

Malli.—অথ तस्य तपसः निमित्तमाह—द्विषतः इति । 'एषः' नरः 'सकलभुवनाभितापिनः' सकलभुवनानि अभितापयन्ति अभीक्ष्णम् इति तथोक्तान् ['बहुल-

माभीक्ष्ण्ये" इति णिनिः] 'क्रान्तकुलिशकरवीर्य्यबलान्' क्रान्ते आक्रान्ते कुलिशकरस्य इन्द्रस्य वीर्य्यबले शक्तिसैन्ये यैः तान् 'द्विषतः' शत्रून् 'परासिसिषुः' परासितुम् इच्छुः [अस्यतेः सन्नन्तात् उप्रत्ययः] 'मदुपासन" मदाराधनम् [करणे ल्युट्] 'महत् तपः विहितवान्'। अत्र निमित्त' शत्रुक्षयः एव इति ॥३५॥

Charcha.

1. परासिसिषुः—परा + अस क्षेपे दिवादि + सन् + उ = परासिसिषुः wishing to throw out (i. e., oust). Qual. एषः। Here उ after सन्नन्त—अस् comes by the rule "सनाशंस भिक्षउः"।

2. द्विषतः—द्विष + शतृ = द्विषन् enemy, by the rule "द्विषोमित्रे"। तान्। Obj. of परासिसिषुः।

3 सकलभुवन etc.—भुवन is भुवनस्य जन। सकलम् भुवनम्, कर्म्मधा। तानि अभितापयन्ति इति अभिभापयतेः णिनिः। See Malli. for rules here. Qual. द्विषतः।

4. क्रान्त etc.—क्रम + क्त कर्त्तरि = क्रान्त surpassed. कुलिश is वज्र thunderbolt. कुलिशं करोति इति कुलिश + कृ + ट कर्त्तरि ताच्छील्ये = कुलिशकरः the wielder of thunderbolt i. e. a name of Indra. वीर्य्य is strength. बल is army (i. e. army strength). वीर्य्यं च बलं च, द्वन्द्वः। कुलिशकरस्य वीर्य्यबले, ६तत्। क्रान्ते कुलिशकरवीर्य्यबले यैः बहु। तान्। Qual. द्विषतः। Destruction of such enemy is done by God's grace only and thus god's grace is to be won by तपस्या।

5. मदुपासनम्—Qual. तपः।

6. विहितवान्—वि + धा + क्तवतु। Did. Nom. एषः।

36. He is become man to destroy enemies.

अयमच्युतश्च वचनेन सरसिरुहजन्मनः प्रजाः।
पातुमसुरनिधनेन विभू भुवमभ्युपेत्य मनुजेषु तिष्ठतः ॥३६॥

Prose.—अयं अच्युतः (कृष्णः) च इति विभू (एतौ द्वौ) सरसिरुहजन्मनः वचनेन प्रजाः असुरनिधनेन पातुम् भुवमभ्युपेत्य मनुजेषु तिष्ठतः ।

Eng.—The two master men—this one and Achyuta,—have come among men to protect subjects by killing the demons at the instance of Brahma.

Mall.—अथ अस्य मानुषावतारे कारणमाह, अयमिति । 'विभू' प्रभू 'अय'' नरः 'अच्युतः' कृष्णः 'च', सरसिरुहजन्मनः' ब्रह्मणः 'वचनेन प्रार्थनया 'असुरनिधनेन' असुराणां निधनेन मारणेन करणेन 'प्रजाः पातुम्' रक्षितुम् 'भुवम् अभ्युपेत्य मनुजेषु तिष्ठत.' । वस्तुतस्तु साक्षात् नरनारायणौ एतौ कृष्णार्जुनौ इत्यर्थः ॥ ३६ ॥

Charcha

1. अयम्—Refers to अर्जुन । अच्युतः—Refers to कृष्ण । These take ऊह्य इति शब्दयोगे १मा । See Prose

2 वचनेन—हेतौ ३या ।

3. सरसिरुहजन्मनः—सरसि रुहतीति सरस् + रुह + क कर्त्तरि = सरसिरुह or सरोरुहः a name of lotus. Here optional अलुक् of ७मी in सरसिरुह is by the rule "तत्पुरुषे कृति बहुलम्" । Commentators of Amara etc. derive such words in this way. सरसिरुहात् जन्म यस्य स सरसिरुहजन्मा, व्यधिकरण बहु—by "अवर्ज्यो हि बहुव्रीहि र्व्यधिकरणः जन्माद्युत्तरपदः" । सरसिजन्मा is a name of ब्रह्मा, for he sprang from the lotus on the navel of Vishnu. तस्य ; शेषे षष्ठी, related to वचनेन । Don't say—रोहति इति रुहः । सरसि रुह. इति सरसिरुहः । For then its other forms सरोरुह cannot be defended. सरसिरुह being a संज्ञा of lotus, no other form can be got here owing to the rule "हलदन्तात् सप्तम्याः संज्ञायाम्" ।

4. असुरनिधनेन—Samasa in Malli. करणे ३या । करण of पातुम् ।

5. तिष्ठतः—स्था + लट तस्। Nom. विभू (dual. of the base विभु)।

6. अभ्युपेत्य—अभि + उप + आ + इ + ल्यप्।

37. *Some demon now attacks him so I go there.*

सुरकृत्यमेतदवगम्य निपुणमिति मूकदानवः।
हन्तुमभिपतति पाण्डुसुतं त्वरया तदत्र सह गम्यतां मया ॥३७॥

Prose.—मूकदानवः एतत् सुरकृत्यम् (भवति) इति निपुणम् अवगम्य पाण्डुसुतं हन्तुमभिपतति ; तत मया अत्र त्वरया सह गम्यताम्।

Eng.—A demon named Muka having well ascertained all this as the doing of the God, is approaching there to kill Pandu's son, Arjuna. So let me go there with haste.

Malli—अथ अस्य सत्त्वसम्पदं प्रकाशयितुमाह, सुरेति। 'मूकदानवः' मूकाख्यः कश्चित् असुरः 'एतत्' पाण्डवकृत्यं 'सुरकृत्यं' इति निपुणम् 'अवगम्य' साधु-निश्चित्य 'पाण्डुसुतम्' अर्जुनं 'हन्तुमभिपतति ; तत, तस्मात् कारणात् 'अत्र' अर्जुनाश्रमे विषये आश्रमं प्रति इत्यर्थः 'मया त्वरया सह गम्यताम्' द्रष्टुम् इति शेषः ॥ ३७ ॥

Charcha.

1. सुरकृत्यम्—कृ + क्यप् भावे = कृत्यम् doing. सुर is God. सुरस्य कृत्यम्, ६तत्। Pred. to एतत ॥ एतत् refers to the तपस्याकरण of अर्जुन। The demon took this तपस्याचरण as the doing of a God to destroy the demons ; so he was going to attack Arjuna.

2. निपुणम्—Adv. Qual. अवगम्य (अव + गम् + ल्यप्)।

3. मूकदानवः—मूकाख्यः दानवः, शाकपार्थिवादिवत्।

4. अभिपतति—अभि + पत + लट ति। Approaches. Nom. मूकदानवः।

5. त्वरया—त्वरा is haste. तृया। सहशब्दयोगे तृया।

6. गम्यताम्—गम् + लोट ताम् भावे। अनुक्त कर्त्ता is मया। Here गम is used as अकर्मक।

7. *Voice.*—दानवेन पत्यते...अहं गच्छामि etc. easy.

38. The demon wishes to conquer him in the guise of a boar

विवरेऽपि नैनमनिगूढम् अभिभवितुमेष पारयन् ।
पापनिरतिरविशङ्कितया विजयं व्यवस्यति वराहमायया ॥३८॥

Prak.—एष. विजयं व्यवस्यति [He wishes victory over Arjuna]. What did he do then ?—वराहमायया विजयं व्यवस्यति [He to gain victory over Arjuna took the guise of a boar]. Why did the demon adopt this deception ?—विवरेऽपि एनम् अनिगूढम् अभिभवितुम् न पारयन् [Arjuna was by तपस्या now a powerful one ; so the demon could not openly attack him even during his inattentiveness]. He is a mean coward then—पापनिरतिः एषः [Yes, he does so, for he is ever engrossed in sinful acts]. But I think he incurs danger even in his attack under the guise of a boar—अविशङ्कितया वराहमायया [If he goes to Arjuna as a boar then the latter will not apprehend danger therefrom. Gaining this confidence of Arjuna, the demon in the shape of a boar will suddenly attack and conquer Arjuna. Such is his sinister motive].

Prose.—पापनिरतिः एषः विवरेऽपि (रन्ध्रेऽपि) एनं अनिगूढम् (प्रकाशम्) अभिभवितुम् न पारयन् अविशङ्कितया वराहमायया विजयं व्यवस्यति।

Eng.—This demon ever engrossed in sin, being unable to attack him openly though there was chance enough,

wished victory in the guise of a boar wherefrom there was no apprehension.

Beng.—পাপমতি এই দানব, অর্জ্জুন একা থাকা সত্ত্বেও একে প্রকাশ্য ভাবে আক্রমণ করিতে না পারিয়া, শঙ্কাকারণশূন্য বরাহরূপ ধরিয়া বিজয়ের চেষ্টা করিতেছে।

Malli.—'पापनिरतिः' पापे निरतिः अभिप्रीतिः यस्य सः 'एषः' दानवः 'विवरे' रन्ध्रे 'अपि' एकान्तेऽपि इत्यर्थः 'एनं' पाण्डवम् 'अनिगूढं' प्रकाशं स्पष्टं यथा तथा 'अभिभवितुम्' न 'पारयन्' न शक्नुवन् 'अविशङ्कितया' स्वरूपगूहनात् निःशङ्कितया ["नञ्" इति नञ् समासः] 'वराहमायया' वराहभूमिकया 'विजयं' व्यवस्यति' विजयं प्रति उद्युक्तः इत्यर्थः ॥ ३८ ॥

Charcha

1. विवरे—विवर is loop-hole here. The loop-hole was in his inattentiveness as also in his being alone there. So Malli says "एकान्तेऽपि"। भावे ७मी by the rule "यस्य च भावेन भावलक्षणम्"।

2. अनिगूढम्—नि + गुह + क्त कर्त्तरि = निगूढ well concealed. न निगूढम्, openly, नञ्तत्। तत् यथा तथा। Adv. Qual. अभिभवितुम।

3. एनम्—Refers to पाण्डुसुतम्। अन्वादेशे एतत् शब्द स्थाने एनादेशः। Obj. of अभिभवितुम् (अभि + भू + तुमुन्)।

4. पारयन्—पृ + णिच् + शतृ। Being able. Qual. एषः।

5. पापनिरतिः—नि + रम + क्तिन् = निरतिः attachment, tendency. पापा (पापयुक्ता) निरतिः यस्य, बहु। Or—पापे निरतिः यस्य इति व्यधिकरण बहु। Qual एषः।

6. अविशङ्कितया—वि + शङ्क + क्त नपुंसके भावे = विशङ्कितम् true fear. So वि is intensive. अविद्यमानं विशङ्कितम् यस्याम्, बहु—by the Varttika "नञोऽस्त्यर्थानां बहुव्रीहिर्वाचोत्तरपदलोपश्च वक्तव्यः"। तया। Qual.

वराहमायया। As Arjuna will suspect no apprehension in वराहमाया, so it is termed as अविशङ्किता।

7. व्यवस्यति—वि + अव + सो + लट ति। Tries. Nom. एषः।

8. वराहमायया—मय is a name of a demon. तस्य इयम् इति मय + अण् = माया deception ; guise (here). वराहस्य माया ; ६तत्। तया। करणे ३या।

9. *Voice*—एतेन विजयः व्यवसीयते &c. Easy.

39. *Let me strike the boar, but Arjuna will dispute this.*

निहते विडम्बितकिरातनृपतिवपुषा रिपौ मया !
मुक्तनिशितविशिखः प्रसभं मृगयाविवादमयमाचरिष्यति ॥३८॥

Prose—विडम्बितकिरातनृपतिवपुषा मया निहते रिपौ मुक्तनिशितविशिखः अयं (पाण्डवः) प्रसभं (बलात्) मृगयाविवादम् आचरिष्यति।

Eng.—This one (Arjuna) having struck his keen arrow on this demon enemy, already killed by me after having imitated the guise of a Kirata king, will forcibly pick a quarrel (with me) with respect to this animal-killing.

Beng.—কিরাত নৃপতির বেশ অনুকরণ করিয়া আমি বরাহশত্রুকে মারিলে, অর্জ্জুন তার উপর তদীয় তীক্ষবাণ নিক্ষেপ করিয়া আমার সহিত মৃগপ্রহার লইয়া অনর্থক কলহাচরণ করিবে।

Malli—ततः किं भविष्यति—इत्यत आह, निहते इति। 'विडम्बितकिरातनृपतिवपुषा' विडम्बितम् अनुकृतं किरातनृपतिवपुः येन तेन तद्रूपधारिणा इत्यर्थः 'मया निहते रिपौ' वराहे विषये 'मुक्तनिशितविशिखः' सन् 'अयं' पाण्डवः 'प्रसभं' 'मृगयाविवादं' मृगप्रहारकलहम् 'आचरिष्यति' करिष्यति। मत्प्रहृतं मृगं प्रहृत्य स्वयम् अहम् एव प्रहर्त्ता इति कलहयिष्यते इत्यर्थः॥

Charcha.

1. विड़म्बित &c.—वि + डम्ब + णिच् + क्त कर्म्मणि = विड़म्बित imitated, worn. किरातस्य नृपतिः, ६तत्। तस्य वपुः, ६तत्। विड़म्बितं किरातनृपतिवपुः येन, बहु। तेन। Qual. मया (which is अनुक्तकर्त्ता of निहते)। Siva says that he will kill the demon-boar in the guise of a किरात-नृपतिः, and Arjuna also striking it will dispute with him about this killing of demon-boar.

2. रिपौ—रिपु is the वराहरूपशत्रु। तस्मिन्। विषयाधिकरणे ७मी।

3. मुक्त etc.—नि + शो + क्त = निशित keen. विशिख is arrow. निशितः विशिखः कर्म्मधा। मुक्तः निशितविशिखः येन, बहु। Qual. अयम्।

4 प्रसभम्—An अव्यय (acc to some) meaning suddenly or forcibly. Adv. Qual. आचरिष्यति।

5. मृगयाविवादम्—मृग अन्वेषणे चुरादि + श भावे (यक् च) = मृगया hunting ; here killing of the animal (boar). मृगयायाम् विवादः, सुप् सुपा। Or—मृगयाविषयकः विवादः, शाकपार्थिवादितत्। तम्। Obj of आचरिष्यति (आ + चर + लृट् स्यति)।

6. *Voice*—अनेन विवादः आचरिष्यते &c. easy.

40. And now see Arjuna's pluck.

तपसा निपीड़ितकृशस्य विरहितसहायसम्पदः।
सत्त्वविहितमतुलं भुजयोः बलमस्य पश्यत मृधेधिकुप्यतः ॥४०॥

Prak—Easy.

Prose.—तपसा निपीड़ितकृशस्य (तथा) विरहितसहायसम्पदः मृधे (रणे) अधिकुप्यतः अस्य (पाण्डवस्य) सत्त्वविहितं (स्वभावकृतम्) अतुलं भुजयोः बलं पश्यत।

Eng—Now behold his natural immense strength of arms

—his who is oppressed and emaciated as well by penance, has no resource of ally and who is highly getting incensed in the tussle.

Beng.—তপঃদ্বারা পীড়িত ও কৃশ এবং সহায়সম্পদ্‌হীন এবং অধুনা যুদ্ধে অতি কুপিত পাণ্ডবের স্বাভাবিক অতুল ভুজবল দেখ।

Malli...."ततः अपि किं भावि ?"—इत्याह, तपसेति। 'तपसा' नितरां पीडितः अतएव कृशः तस्य 'निपीड़ितकृशस्य' ["पूर्व्वकाल—" इत्यादिना समासः] तथा 'विरहितसहायसम्पद.' विरहिता सहायसम्पत् यस्य तस्य एकाकिनः 'मृधे' रणे ["मृधमास्कन्दनं स'ख्यम्" इत्यमरः] 'अधिकुप्यतः' अधिकं कुप्यतः 'तस्य' पाण्डवस्य 'सत्त्वविहितं' स्वभावकृतं' स्वाभाविकमित्यर्थः ["सत्त्वोऽस्त्रीजन्तुषु क्लीवे व्यवसाये पराक्रमे। आत्मभावे पिशाचादौ द्रव्ये सत्त्वस्वभावयोः। प्राणेवस्तेऽन्तःकरणे" इति वैजयन्ती] 'अतुलं' निरुपमं 'भुजयोः' बाह्वोः 'बलं' शक्तिं 'पश्यत' ["बलं शक्तिर्बलं सैन्यम्" इति शाश्वतः] ॥ ४० ॥

Charcha.

1. तपसा—अनुक्ते कर्त्तरि ३या। Thus—तपः तं निपीड़यति becomes in voice change—तपसा सः निपीड़ितः।

2. निपीड़ितकृशस्य—नि + पीड़ + णिच् + क्त कर्म्मणि = निपीड़ित oppressed. कृश + क्त कर्त्तरि = कृश emaciated. पूर्व्वं निपीड़ितः पश्चात् कृशः इति कर्म्मधा। तस्य। Qual. अस्य।

3. विरहित etc.—सहायः एव सम्पत्, कर्म्मधा। विरहिता सहायसम्पत् यस्य, बहु। तस्य। Qual. अस्य। Though alone still he displays unprecedented pluck.

4. सत्त्वविहितम्—सत्त्व is स्वभाव (nature). See Malli. सत्त्वेन विहितम् (गठितम्) made by nature, ३तत्। Qual. बलम्।

5. पश्यत—दृश + लोट त। Do See. Nom. यूयम्।

6. अधिकुप्यतः—अधि + कुप + शतृ। becoming highly angry. तस्य। Qual. अस्य।

7. *Voice*—युष्माभिः दृश्यताम् &c. easy.

41. Siva as Kirat.

इति तानुदारमनुनीय विषमहरिचन्दनालिना।
घर्मजनितपुलकेन लसद्गजमौक्तिकावलिगुणेन वक्षसा ॥४१॥

[This sloka is completed by the last line of Sl. 43].

Prak.—शिवः रुचिरः किरातपृतनापतिः संवव्रते (Sl. 43). Why did he become so ?—इति तान् उदारम् अनुनीय शिवः [Siva thus said to the sages and then became a Kiratapati]. What kind of Kiratapati was he ?—विषमहरिचन्दनालिना वक्षसा (उपलक्षितः) शिवः [He was marked with breast having non-symmetric lines of *Harichandana* therein]. Anything else ?—घर्मजनितपुलकेन वक्षसा उपलक्षितः [His breast showed horripilation due to perspiration]. Is this all ?—लसद्गजमौक्तिकावलिगुणेन वक्षसा (उपलक्षितः) [His breast was adorned with strings of shining pearls derived from the head of the elephant.]

Prose.—इति तान् उदारम् अनुनीय (उक्त्वा) शिवः, विषमहरिचन्दनालिना घर्मजनितपुलकेन (तथा) लसद्गजमौक्तिकावलिगुणेन वक्षसा (उपलक्षितः सन्) रुचिरः किरातपृतनापतिः संवव्रते।

Eng.—Having thus said all with reasons Siva, having his breast characterised with irregular lines of Harichandana, with horripilations due to perspiration and with shining strings of pearls got from elephant's head, became a charming Lord (commander) of the Kirats.

Beng.—এইরূপ যুক্তিযুক্তভাবে তাদের বলিয়া শিব—বিকৃতভাবে বিন্যস্ত হরিচন্দনরেখায় অঙ্কিত, স্বেদজনিতরোমাঞ্চযুক্ত, এবং শোভমান গজমুক্তাহারে ভূষিত বক্ষ দ্বারা উপলক্ষিত হইয়া মনোজ্ঞ কিরাতপতি হইলেন।

Malli.—अथ त्रिभिः अस्य किरातभावं वर्णयति, इतीत्यादि। शिवः 'इति' इत्थं 'तान्' मुनीन् 'उदारं' युक्तियुक्तं यथा तथा 'अनुनीय' शिक्षयित्वा, उक्त्वा इति यावत्। "रुचिरः किरातपृतनापतिः स बभूव" (Sl. 43) इति उत्तरेणान्वयः। किरातसेनापतिवेषधारी बभूव इत्यर्थः। कथम्भूतः?—'विषमहरिचन्दनालिना' विषमा विकृतविन्यासा हरिचन्दनस्य आलयः रेखाः यस्मिन् तेन। घर्मजनितपुलकेन' घर्मेण स्वेदेन जनिताः पुलकाः रोमाञ्चा यस्मिन् तेन ["पुलकः पुनः। रोमाञ्चः कण्टको रोमविकारो रोमहर्षणम्" इति हेमचन्द्रः। "घर्मः स्यादातपे ग्रीष्मे उष्णस्वेदाम्भसोरपि" इति विश्वः]। 'लसद्गजमौक्तिकावलिगुणेन' लसन्तः शोभमानाः गजमौक्तिकानां करिकुम्भोद्भवमौक्तिकानाम् आवलयः एव गुणाः सूत्राणि यस्मिन् तेन 'वक्षसा' वक्षःस्थलेन उपलक्षितः। [करिणां मुक्तायोनित्वे प्रमाणमाह अगस्त्यः—"जीमूतकरि-मत्स्याहि-वंशशङ्खवराहजाः। शुक्त्युद्भवाश्च विज्ञेया अष्टौ मौक्तिकयोनयः]"।

Charcha.

1. इति—An अव्यय meaning 'this'. Obj. of अनुनीय।

2. उदारम्—Lit. Significantly i. e. with reasons. Adv. qual. अनुनीय।

3. अनुनीय—अनु + नी + ल्यप्। Lit having taught i. e., having said.

4. विषम etc.—हरिचन्दन is a kind of sandal (i. e. sandal paste here). विषम is misplaced here. आली वा आलि is रेखा (line). हरिचन्दस्य आलयः, ६तत्। विषमाः हरिचन्दनालयः यत्र, बहु। See Malli also. Qual. वक्षसा।

5. घर्मजनित etc.—घर्मेन जनित:, ३तत्। तादृश: पुलक: यत्र, बहु। Qual. वचसा।

6. लसत् etc.—लस+शतृ=लसत् shining. गजानां मौक्तिकम् pearl on elephant's head, ६तत्। आवलि or आवली is row. आवलय: एव गुणा:' कर्म्मधा। लसन्त: गजमौक्तिकावलिगुणा: यत्र, बहु। See Malli also. Qual. वचसा॥ वचसा has उपलक्षणे ३या॥ It is said that pearls are found in elephant's heads, in bamboo etc. See Agastya quoted by Malli.

7 *Voice.*—Easy.

42. Siva described.

वदनेन पुष्पितलतान्तनियमितविलम्बिमौलिना।
बिभ्रदरुणनयनेन रुचं शिखिपिच्छलाञ्छितकपोलभित्तिना॥४२॥

Prose.—(शिव:) पुष्पितलतान्तनियमितविलम्बिमौलिना शिखिपिच्छलाञ्छित-कपोलभित्तिना अरुणनयनेन वदनेन रुच' बिभ्रत् (किरातपृतनापति: स'वहृते)।

Eng.—Siva became a charming commander of the Kirata, bearing loveliness by his face having red eyes therein, having broad cheeks marked with peacock's feathers and having the dangling hair tied by flowery tendrils of creepers.

Beng.—বদনদ্বারা শোভা ধারণ করিয়া শিব কিরাতপতি হইলেন। বদনেতে বিকসিতলতাগ্রদ্বারা বিলম্বিকেশপাশ সংযমিত করা ছিল, তথায় প্রশস্ত গণ্ডস্থল শিখিপিচ্ছায় অঙ্কিত ছিল এবং নয়ন দুইটী রক্তবর্ণ ছিল।

Malli.—'पुष्पितलतान्तनियमितविलम्बिमौलिना' पुष्पितै: लतान्तै: विकसित-लताग्रै: नियमिता: स'यता: विलम्बिनश्च ते मौलय: स'यतकेशा: यस्य तेन ["चूड़ा किरीट' केशाश्च स'यता मौलयस्त्रय:" इत्यमर:] 'शिखिपिच्छलाञ्छिते बर्हिबर्हाङ्किते कपोलभित्ती यस्य तेन 'अरुणनयनेन' आरक्तनेत्रेण 'वदनेन रुच'' शोभां 'बिभ्रत्' ॥

Charcha.

1. वदनेन—करणे ३या।

2. पुष्पित etc.—लतान्त is tendrils of creepers. पुष्प+इतच् जातार्थे =पुष्पित blossomed. नि+यम+क्त कर्म्मणि=नियमित tied. पुष्पिताः लतान्ताः, कर्म्मधा। तेन नियमिताः, ३तत्। मौलि is locks of hair. विलम्बिनः मौलयः, कर्म्मधा। पुष्पितलतान्तनियमिताः विलम्बिमौलयः यत्र, बहु। तेन। Qual. वदनेन।

3. बिभ्रत्—भृ+शतृ=बिभ्रत् bearing. Qual. शिवः of Sl. 43.

4. अरुण etc.—अरुणं नयनं यत्र, बहु। तेन। Qual. वदनेन।

5. शिखि etc.—पिच्छ is बर्हा peacock's feather. शिखिन् is peacock. प्रशस्तः, कपोलः इति कपोलभित्तिः, कर्म्मधा (नित्य समास class) by the rule "प्रशंसावचनैश्च"। And Vardhamana says "मतल्लिकोद्घमिश्राः स्युः प्रकाण्डस्थलभित्तयः। हस्तपाशतटाः पादपालिमचर्चिकादयः", these as प्रशंसावाचक। शिखिपिच्छलाञ्छिता कपोलभित्तिः यत्र, बहु। तेन। Qual. वदनेन। This is the dress Siva assumed when he became a किरातपति।

43. Same idea.

बृहदुद्वहन् जलदनादिधनुरुपहितैकमार्गणम्।
मेघनिचय इव संववृते रुचिरः किरातपृतनापतिः शिवः॥ ४३॥

Prose—जलदनादि उपहितैकमार्गणम् बृहत् धनुः उद्वहन् (अतः) मेघनिचय इव (स्थितः) शिवः रुचिरः किरातपृतनापतिः संववृते।

Eng.—Bearing a huge bow, sounding like a cloud and having an arrow fit therein, and so appearing like a collection of cloud, Siva became a charming commander of Kiratas (i. e. Kirata legion).

Beng.—মেঘের ন্যায় শব্দায়মান আরোপিতবাণ বিশাল ধনু গ্রহণ করিয়া মেঘসংঘাতের ন্যায় স্থিত শিব এখন মনোজ্ঞ কিরাতসেনাপতির বেশ ধারণ করিলেন।

Malli-—पुनश्च—जलद: इव नदति इति 'जलदनादि' ["कर्त्तर्युपमाने" इति णिनि:] 'उपहितैकमार्गणम्' संहितैकबाणं 'बृहत् धनु: उद्वहन्' अतएव 'मेघनिचय इव' स्थित: [इति उपमा अत्र विशेषकै स्वभावोक्तिरलङ्कार: । "स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णनम्" इति लक्षणात्] ॥४३॥

Charcha.

1. उद्वहन्—उद् + वह + लट: स्थाने शतृ । Carrying. Qual. शिव: ।

2. जलदनादि—Deriv. in Malli. Qual. धनु: ।

3. उपहित etc.—मार्गण arrow. एकं मार्गणम्, कर्म्मधा । उपहितं (स्थापितं) एकमार्गणं यत्र, बहु । Qual. धनु: ।

4. मेघनिचय:—निचय is collection (समूह) । मेघस्य निचय:, ६तत् । उपमान of शिव: । White Siva huge in size and having a sounding bow resembled a collected mass of white cloud deeply rumbling.

5. संवव्रते—सम् + वृत + लिट ए । Nom. शिव: ।

6. किरात etc.—पृतना is army. किरातस्य पृतना, ६तत् । तस्या: पति:, ६तत् । Pred. to शिव: ।

7. *Remark*—The sloka may also be construed thus—शिव: जलदनादि धनु: उद्वहन् मेघनिचय: इव (स्थित:) रुचिर: किरातपृतनापति: संवव्रते । In this मेघनिचय: is उपमान of किरातपति: । Here the sense is—Siva now becoming a Kiratapati huge and black and having a hanging bow, resembled a mass of black cloud deeply rumbling. This seems to be a better construction. For black rainy clouds deeply rumble, while autumnal clouds rarely behave so.

44. Ganas turned into a kirata army.

अनुकूलमस्य च विचिन्त्य गणपतिभिरात्तविग्रहैः ।
शूलपरशुशरचापभृतैः महती वनेचरचमूर्विनिर्ममे ॥४४॥

Prose.—अस्य (शिवस्य) अनुकूलं विचिन्त्य आत्तविग्रहैः (गृहीतकिरातदेहैः) शूलपरशुशरचापभृतैः (शूलचापादिधारिभिः) गणपतिभिः महती वनेचरचमूः विनिर्म्ममे ।

Eng.—Then thinking of his (Siva's) advantages, the leaders of *Ganas* having adopted the body of kiratas and bearing shafts, axes, arrows and bows, gathered up a huge army of foresters.

Beng.—তখন শিবের সুবিধা চিন্তা করিয়া গণপতিগণ কিরাতদেহ গ্রহণ করিয়া, শূল কুঠার শর ও ধনু ধারণ করিয়া, এক বৃহৎ কিরাতসেনাদল গড়িয়া লইল ।

Malli.—'अस्य' शिवस्य 'अनुकूलं' च विचिन्त्य' प्रियं इति निश्चित्य 'आत्तविग्रहैः' गृहीतकिरातदेहैः, तथा 'शूलपरशुशरचापभृतैः' शूलानि, परशवः कुठाराः शराः चापानि च तानि भृतानि यैः तैः ["प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ" इति निष्ठायाः परनिपातः] गणपतिभिः प्रमथमुख्यैः 'महती वनेचरचमूः' सेना 'विनिर्म्ममे' निर्मिता [माङ् माने ; कर्म्मणि लिट् । "ह्रस्वः" इति अभ्यासस्य ह्रस्वत्वम्] ॥

Charcha.

1. अनुकूलम्—कूल is bank. कूलमनुगतम् इति अनुकूलम् advantageous matter. Obj. of विचिन्त्य (वि+चिन्त+णिच्+ल्यप्)। The Ganas thought out what was favourable to Siva, now in the form of a forestar-king.

2. आत्त etc.—आ+दा+क्त कर्म्मणि=आत्त or आदत्तः i. e., taken, adopted. विग्रह is body. आत्तः विग्रहः यैः, बहु। Qual. गणपतिभिः।

3. शूल etc —भृ + क्त कर्म्मणि = भृत worn. शूल is shaft. परशु is axe. चाप is bow. शूलानि च परशवः च शराश्च चापानि च, द्वन्द्व। No समाहार here. भृतानि शूलपरशुशरचापानि यैः इति शूलपरशुशरचापभृतैः bearing shaft, axes, etc. बहु। Here the निष्ठान्त word is placed last in the बहु compound by the varttika "प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ"—i.e., निष्ठान्त + सप्तम्यन्त words are placed last when those enter into a बहु— with प्रहरणार्थक words. Qual. गणपतिभिः।

4. वनेचरचमूः—चमू meaning सेना is declined like वधू। वने चरतीति वन + चर + ट कर्त्तरि = वनेचरः वा वनचरः, optional अलुक् by the rule—"तत्पुरुषे कृति बहुलम्"। वनेचरस्य चमूः, ६तत्। उक्तकर्म्म of विनिर्म्ममे।

5. विनिर्म्ममे—वि + निर् + माङ् माने + लिट ए कर्म्मणि। Was made. Nom. (अनुक्त कर्त्ता) is गणपतिभिः।

6. *Voice*—गणपतयः &c. चमूं विनिर्म्ममौ &c. easy.

45. The army sits around.

विरचय्य काननविभागम् अनुगिरमथेश्वराज्ञया।
भीमनिनदपिहितोरुभुवः परितोपदिश्य मृगयां प्रतस्थिरे ॥४५॥

Prak.—ते मृगयामपदिश्य परितः प्रतस्थिरे [They went all around under the pretext of hunting]. How did they do so ?—भीमनिनदपिहितोरुभुवः ते [They covered the grounds there with terrible tumult when going for hunting]. When did they go for hunting ?—काननविभागम् विरचय्य प्रतस्थिरे [The went out on hunting after alloting portions of forests to each of the forest-leaders there]. Did they do so of their our accord ?—अथ ईश्वराज्ञया अनुगिरम् काननविभागं विरचय्य [They did so in that moun-

tain at the express order of their lord Siva. Thus the colony of kiratas there will appear to outsiders as permanent and strong].

Prose.—अथ ईश्वराज्ञया अनुगिरम् (गिरौ) काननविभागं विरचय्य भीमनिनदपिहितोरुभुवः (ते गणपतयः) मृगयाम् अपदिश्य (व्याजीकृत्य) परितः प्रतस्थिरे ।

Eng.—Now at the order of lord (Siva), the Gana-leaders attoted divisions of forests in that mountain to themselves, and went out all around under the pretext of hunting, after having covered the grounds there with great hubbub.

Beng.—তারপর ঈশ্বর শিবের আজ্ঞায় গণপতিগণ, সেই গিরিতে নিজেদের পৃথক্ পৃথক্ স্থান বিভাগ ব্যবস্থা করিয়া, মহৎ কলকল শব্দ উত্থাপন করিয়া সমস্ত ভূমি আচ্ছাদিত করতঃ মৃগয়ার ছলে চারিদিকে বাহির হইল।

Malli.—'अथ ईश्वराज्ञया अनुगिरम्' गिरौ [विभक्त्यर्थे अव्ययीभावः । "गिरेश्च सेनकस्य" इति समासान्तः] 'काननविभागं' वनविभागं 'विरचय्य' अस्य अयम् इति देशविभागं कृत्वा इत्यर्थः । 'भीमनिनदपिहितोरुभुवः' भीमैः निनदैः कलकलैः पिहिताः उरवः भुवः यैः ते तथोक्ताः सन्तः 'मृगयाम् अपदिश्य' व्याजीकृत्य 'परितः प्रतस्थिरे' प्रस्थिताः ॥ ४५ ॥

Charcha.

1. विरचय्य—वि + रच + णिच् + ल्यप् । Having made.

2. अनुगिरम्—गिरौ इति अनुगिरम्, विभक्त्यर्थे अव्ययीभावः । Then गिर्यन्त अव्ययीभाव optionally takes समासान्त टच् by the rule "गिरेश्च सेनकस्य" ।

3. ईश्वराज्ञया—ईश्वरस्य (किरातपतिरूपस्य शिवस्य) आज्ञा, इतत् । तया । इतौ श्या ।

4. भीम etc.—अपि + धा + क्त कर्म्मणि = अपिहित वा पिहित covered. नि + नद + अप भावे = निनद sound, hubbub. नि + नद optionally takes अप् or घञ् by the rule "नौ गदनदपठस्वनः"। So निनाद is also correct here, भीमः (भीषणः) निनादः, कर्म्मधा। तेन पिहिताः, इतत्। तादृशः भुवः यैः, वहु। Or—पिहिताः उरुभुवः यैः। वहु। भीमनिनदैः पिहितोरुभुवः, सुप्सुपा। Qual. ते understood here.

5. परितः—परि + तसि स्वार्थे = परितः around. Adv. Qual. प्रतस्थिरे।

6. अपदिश्य—अप + दिश + ल्यप्। Having made the pretext.

7. मृगयाम्—Deriv. in sl. 39. obj. of प्रतस्थिरे।

8. प्रतस्थिरे—प्र + स्था + लिट इरे। Nom. ते। Here प्र + स्था takes आत्मनेपद by the rule "समवप्रविभ्यः स्थः"।

46. The mountain trembling thereby.

क्षुभिताभिनिःसृतविभिन्नशकुनिमृगयूथनिस्वनैः।
पूर्णपृथुवनगुहाविवरः सहसा भयादिव ररास भूधरः ॥ ४६ ॥

Prak.—Easy.

Prose.—क्षुभिताभिनिःसृतविभिन्नशकुनिमृगयूथनिस्वनैः पूर्णपृथु वनगुहाविवरः भूधरः (पर्व्वतः) सहसा भयात् इव ररास (चुक्रोश)।

Eng.—The mountain with its caves and woods filled with sounds of hosts of birds and animals that got frightened, came out of their abodes and were scattered as well, suddenly yelled as if through fear.

Beng.—ত্রস্ত, স্বস্থান হইতে বহিরাগত এবং ছিন্নভিন্ন পক্ষী ও পশু-সমূহের ধ্বনিতে পর্ব্বতের বৃহদ্বন ও গুহামুখ পূর্ণ হওয়ায় মনে হইল যেন পর্ব্বতটী হঠাৎ ভয়েই যেন চিৎকার করিল।

Expl.—The hosts of birds and animals there got frightened at the hunting excursion of kiratas. They thus ran hither and thither and cried out through fear. These sounds reververated in the woods and caves of the monntain there. This the poet surmises as the mountain giving out fearful shrills thereby.

Malli.—'क्षुभिताभिनिःसृतविभिन्नशकुनिमृगयूथनिस्वनैः' क्षुभिताः त्रस्ताः अभिनिःसृताः स्वस्थानात् निर्गताः विभिन्नाः मुक्तसङ्घाश्च ये शकुनयः पक्षिणः मृगाश्च तेषां यूथानि तानि, तेषां निस्वनैः 'पूर्णपृथुवनगुहाविवरः' पूर्णानि पृथूनि वनानि गुहाविवराणि च यस्य सः 'भूधरः' सहसा भयात् 'इव' [इति उत्प्रेक्षा] 'रराम' चुक्रोश [रस आक्रोशे + लिट्] ॥ ४६ ॥

Charcha.

1. क्षुभित etc.—क्षुभ + क्त कर्त्तरि = क्षुभित i. e., frightened. अभि + निस् + सृ + क्त कर्त्तरि = अभिनिःसृताः dislodged from the abodes. वि + भिद् + क्त कर्त्तरि = विभिन्न scattered from herds. See Malli also. नि + स्वन + अप्, भावे = निस्वन sound. निस्वान is also correct. (See under निनद—sl. 45). यूथ is herd. मृग is animal ; "मृगः पशौ कुरङ्गे च"। शकुनयश्च मृगाश्च, द्वन्द्व। तेषां यूथानि, ६तत्। क्षुभिताश्च ते अभिनिःसृताः, कर्म्मधा। क्षुभिताभिनिःसृतानि च विभिन्नानि, कर्म्मधा। तादृशानि शकुनिमृगयूथानि, कर्म्मधा। तेषाम् निस्वनाः, ६तत्। तैः। अनुक्ते कर्त्तरि ३या—अनुक्तकर्त्ता or पूर्ण in पूर्णपृथुवनगुहाविवरः। पूर्ण is compounded with पृथुवन etc. by "सापेक्षत्वेऽपि गमकत्वात् समासः"।

2. पूर्ण etc.—पूर + णिच् + क्त = पूर्ण वा पूरित filled. पृथूनि (महान्ति) वनानि, कर्म्मधा। गुहा is cave. विवर is mouth. गुहायाः विवरम्, ६तत्। पृथुवनानि च गुहाविवराणि च, द्वन्द्व। पूर्णानि पृथुवनगुहाविवराणि यस्य, बहु। Qual. भूधरः।

3. भयात्—हेतौ ५मी ॥ इव implies उत्प्रेक्षा (surmise) here.

4. ररास—रस+लिट् अ । Nom. भूधर: ॥ धरतीति धर: (पचाद्यच्) । भुव: धर: इति भूधर: mountain. इत्तत् । Note that भुवं धरतीति gives भूधार with कर्म्मणि उपपदे अण् ।

5. Voice—भूधरेण &c रेसे &c. easy.

47. All fly in unision.

न विरोधिनो रुषमियाय पथि मृगविहङ्गसंहतिः ।
घ्नन्ति सहजमपि भूरिभियः सममागताः सपदि वैरमापदः ॥४७॥

Prak.—विरोधिनी मृगविहङ्गसंहतिः रुषं न इयाय [Naturally antagonistic hosts of birds and beasts did not show anger on each other]. When did they do so ?—पथि रुषं न इयाय [They did not show anger during their flight]. This is strange—आपदः सहजमपि वैरं सपदि घ्नन्ति [Dangers suddenly destroy natural enmity of animals for the time being]. I can't follow you—भूरिभियः (तथा) समम् आगता आपदः वैरं घ्नन्ति [I mean that when dangers boding immense perils, appear equally to all sorts of animals, then they forget their natural enmity (as exists between lion and deer etc.) and all takes to flight through fear.].

Prose.—पथि (पलायनपथि) विरोधिनी मृगविहङ्गसंहतिः रुषं (परस्पर क्रोधं) न इयाय (प्राप); भूरिभियः (तथा) समम् आगताः आपदः सहजमपि वैरं सपदि घ्नन्ति ।

Eng.—The antagonistic hosts of birds and beasts did not feel malice against each other ; for calamities boding great danger and appearing equally to all, destroy even natural enmity for the time being.

Beng.—পলায়নকালে পরস্পব বিরোধী হরিণব্যাঘ্রাদি পশু ও পক্ষিবর্গ পরস্পরের প্রতি আক্রোশ দেখায় নাই ; কারণ বিঘ্নবহুল ও সাধারণভাবে সমাগত আপদ্ স্বাভাবিক বিরোধও তখন নষ্ট করিয়া দেয়।

Malli—'पथि' पलायनमार्गे 'विरोधिनी' जातिवैरिणी 'मृगविहङ्गसंहतिः' मृगाणां सिंहव्याघ्रादीनां विहङ्गनां काकोलूकादीनां च संहतिः सङ्घः 'रुषं' परस्परक्रोधं 'न इयाय' न प्राप, किन्तु सहैव चचार इत्यर्थः। तथाहि—'भूरिभियः' भूरिः प्रभूता भीः यासु ताः 'समं' साधारण्येन 'आगताः आपदः' विपत्तयः 'सहजं' स्वाभाविकम् 'अपि वैरं सपदि घ्नन्ति'। न हि सङ्घातव्यसनेषु प्रजायते वैरानुबन्धः इति भावः ॥ ४७ ॥

Charcha

1. विरोधिनी—विरुन्धे इति वि+रुध+णिनि कर्त्तरि=विरोधिनी naturally antagonistic. Qual मृगविहङ्गसंहतिः।

2. रुषम्—रुष+क्विप्=रुष् lit .fear, here "mutual enmity," (as exists between crow and owl, and lion and deer etc.). Obj. of इयाय।

4. पथि—It means पलायनमार्गे। अधि ७मी।

5. मृग etc.—मृग animal. विहायसा गच्छतीति विहायस्+गम+खच् =विहङ्गम or विहङ्ग (bird) by the Varttika "खच्च डिद्वा वक्तव्यः" (for खच् is regarded optionally as ड इत प्रत्यय)। विहग with ड is also correct. विहायस् also becomes विह when खच् follows by the Varttika "विहायसो विह इति वाच्यम्"। सम+हन+क्तिन्=संहतिः collection, hosts. मृगाश्च विहङ्गाश्च, द्वन्द्व। तेषां संहतिः। ६तत्। Nom. to इयाय (इ गतौ+लिट् अ)।

6. घ्नन्ति—हन धातु+लट अन्ति। Destroy. Nom. आपदः।

7. भूरिभियः—भूरि meaning 'immense' is त्रिलिङ्ग i e. विशेष्य लिङ्ग। बहुव्रीहि। See Malli. Qual. आपदः।

8. समम्—Equally. Adv. qual. आगताः ।

9. सपदि—An अव्यय meaning at that time, 'for the time being' (तत्क्षणे) ।

10. वैरम्—वीर + अण् भावे = वैरम् enmity. Obj. of घ्नन्ति । See also Canto XI for notes on वैरम् ।

11. *Voice*—सं'हत्या ईये...आगताभिः आपद्भिः &c. हन्यते... ।

48. Chamaries however hold themselves.

चमरीगणैः शिववलस्य बलवति भयेऽप्युपस्थिते ।
वंशविततिषु विषक्तपृथुप्रियवालवालधिभिराददे धृतिः ॥४८॥

Prose.—वंशविततिषु (वंशगुच्छेषु) विषक्तपृथुप्रियवालवालधिभिः चमरीगणैः शिववलस्य (सम्बन्धे) बलवति भये उपस्थिते (सति) अपि धृतिः (धैर्यम्) आददे ।

Eng.—The Chamari deers with their huge tails having favourite hairs therein stuck to stumps of bamboos, attained patience though there was cause of great fright from the army of Siva.

Beng.—চমরীগণের সুন্দররোমযুক্ত বিশাল পুচ্ছ বেণুগুল্মে লগ্ন হওয়ায়, শিবের সৈন্য হইতে অতীব ভয়ের কারণ থাকা সত্ত্বেও, ধৈর্য্য ধরিল (ও দাঁড়াইল) ।

Malli.—'वंशविततिषु' वेणुगुल्मेषु 'विषक्तपृथुप्रियवालवालधिभिः' विषक्ताः लग्नाः पृथवः भृशं प्रियवालाः प्रियरोमाणः वालधयः पुच्छानि येषां तैः ["पुच्छोऽस्त्री लोमलाङ्गूले वालहस्तश्च वालधिः" इत्यमरः] 'चमरीगणैः', मृगविशेषैः 'शिववलस्य' गणवलस्य सम्बन्धिनि, तद्धेतुके इत्यर्थः [सम्बन्धमात्रविवक्षया षष्ठी । अन्यथा "भीत्रार्थानां भयहेतुः" इति पञ्चमी स्यात्] 'बलवति' प्रबले 'भये उपस्थिते' प्राप्ते

'अपि धृति:' धैर्य्यम् 'आददे' स्वीकृता। वालच्छेदभयात् प्राणहानिम् अपि अवगणय्य स्थितम् इत्यर्थ: ॥ ४८ ॥

Charcha.

1. चमरीगणै:—चमरी is a kind of deer famous for its hair on tails. चमरीणां गणा:, ६तत्। तै:। अनुक्ते कर्त्तरि ३या।

2. शिववलस्य—वल army. शिवस्य वलम्, ६तत्। तस्य। सम्बन्ध विवक्षया षष्ठी। See Malli. This refers to the army gatherered up by the प्रमथगण।

3. भये—भी + अच् भावे = भयम् fear. तस्मिन्। भावे ७मी।

4. वंशविततिषु—वंश bamboo. वि + तन + क्तिन् भावे – वितति stump (गुच्छ); वंशानां वितति:, ६तत्। तासु। अधि' ७मी। Here वंशवितति means विततवंश by the maxim "भावानयने द्रव्यानयनम्।"

5. विषक्त etc.—वि + सञ्ज + क्त कर्त्तरि = विषक्त stuck (लग्न)। प्रिया: वाला: (केशा:) यस्मिन् इति प्रियवाला: where the hair was favourite, बहु। वाल + धा + कि अधिकरणे = वालधि: tail. प्रियवाला: वालधय:, tails having favourite hair, कर्म्मधा। पृथव: प्रियवालवालधय:, कर्म्मधा। विषक्ता: पृथुप्रियवालवालधय: येषाम्, बहु। तै:। Qual. चमरीगणै:। The Chamaris during fright had got their tails having good hairs, stuck in stumps of bamboos; so great is their attraction for hairs on tails, that then they did not move but stood patiently. Better shall they die than live without having tails. Comp. "वालच्छेदभयात्......स्थितम्"—Malli.

6. आददे—आ + दा + लिट ए। Accepted; nom. चमरीगणै:। "आङोदोनास्यविहरणे" इति आत्मनेपदम्।

7. *Voice*—चमरीगणा: etc. धृतिमाददे etc. easy.

49. The lions look benignly at Siva's army.

हरसैनिकाः प्रतिभयेऽपि गजमदसुगन्धिकेशरैः ।
स्वस्थमभिददृशिरे सहसा प्रतिबोधजृम्भितमुखैर्मृगाधिपैः ॥ ४९॥

Psose.—प्रतिभये (उपस्थिते) अपि गजमदसुगन्धिकेशरैः सहसा प्रतिबोधजृम्भितमुखैः (निद्राभङ्गेन व्यात्तमुखैः) मृगाधिपैः हरसैनिकाः स्वस्थम् अभिददृशिरे ।

Eng—In spite of cause of fright, the king of beasts (i. e., lions) having their manes fragrant with elephant's ichor and yawning at this sudden break of sleep, looked comfortably to the army of Siva.

Beng.—ভয়ের কারণ থাকা সত্ত্বেও, গজমদসম্পর্কহেতু সুরভিকেসরযুক্ত ও হঠাৎ নিদ্রাভঙ্গহেতু ব্যাত্তমুখ পশুরাজগণ, শিবসৈন্যের দিকে সুস্থিরভাবে দেখিতে লাগিল।

Malli.—'प्रतिभये' भयहेतौ ["भयङ्करं प्रतिभयम्" इत्यमरः] प्राप्ते 'अपि' इति शेषः । 'गजमदसुगन्धिकेशरैः' गजमदैः सुगन्धयः सुरभयः केशराः जटाः येषां तैः, हतानेकगजैः इत्यर्थः । 'सहसा' सेनाकलकलश्रवणानन्तरम् एव 'प्रतिबोधजृम्भितमुखैः' प्रतिबोधेन निद्रापगमेन जृम्भितानि व्यात्तानि मुखानि येषां तैः 'मृगाधिपैः' सिंहैः 'स्वस्थं' निःशङ्कम् एव यथा तथा 'हरसैनिकाः अभिददृशिरे' ईक्षिताः । न तु किञ्चित् क्षुभितम् इत्यर्थः । [युक्तं चैतत् राजनामधारिणां केशरिणाम् इति भावः] ॥ ४९ ॥

Charcha.

1. प्रतिभये—प्रतिभय is भयकारण । See Ma'li also for meaning. भावे ७मी ।

2. गजमद etc.—सु शोभनो गन्धः इति सुगन्धः कर्मधा । स अस्ति यस्य इति सुगन्ध + इनि मत्वर्थे = सुगन्धिन् fragrant. सुगन्धिनः केशराः येषाम्, बहु । गजमदेन सुगन्धिकेशराः, सुप् सुपा । तैः । Qual. मृगाधिपैः । The manes

of the lions were सुगन्धिन् owing to contact with elephant's flow of ichor. And so the epithet implies that the lions killed many elephants and their rut at that time got stuck to their manes. *Don't say* "सु शोभनो गन्धः यस्य इति सुगन्धिः, बहु—with समासान्त (?) by the rule "गन्धस्येत् उत्पूतिसुसुरभिभ्यः"। It does not apply here because the vartuka "गन्धस्येत्वे तदेकान्तग्रहणं कर्त्तव्यम्" restricts the operation of the rule to those cases only in which the गन्ध is *natural* (एकान्त)। In the present case, the गन्ध is आगन्तुक and not नैसर्गिक, because it is acquired from the contact of गजमद।

3. स्वस्थम्—Adv. Qual. अभिदद्दृशिरे।

4. अभिदद्दृशिरे—अभि + दृश + लिट इरे कर्म्मणि। Were seen. Agrees with उक्तकर्म्म—हरसैनिकाः। मृगाधिपैः is the अनुक्तकर्त्ता here.

5 प्रतिवोध etc.—प्रति + बुध + घञ् भावे = प्रतिवोधः waking up. जृम्भ + क्त = जृम्भित yawned (व्यात्त)। प्रतिवोधेन जृम्भितम्, इतत्। तादृशं मुखं येषाम्, बहु। तैः। Or—जृम्भितं मुखं येषाम्, बहु। प्रतिबोधेन जृम्भितमुखाः, सुप्सुपा। तैः। Qual. मृगाधिपैः।

6. *Voice*—मृगाधिपाः जृम्भितमुखाः सैनिकान् ददृशुः etc. easy.

50. *The river-water made brown there at that time.*

विभराम्बभूवुरपवृत्तजठरशफरीकुलाकुलाः।
पङ्कविषमिततटाः सरितः करिरुग्णचन्दनरसारुणं पयः॥ ५०॥

Prose—अपवृत्तजठर-शफरीकुलाकुलाः पङ्कविषमिततटाः सरितः करिरुग्ण-चन्दनरसारुणं पयः विभराम्बभूवुः।

[N. B.—The sense is, that elephants flying through fright by the river bank rendered it muddy and there also broke

sandal trees on the bank, and the exudation of those trees made the water brown at that time. And the Safari fish came up to the water-surface at this agitation.]

Eng.—The rivers abounding in hosts of *Safari* fishes which had their bellies turned up (on the surface of the water), and having their banks unfordable through mud, bore waters brown through exudation of sandal woods broken by elephants.

Beng.—সেখানে নদীতে (বিক্ষোভহেতু) শফরীকুল জঠর উদ্ধৃত করিয়া জলমুখে আকুলভাবে ছিল, নদীতট (পলায়মান করির জন্য) পঙ্ক-হেতু দুর্গম ছিল এবং নদী সমূহ করিকর্ত্তৃক ভগ্ন চন্দনকাষ্ঠের রসেতে অরুণ জল বহন করিতেছিল।

Malli.—'अपवृत्तजठरशफरीकुलाकुला:' अपवृत्तजठरै: तत्कालक्षोभात् लुठितोदरै: शफरीकुलै: आकुला: व्याप्ता: 'पङ्कविषमिततटा:' पङ्के विषमितानि दुर्गमी-कृतानि तटानि कूलानि यासां ता: 'सरित:, करिरुग्णचन्दनरसारुणं' करिभि: पलाय-मानै: इति शेष:, रुग्णानां मार्गरोधितया भग्नानाम् ["ओदितश्च" इति निष्ठानत्वम्] चन्दनानां रसै: अरुणं 'पय: बिभराम्बभूवु:' [भृधातो: "भीह्रीभृहुवां श्लु वच्च" इति आम्प्रत्यय: श्लु वद्भावश्च। "कृञ्चानुप्रयुज्यते लिटि" इति भुव: अनुप्रयोग:] ॥५०॥

Charcha.

1. बिभराम्बभूवु:—भृ (जुहोत्यादि) + लिट + उस्। बिभरामासु: बिभराञ्चक्रु:, and बभ्रु: are also correct in लिट।

In लिट of भृ etc. आम् and श्लुवद्भाव (i. e. द्वित्व i. e., reduplication of roots) comes by the rule "भीह्रीभृहुवां श्लुवच्च"। And लिट of roots कृ, भू and अस् comes after आमन्त roots by the rule "कृञ् चानु-प्रयुज्यते लिटि"। Thus we get भृ + लिट अ = भृ + आम् + भू + अ = बिभराम्बभूव etc. Here सरित: is Nominative.

2. अपवृत्त etc.—शफरीकुल 'is safari fishes. अप+वृत+क्त कर्त्तरि= अपवृत्त upturned. अपवृत्तं जठरं येषाम्, बहु। The Safari fishes are very चटल, and they being disturbed come on the surface of water every now and then, with their bellies turned upwards. अपवृत्तजठराणि शफरीकुलानि, कर्म्मधा। तैः आकुलाः, ३तत्। Qual. सरितः। The disturbance in rivers caused शफरी fish there to come up on the water-surface.

3. पङ्क etc.—विषम+णिच्+क्त कर्म्मणि=विषमित rendered in-accessible. विषमितानि तटानि यासाम्, बहु। पङ्केन विषमिततटाः, सुप्सुपा। Qual. सरितः।

4. करिरुग्ण etc.—रुजो भङ्गे+क्त कर्म्मणि=रुग्ण broken. As the root is read ओ इत in Panini Dhatupatha, so निष्ठा 'त' after it becomes न by the rule "ओदितश्च"। करिभिः रुग्णः, ३तत्। करिरुग्णः चन्दनः (चन्दनवृक्षः), कर्म्मधा। तस्य रसः, ६तत्। तेन अरुणम्, सुप्सुपा। Qual. पयः (which is obj. of विभराम्बभूवुः)।

5. *Voice.*—सरिद्भिः विषमिततटाभिः &c. पयः विभराम्बभूवे etc.

51. Effect of flying buffaloes there—the favourable wind is now fragrant however.

महिषक्षतागुरुतमालनलदसुरभिः सदागतिः।
व्यस्तशुकनिभशिलाकुसुमः प्रणुदन् ववौ वनसदां परिश्रमम्॥५१॥

Prose—महिषक्षतागुरुतमालनलदसुरभिः व्यस्तशुकनिभशिलाकुसुमः सदागतिः (वायुः) वनसदां परिश्रमं प्रणुदन् ववौ।

Eng.—The wind, fragrant with *Aguru*, *Tamal* and *Ushira* broken down by (flying) buffaloes, and which scattered *Saileya* flowers resembling parrots in colour, blew on by dispelling the fatigue of the foresters.

Beng.—মহিষকর্ত্তৃক বিদলিত অগুরু, তমাল ও উশীর সম্পর্কহেতু সুরভি, এবং শুকসবর্ণ শৈলেয়পুষ্প বিক্ষেপকারী বায়ু, বনেচরদের পরিশ্রম দূব করিয়া বহিতে লাগিল।

Malli—'महिषक्षतागुरुतमालनलदसुरभिः' महिषैः लुलापैः क्षतानि विदलितानि तैः अगुरुभिः तमालैः नलदैः च सुरभि सुगन्धिः (? सुगन्धः) 'व्यस्त-शुकनिभशिलाकुसुमः' व्यस्तानि विक्षिप्तानि शुकनिभानि शुकसवर्णानि शिलाकुसुमानि शैलेयाख्याः ओषधिविशेषाः येन सः [अतः शीतलः इति भावः। "कालानुसार्य्य-वृद्धाश्मपुष्पशीतशिवानि तु। शैलेयम्" इत्यमरः। शुकनिभेति स्वरूपकथनम्] 'सदागतिः' वायुः 'वनसदां' वनेचराणां 'परिश्रमं प्रणुदन्' [अतः मन्दः इति भावः। "मातरिश्वा सदागतिः" इत्यमरः] 'ववौ' वाति स्म ॥५१॥

Charcha.

1. महिषक्षत etc.—ताम्यन्ति द्रष्टुमिच्छन्ति वैष्णवैः कृष्णसवर्णत्वात् इति तम + कालन्=तमालः A kind of tree. नलद is *Ushira.* अगुरुश्च तमालश्च नलदं च, द्वन्द्व। Here we do not get समाहार by "जातिरप्राणिनाम्" for द्रव्यत्व is mainly implied here. महिषैः क्षतानि, ३तत्। तादृशानि अगुरु-तमालनलदानि, कर्म्मधा। तैः सुरभिः, ३तत्। Qual. सदागतिः। The flying buffaloes there went on brushing against these Aguru, Tamala and Ushira plants there. And their fragrance made the wind also so. Malli's rendering of सुगन्धिः for सुरभिः is bad in grammar. for here गन्ध is आगन्तुक (see our note under सुगन्धि sl 48).

2. व्यस्त etc.—शुक parrot. तेन तुल्यम् इति शुकनिभम् नित्यसमासः। शिलाकुसुम is a kind of blue fragrant flowers, cool to the touch, of plants known as शैलेय। शुकनिभानि शिलाकुसुमानि, कर्म्मधा। व्यस्तानि (क्षिप्तानि) शुकनिभशिलाकुसुमानि येन सः, बहु। Qual. सदागतिः। The शैलेय grows in cool places as शैल (mountain) ; and its flower is cool and soothing in effect. So the epithet suggests that

wind was cool in touch with शैलेयपुष्प ; शुकनिभ suggests that the colour of these flowers were so. Thus Malli says "शुकनिभेति स्वरूपकथनम्"।

3. प्रणुदन्—प्र+नुद+लटः स्थाने शतृ। Here णत्व comes by "उपसर्गात् असमासेपि णोपदेशस्य"। And णुद is read as णोपदेशधातु in Panini Dhatupatha. Qual. सदागतिः।

4. ववौ—वा+लिट अ। Blew on. Nom. सदागतिः।

5. वनसदाम्—वने सीदन्ति इति वन + सद + क्विप् कर्त्तरि = वनसद् forester. तेषाम्। शेषे ६ष्ठी, related to परिश्रमम् (परि + श्रम + घञ् भावे)।

6. *Voice*—Easy.

52. Flying beasts disturb pools.

मथिताम्भसो रयविकीर्णमृदितकदलीगवेधुकाः।
क्लान्तजलरुहलताः सरसीः विदधे निदाघः इव सत्त्वसंप्लवः॥५२॥

Prak.—सत्त्वसंप्लवः सरसीः क्लान्तजलरुहलताः विदधे [This disturbance of animals made the lotus-plants of pools look pale.] How animals on banks make the lotus look so ? सत्त्वसंप्लवः सरसीः मथिताम्भसो विदधे [The animals during flight som times got down near water margin and thus perturbed its water too. And the reaction thereof reached to lotuses there]. Quite natural ! सरसीः रयविकीर्णमृदितकदलीगवेधुकाः विदधे [Their force during flight pounded and bruised the bannana plants etc., even on the water margin]. Yes I quite follow you !—सत्त्वसंप्लवः निदाघः इव सरसीः विदधे [Thus this disturbance of pools by flying beasts made them such, just as Summer make them look so].

Prose.—सत्त्वसंप्लवः, निदाघः इव सरसीः मथिताम्भसः रयविकीर्णमृदितकदली-गवेधुकाः (ततः) क्लान्तजलरुहलताः विदधे ।

Eng.—This disturbance of animals, like summer-season, made the pools have their water perturbed, have their bannana and *Gabedhuka* plants scattered and bruised, and also had the lotus plants look pale.

Beng.—প্রাণিবিক্ষোভ, গ্রীষ্মকালের ন্যায় সরসীসমূহের জল সংক্ষোভিত করিল, আর এদের পলায়নবেগে সরসীস্থ কদলী ও গবেধুকধান্য বিকীর্ণ ও নিষ্পিষ্ট হইয়াছিল ; এবং সরসীর পদ্মিনীলতা মলিন হইয়াছিল ।

Malli.—'सत्त्वसंप्लवः' प्राणिसंक्षोभः 'निदाघः' ग्रीष्मः इव, 'सरसीः' सरांसि ["कासारः सरसी सरः" इत्यमरः] 'मथिताम्भसः' संक्षोभितोदकाः 'रयविकीर्ण-मृदितकदलीगवेधुकाः' रयेण पलायनवेगेन विकीर्णं व्याकीर्णं यथा तथा मृदिताः निष्पीड़िताः कदल्यः गवेधुकाः तृणधान्यविशेषाश्च यासां ताः तथोक्ताः ["तृणधान्यानि नीवाराः स्त्री गवेधुर्गवेधुकाः" इत्यमरः । मृदित इति "क्ङिति च" इति गुण-प्रतिषेधः] (ततः) 'क्लान्तजलरुहलताः' क्लान्ताः जलरुहलताः पद्मिन्यः यासु ताः, एवम्भूताः, 'विदधे' चकार ॥५२॥

Charcha.

1. मथिताम्भसो—मथि विलोड़ने भ्वादि वा मन्थ क्र्यादि+क्त कर्म्मणि=मथित churned, perturbed. मथि (i. e. मन्थ) भ्वादि+क्त will yield मन्थित । अम्भस् water. मथितम् अम्भः यासां ताः, बहु । Pred. to सरसीः । Flying beasts made the water perturbed.

2. रयविकीर्ण etc.—वि+कॄ+क्त=विकीर्ण scattered. मृद+क्त कर्म्मणि=मृदित pounded, bruised. रय is पलायनवेग here. कदली is bannana plant. गवेधुक is a kind of धान्य ; These grow in water-margin. विकीर्णाश्च ते मृदिताश्च, कर्म्मधा । कदल्यश्च गवेधुकाश्च, द्वन्द्व । विकीर्णमृदिताः कदलीगवेधुकाः यत्र, बहु । रयेण विकीर्णमृदितकदलीगवेधुकाः, सुप् सुपा—or ३तत् । Pred. to सरसीः । Or—रयेण विकीर्णमृदिताः, ३तत् ।

नाहस्थः कदलीगवेधुकाः यत्र, बहु। Flying beasts' force during flight first scattered the plants in water-margin and then these were pounded by their tramplings. This is the natural sense. So we take विकीर्ण and मृदित as adj. to कदली &c. But Malli renders विकीर्णं as adv. to मृदित making the pounding in a disturbed pattern. But then the sense is unnatural. So we prefer our exposition here.

3. क्लान्त etc.—जले रुहन्ति इति जल + रुह + क कर्त्तरि = जलरुहाः lotus. जलरुहाणां लताः lotus plants, ६तत्। क्लान्ताः (मलिनाः) जलरुहलताः यत्र, बहु। Pred. to सरसीः। The disturbance in pools made the lotuses so. Hence मथिताम्भसः etc is cause of this epithet.

4. विदध्रे—वि + धा + लिट ए। Made. Nom. सत्त्वसंप्लवः।

5. निदाघः—उपमान or सत्त्वसंप्लव.।

6. सत्त्व etc.—सम् + प्लु + अप् भावे—संप्लवः flight or disturbance, (here). सत्त्व is animal. सत्त्वानां संप्लवः, ६तत्। The epithet means संप्लुतसत्त्वानि by the maxim "भावानयने द्रव्यानयनम्"।

53. Thus Siva reached Arjuna's abode.

इति चालयन्नचलसानुवनगहनजानुमापतिः।
प्राप मुदितहरिणीदशनक्षतवीरुधं वसतिमैन्द्रसूनवीम् ॥५३॥

Prose.—इति (अनेनप्रकारेण) उमापतिः (शिवः) अचलसानुवनगहनजान् चालयन्, मुदितहरिणीदशनक्षतवीरुधम् ऐन्द्रसूनवीम् वसतिम् प्राप।

Eng.—Thus Siva having disturbed the animals in the slopes of mountains and in recesses of forests there, reached Arjuna's (son of Indra's) hermitage, where the creepers were eaten (or scratched) by the teeth of delighted female deers.

Beng.—এই ভাবে পর্ব্বতকটকস্থ ও তত্রত্য বনস্থ প্রাণিগণকে বিক্ষোভিত করিয়া উমাপতি শিব, ইন্দ্রপুত্র অর্জ্জুনের আশ্রমে পহুঁছিলেন ; এই আশ্রমের লতাগুলি আনন্দহরিণীদন্তকর্ত্তৃক বিক্ষত (অর্থাৎ ভক্ষিত) হইয়াছিল।

Malli.—'इति' इत्थम् 'उमापतिः अचलसानुवनगहनजान्' अचलसानुषु वनेषु उपभोग्यवृक्षेषु गहनेषु दावेषु च जाताः तथोक्तान् सत्त्वान् इति शेषः 'चालयन्', 'मुदितहरिणीदशनक्षतवीरुध' मुदितानां हरिणीनां दशनैः क्षताः वीरुधः लताः यस्यां ताम् इन्द्रसूनोः इमाम् 'ऐन्द्रसूनवीं', वसति अत्र इति 'वसतिम्' आश्रमम् ["वहिवस्यर्त्तिभ्यश्च" इति औणादिकः वसतेः (? वसेः) अतिप्रत्ययः] 'प्राप' ॥

Charcha.

1. चालयन्—चल + णिच् + शतृ। Having made to move out. Pred. to उमापतिः।

2. अचल etc.—अचल mountain. सानु is slope. वनस्य गहनं (दुर्गमस्थानम्), ६तत्। अचलस्य सानु, ६तत्। अचलसानु च वनगहनं च, द्वन्द्व। तत्र जाताः इति अचलसानुवनगहन + जन + ड कर्त्तरि भूते = अचलसानुवनगहनजाः those born in slopes of mountains and in deep forests. Adj. and substantively. तान्। Obj. of चालयन्। Malli. takes गहन to mean दाव, an unusual sense. So we prefer our exposition as above, taking गहन to mean 'inaccessible part'.

3. प्राप—प्र + आप + लिट् ण। Reached. Nom उमापतिः (उमायाः दुर्गायाः पतिः—६तत्)।

4. मुदित etc.—दंश + ल्युट करणे = दशन teeth. मुद + क्त कर्त्तरि = मुदिता delighted. मुदिता हरिणी, कर्म्मधा। We make जातावेकवचनम in हरिणी। तस्याः दशनम्, ६तत्। तेन क्षता (नाशिता or भक्षिता) ३तत्। तादृशी वीरुध् (लता) यत्र, बहु। ताम्। Qual. वसतिम् (for which see Malli).

5. ऐन्द्रसूनवीम्—इन्द्रस्य सूनुः, ६तत्। तस्य इयम् इति इन्द्रसूनु+अण्+ङीप् स्त्रियाम्=ऐन्द्रसूनवी। ताम्। Qual. वसतिम्।

6. *Voice.*—चालयता उमापतिना (the base उमापति being declined like मुनि by the rule "पतिः समासे एव") वसतिः प्रापे &c easy.

54. *Siva approaches the boar-demon.*

स तमाससाद घननीलम् अभिमुखमुपस्थितं मुनेः।
पोत्रनिकषणविभिन्नभुवं दनुजं दधानमथ शौकरं वपुः॥ ५४॥

Prose.—अथ स (शिवः) घननीलं मुनेः (अर्जुनस्य) अभिमुखम् उपस्थितं पोत्रनिकषणविभिन्नभुवं (मुखाग्रविदारितभूखण्डं) शौकरं वपुः दधानं दनुजं (दानवम्) आससाद।

Eng.—Then Siva approached near the dark-blue demon who assumed the shape of a boar, who went up to sage Arjuna and who dug up earth by the scratching of the tip of its mouth.

Beng.—তারপর শিব, ঘননীল এবং মুনি অর্জ্জুনের নিকট সমাগত শূকররূপধারী দানবের সমীপে গেলেন। এ তদীয় মুখাগ্রের নিকষণ দ্বারা ভূমি বিদারিত করিয়াছিল।

Malli.—'अथ' अनन्तरं 'स' शिवः 'घननीलं' मेघमेचकं 'मुनेः' अर्जुनस्य 'अभिमुखं उपस्थितम्' आगतम् 'पोत्रनिकषणविभिन्नभुवं' पोत्रस्य मुखाग्रस्य निकषणेन उल्लेखनेन विभिन्ना विदारिता भूः येन तम् ["मुखाग्रे क्रोडहलयोः पोत्रम्" इत्यमरः। "हलसूकरयोः पुवः" इति ष्ट्रन्प्रत्ययः] सूकरस्य इदं 'शौकरं', 'वपुः दधानं तं दनुजं' दानवम् 'आससाद' प्राप, ददर्श इति यावत् (?)॥ ५४॥

Charcha.

1. आससाद—आ+सद+लिट अ। Attained, reached. Here 'went near to'. Nom. सः। Malli here for आससाद gives the equivalent 'प्राप' rightly; but his addition of 'ददर्श इति यावत्' is

unsound. In previous sloka it is said Siva reaches Arjuna's वसति, then it is natural he saw the demon at that time even. So saying ददर्श for आससाद is uncalled for. Here it is said that after reaching अर्जुनाश्रम, Siva goes up to the demon (दनुज)।

2. घननीलम्—घनं नीलम्, कर्मधा। Qual. दनुजम्। घननील is colour of cloud. So Malli says मेघमेचकम् here. It is now evident that the दनुज was dark-blue like a cloud.

3. अभिमुखम्—Adv. Qual. उपस्थितम्।

4. पोत्र etc – पोत्र is मुखाग्र। निकषण is scratching वि+भिद्+क्त=विभिन्न dug. पोत्रेण निकषणम् scraching by tip of mouth, ३तत्। तेन विभिन्ना, ३तत्। पोत्रनिकषणविभिन्ना भूः येन, बहु। Or—विभिन्ना भूः येन, बहु। पोत्रनिकषणेन विभिन्नभूः सुप् सुपा। तम्। Qual. दनुजम्।

5. दधानम्—धा+शानच् कर्त्तरि। Bearing. Qual. दनुजम्। Here आत्मनेपद is used for the action of शूकरदेहधारण will benefit the agent (i. e., दनुज) in its aim. कर्त्रभिप्राये क्रियाफले आत्मनेपदम्।

6. शौकरम्—शूकरस्य इदम् इति शूकर+अण्=शौकरम् of a boar Qual. वपुः (who is obj. of दधानम्)। दनुजम् is obj. of आससाद।

7. *Voice.*—तेन घननीलः दधानः दनुजः &c. आसेदे...।

55. *Siva follows this boar.*

कच्छान्ते सुरसरितो निधाय सेनाम्
अन्वीतः स कतिपयैः किरातवर्य्यैः।
प्रच्छन्नस्तरुगहनैः सगुल्मजालैः
लक्ष्मीवाननुपदमस्य सम्प्रतस्थे ॥ ५५ ॥

इति श्रीभारविकृतौ किरातार्जुनीये महाकाव्ये ईश्वराभिगमनो नाम द्वादशः सर्गः।

Prak.—Easy.

Prose—लक्ष्मीवान् स (शिवः) सुरसरितः कच्छान्ते सेनां निधाय कतिपयैः किरातवर्य्यैः अन्वीतः (अनुगतः) सन् , सगुल्मजालैः तरुगहनैः प्रच्छन्नः (च सन्) अस्य (वराहस्य) अनुपदम् (पदस्य पश्चात्) सम्प्रतस्थे ।

Eng.—Resplendent Siva, having placed his army near the water-margin of the divine river (Mandakini), and being followed by some best of foresters, and having remained hidden by thickets of trees, full of tendrils of creepers, went on after the boar.

Beng.—শ্রীমান্ শিব, সুরধুনীর জলপ্রায়স্থানে নিজ সেনাকে স্থাপন করিয়া এবং কতিপয় কিরাতশ্রেষ্ঠের সহিত মিলিত হইয়া ও লতাপ্রতানযুক্ত তরুবন দ্বারা আচ্ছাদিত হইয়া সেই বরাহের পশ্চাৎ পশ্চাৎ চলিলেন ।

Malli.—'लक्ष्मीवान्' ["मादुपधायाश्चमतोर्वोऽयवादिभ्यः" इति मतुपः मकारस्य वकारादेशः] 'स' शिवः 'सुरसरितः' मन्दाकिन्याः 'कच्छान्ते' अनूपप्रान्ते ['जलप्राय-मनूपं स्यात् पुंसि कच्छस्तथाविधः" इत्यमरः] 'सेनां विधाय' स्थापयित्वा इत्यर्थः । 'कतिपयैः किरातवर्य्यैः अन्वीतः' अनुगतः सन् [ई गतौ—इति धातोः अनुपूर्वात् कर्म्मणि क्तः] 'सगुल्मजालैः' लताप्रतानसहितैः 'तरुगहनैः प्रच्छन्नः' छादितः ["वादान्त शान्त—"इत्यादिना निपातः] 'अस्य' वराहस्य, पदमनु 'अनुपद" पदानुसारेण इत्यर्थः 'सम्प्रतस्थे' प्रस्थितः ["समवप्रविभ्यः स्थः" इति आत्मनेपदम् ॥ प्रहर्षिणीवृत्तम्] ॥ इति श्रीमहामहोपाध्यायकोलाचल-मल्लिनाथसूरिविरचितायां किरातार्जुनीय काव्यव्याख्यायां घण्टापथसमाख्यायां द्वादशः सर्गः ॥

Charcha.

1. कच्छान्ते—For meaning see Malli. अधि' ७मी ।

2. किरातवर्य्यैः—वर्य्य is श्रेष्ठ । किरातानां वर्य्यः, शेष षष्ठीतत् । तैः । अनुक्ते कर्त्तरि ३या । अनुक्त कर्त्ता of अन्वीतः (अनु + ई गतौ + क्त) । कतिपयैः an अव्युत्पन्न word qualifies किरातवर्य्यैः ।

3. प्रच्छन्नः—प्र + छद + णिच् + क्त कर्मणि। प्रच्छादित is also correct. See Malli. for gram. Being covered. Pred. to सः। सः (शिवः) went after the वराह, being himself hidden by thickets. Thus the boar will not see that he is following him.

4. सगुल्मजालैः—गुल्म here is लतागुच्छ। जाल is network. गुल्मानां जालानि। तैः सह वर्तमानाः, बहु। तैः। Qual. तरुगहनैः (तरूणां गहनानि वनानि इत्यर्थः)। तरुगहनैः has अनुक्ते कर्तरि ३या। For formation of लक्ष्मीवान् see Malli. Siva was always victorious lucky and so he was लक्ष्मीवान् i. e. श्रीमान्। The epithet also suggests that Siva will give लक्ष्मी (i. e. victory & luck) also to where he will go i, e. to Arjuna to whom he will appear again.

5 अनुपदम्—पदस्य पश्चात् इति अनुपदम्, अव्ययीभावः। Adv Qual सम्प्रतस्थे।

6. सम्प्रतस्थे—सम् + प्र + स्था + लिट ए। Nom. सः। For आत्मनेपद see Mall.

7. इति श्रीभारविकृतौ किरातार्जुनीये महाकाव्ये ईश्वराभिगमनो नाम द्वादशः सर्गः ॥ १२ ॥

(For formation of किरातार्जुनीय see our notes in canto I).

7 A. इति—An अव्यय indicates समाप्ति here. श्रीयुक्तः भारविः, शाकपार्थिवादितत्। तस्य कृतिः (रचना), ६तत्। Same case with महाकाव्ये ॥ ईश्वरस्य अभिगमनम् यत, बहु। उक्त इति शब्द योगे १मा ; and नाम is प्राकाश्ये अव्ययम् ॥

8. *Remark*—For metre see Malli under sloka 1 and sloka 55.

त्रयोदशः सर्गः ।

1. Arjuna sees a powerful boar

वपुषा परमेण भूधराणाम् अथ सम्भाव्यपराक्रमं विभेदे !
मृगमाशु विलोकयाञ्चकार स्थिरदंष्ट्रोग्रमुखं महेन्द्रसूनुः ॥१॥

Prak.—Easy. Also see under note 4.

Prose.—अथ महेन्द्रसूनु (अर्जुनः), परमेण वपुषा (हेतुना) भूधराणां विभेदे (विदारणविषये) सम्भाव्यपराक्रमं स्थिरदंष्ट्रोग्रमुखं मृगम आशु (तत्क्षणमेव) विलोकयाञ्चकार।

Eng.—Immediately at that time Arjuna, son of Indra, saw an animal (i e. boar) having terrible mouth owing to firm teeth therein; this animal owing to its huge frame was supposed to possess powers enough to pierce the mountain even.

Beng.– তারপর এদিকে ইন্দ্রসুত অর্জ্জুন সেই সময়েই তীক্ষ্ণ দন্তহেতু উগ্রমুখবিশিষ্ঠ একটী শূকর দেখিতে পাইলেন। এই শূকরটীর বিশাল দেহ হেতু ইহা পরাক্রমে পর্ব্বতবিদারণে সমর্থ এইরূপ বুঝা গেল।

Malli—'अथ' ईश्वरप्रस्थानानन्तरं 'महेन्द्रसूनुः' अर्जुनः 'परमेण' महता 'वपुषा' हेतुना 'भूधाराणां विभेदे' विदारणे 'सम्भाव्यपराक्रमं' क्षमः अयम् इति प्रतर्क्यं पौरुषम्; 'स्थिरदंष्ट्रोग्रमुखं' स्थिराभ्यां दंष्ट्राभ्याम् उग्रं मुखं यस्य तं 'मृगं' वराहमित्यर्थः, 'आशु' तदागमनानन्तरं अविलम्बेन इत्यर्थः 'विलोकयाञ्चकार' ददर्श [अस्मिन् सर्गे प्राक् पञ्चविंशतश्लोकात् औपच्छन्दसिकं वृत्तम्] ॥ १ ॥

Charcha.

1. वपुषा—हेतौ ३या। परमेण (Qual. वपुषा) suggests the hugeness of the frame of the boar.

2. भूधराणाम्—भू Earth. धरतीति धरः (पचाद्यच्)। भुवः धरः भूधरः mountain, इनत्। तेषाम्। कृद्योगा कर्म्मणि षष्ठी, the कृत् is in विभेदे। Remember that भुवं धरतीति will give भूधार with अण् by the rule "कर्म्मण्यण्"। Thus Bhattoji says "कथं गङ्गाधर भूधरादयः। शेषषष्ठ्या भविष्यति"।

3. अथ—अनन्तरार्थे अव्ययम्। That is—after Siva's प्रस्थान towards the animal.

4. सम्भाव्य etc,—सम्+भू+णिच्+यत्=सम्भाव्य probable. परा+क्रम+घञ् भावे=पराक्रमः prowess. सम्भाव्यः पराक्रमः यस्य, वहु। तम्। Qual. मृगम्। Its prowess was probable and inferrable. In what was its prowess inferred as probable?—भूधराणाम् विभेदे सम्भाव्यपराक्रमं मृगम्। How could Arjuna infer so?—परमेण वपुषा हेतुना इत्यर्थः।

5. विभेदे—वि+भिद+घञ् भावे=विभेदः piercing (विदारण); तस्मिन्। विषयाधिकरणे ७मी।

7. आशु—An अव्यय meaning 'immediately' i. e. just after it, and as Siva arrived there.

7. विलोकयाञ्चकार—वि+लोक+णिच्+ लिट अ। Saw. Nom. महेन्द्रसूनुः।

8. स्थिर etc.—स्थिरं दंष्ट्रम् (दन्तम्)। कर्म्मधा। तेन उग्रम् (grim), इतत्। तादृशं मुखं यस्य, वहु। तम्। Qual. मृगम्। The मृग was of a grim face owing to sharp and firm teeth therein. मृग is the boar spoken of in canto XII.

9. *Voice*—सूनुना.........पराक्रमः मृगः विलोकयाञ्चक्रे etc easy. [N. B.—Voice will be given where necessary].

2. Arjuna's guesses in this matter.

स्फुटवद्धसटोन्नतिः स दूरात् अभिधावन्नवधीरितान्यकृत्यः ।
जयमिच्छति तस्य जातशङ्के मनसीमं मुहुरादधे वितर्कम् ॥२॥

Prak.—स तस्य मनसि इमं वितर्कं मुहुः आदधे [The demon every now and then, set up this kind of guessing in this (Arjuna's) mind]. How guessing arose in his tranquil mind ?—जयम् इच्छति मनसि [Though as a sage his mind was in a peaceful state, still he being eager for victory over his enemies, his mind was subconsciously agitated]. I quite understand this —ततः जातशङ्के मनसि [And for this very reason his mind was ever apprehensive e. g. whether he will gain victory over his enemies or not]. In such a mind the demon's attitude naturally set up the वितर्क—स्फुटवद्धसटोन्नतिः सः [Further the demon's hairs manifestly stood up. Thus he seemed to be in a belligerent attitude]. This is not decisive ?—दूरात अभिधावन् स [Again he rushed from afar towards Arjuna. Naturally then Arjuna being of an apprehensive nature, took him to be an enemy, come to attack him]. The demon was perhaps bent on doing something else—अवधीरितान्यकृत्यः [No, he discarded all other work and was preparing to attack Arjuna. So Arjuna was making guesses in the following way].

Prose.— स्फुटवद्धसटोन्नतिः दूरात् अभिधावन् सः (वराहः) अवधीरितान्यकृत्यः (सन्), जयम् इच्छति (आशंसमाने) ततश्च जातशङ्के तस्य (अर्जुनस्य) मनसि मुहुः इमं वितर्कम् आदधे (उत्पादयामास)।

Eng.—The demon, with his hairs manifestly erect and

rushing on from afar, discarded all other work and so it constantly set up this guessing in Arjuna's apprehensive mind, eager for victory.

Beng.—বরাহের কেশরগুলি স্পষ্টভাবে উন্নত হওয়ায় এবং দূর হইতে সে অর্জ্জুনের দিকে তাড়িয়া আসায় ও অন্য কোন কর্ম্ম তার উদ্দিষ্ট না থাকায়, অর্জ্জুনের জয়ার্থি ও শঙ্কাযুক্ত মনেতে এই বিতর্কের সৃষ্টি করিল।

Malli.—'स्फुटबद्धसटोन्नतिः' स्फुटं स्पष्टं बद्धा विरचिता सटानां केशराणां उन्नतिः उद्धतिः यस्य सः, क्रोधात् हृषितलोमा इत्यर्थः ["सटा जटाकेशरयोः" इति विश्वः] 'दूरात् अभिधावन्' सम्मुखमापतन् तथा 'अवधीरितान्यकृत्यः' त्यक्तान्यकर्म्मा 'स' वराहः 'जयम् इच्छति' जयार्थिनि, अतएव 'जातशङ्के' स्वयं जिघांसोः द्विषाम् एकलक्ष्यत्वात् इति भावः। 'तस्य' मुनेः (? अर्जुनस्य) 'मनसि मुहुः इमं वितर्कं' वक्ष्यमाणम् उहम् ["अध्याहारस्तर्क ऊहः" इत्यमरः] 'आददे' उत्पादयामास ॥२॥

Charcha.

1. स्फुट etc.—बन्ध+क्त कर्म्मणि बद्ध lit, tied, here 'assumed'. सटा is hairs. सटानाम् उन्नतिः erection of hairs. स्फुटं (स्पष्टं) बद्धा, सुप् सुपा। स्फुटबद्धा सटोन्नतिः येन सः, बहु। Qual. सः। The boar-demon had his 'erection of hairs manifest'. This was due to his क्रोध to attack Arjuna.

2. दूरात्—अपादाने ५मी।

3. अभिधावन्—अभि+सृ वेगितायां गतौ, or धाव+शतृ। Rushing on. Qual. सः। This also suggests an attacking attitude of the boar.

4. अवधीरितान्यकृत्यः—कृ+क्यप् भावे=कृत्य deed. अन्यत् कृत्यम्, अन्य-कृत्यम् other deed, कर्म्मधा। अवधीरितम् अन्यकृत्यं येन, बहु। Pred. to सः। As he seemed to bend on attacking by discarding all

other works, so Arjuna inferred this probable belligerent attitude.

5. इच्छति—इष + शतृ = इच्छत् wishing. तस्मिन्। Qual. मनसि।

6. जातशङ्के—जाता शङ्का यस्य, बहु। Qual. मनसि। Arjuna's mind was eager for जय over his enemies, so he ever apprehended शङ्का from enemies.

7. आददे—आ + दा + लिट ए। Set up. Nom. सः। This attitude of the boar put up guesses in Arjuna's apprehensive mind.

3. The boar Approaches me.

घनपोत्रविदीर्णशालमूलः निविड़स्कन्धनिकाषरुग्नवप्रः।
अयमेकचरोऽभिवर्त्तते मां समरायेव समाजुहूषमाणः॥ ३॥

Prose. [illegible] निविड़स्कन्धनिकाषरुग्नवप्रः एकचरः अयं वराहः समराय समाजुहूषमाणः इव माम् अभिवर्त्तते।

Eng.—This boar, roaming alone and having uprooted roots of *sala* trees by its strong tip of mouth and having destroyed ramparts (of mountains) by pushing its strong shoulder against it, is rushing at me by challenging me to fight as if.

Beng.—এই বরাহ তদীয় মুখাগ্র দ্বারা শালমূল উৎপাটিত করিয়াছে, এবং মাংসলস্কন্ধঘর্ষণ দ্বারা গিরিসানু বিদলিত করিয়াছে; অধুনা একচর এই বরাহ আমাকে যুদ্ধে আহ্বান করিতে ইচ্ছুক হইয়াই যেন আমার দিকে ধাবিত হইতেছে।

Malli.—अथ एकादशभिः वितर्कम् एव निरूपयति, घनपोत्रेति—'घनपोत्र-विदीर्णशालमूलः' घनेन कठिनेन पोत्रेण मुखाग्रेण विदीर्णानि विदलितानि शाल-

मूलानि वृक्षशाखा येन सः ["मूल' ब्रध्नोऽङ्घ्रिनामकः" इत्यमरः] 'निविड़स्कन्धनिकाष-रुग्णवप्रः' निविड़स्य स्कन्धस्य निकाषेण निकषणेन रुग्णवप्रः भग्नसानुः, अतः महासत्त्व-सम्पन्नः इति भावः। एकश्चासौ चरश्च इति 'एकचर' एकाकी, यूथात् अपेत इत्यर्थः। अतः 'अयं' वराहः 'समराय' समरं कर्त्तुम् ["क्रियार्थोपपदस्य च कर्म्मणि स्थानिनः" इति चतुर्थी] 'समाजुहूषमानः इव' समाह्वातुम् इच्छन् इव [इव शब्दः सम्भावनायाम्। समाह्वयतेः सन्नन्तात् शानच् प्रत्ययः। "स्पर्द्धायामाङः"। "पूर्व्ववत् सनः" इति आत्मनेपदम्। "अभ्यस्तस्य च" इति सम्प्रसारणम्] 'माम् अभिवर्त्तते' माम् अभिधावति [उपसर्गवशात् सकर्म्मकत्वम्]। अतः सर्वथा नायम् उपेक्ष्यः इति भावः ॥ ३ ॥

Charcha.

1. घनपीन etc.—पीन is मुस्ताग्र। घन is strong (here). घनं पीनम् कर्म्मधा। तेन विदीर्णानि, ३तत्। तादृशानि शालमूलानि येन, बहु। Or—विदीर्णानि शालमूलानि येन, बहु। घनपीनेन विदीर्णशालमूलः, सुपसुपा। Qual. अयम्।

2. निविड़ etc.—निविड़ is मांसल (here). नि+कष+घञ् भावे=निकाषः i. e. घर्षण (here). निविडः स्कन्धः, कर्म्मधा। निविड़स्कन्धस्य निकाषः, ६तत्। तेन रुग्णवप्रः (रुग्णं भग्नं वप्रं सानु येन—बहु), सुप्सुपा। Qual. अयम्। These two epithets suggests its strength, as also its रणकण्डू। See Malli also.

3. अभिवर्त्तते —अभि+वृत+लट ते। Approaches. Nom अयम्।

4. समराय—कर्म्मणि ४र्थी, समरं कर्त्तुम् इत्यर्थः। See Malli for rule.

5. समाजुहूषमाणः—समाह्वातुम् इच्छन् इति सम्+आ+ह्वे+सन्+शानच् कर्त्तरि। wishing to challenge. Qual. अयम्। As आङ् ह्वे is आत्मनेपदी in the sense of स्पर्द्धा, so सन्नन्त समा+ह्वे is also so by the rule "पूर्व्ववत् सनः"। See Malli also, all along for rules etc.

4. But how attack is possible in the আশ্রম ?

इह वीतभयाः तपोऽनुभावात् जहति व्यालमृगाः परेषु वृत्तिम् ।
मयि तां सुतरामयं विधत्ते विकृतिः किं नु भवेदियं नु माया ॥४॥

Prose.—इह (आश्रमे) तपोनुभावात वीतभयाः (अपि) व्यालमृगाः परेषु वृत्तिं जहति ; अयं (वराहः) मयि तां (वृत्तिं) सुतरां विधत्ते, इयं किं विकृतिः भवेत् नु, माया नु ?

Eng—Here (in this hermitage) owing to penance-power, the ferocious animals though free from fear, give up enmity on others ; but this boar is indeed showing that spirit on me. Is this a natural deviation or an illusory desire (of demons or Gods etc.)

Beng.—এই আশ্রমে তপঃপ্রভাবহেতু, ক্রূরপ্রাণিগণ ভয়শূন্য হইলেও ইতর প্রাণির উপর হিংসাবৃত্তি (বা—জীবিকাবৃত্তি) ত্যাগ করিয়াছে ; কিন্তু এই বরাহ আমার উপর এই বৃত্তি ধারণ করিয়াছে। তবে কি ইহা প্রাকৃতিক বিকৃতি না (অসুর বা দেবাদিগণের) কোন মায়া হইবে ?

Malli.—'इह' आश्रमे 'तपोनुभावात् वीतभयाः' लक्षणया विगतवैराः इत्यर्थः, अतएव 'व्यालमृगाः' क्रूरव्याघ्रादयः ["व्यालोभुजङ्गमे क्रूरे श्वापदे दुष्टदन्तिनि" इति विश्वः] 'परेषु' प्राण्यन्तरेषु 'वृत्तिं' जीविकां 'जहति' हिंसया न जीवन्ति इत्यर्थः । 'अयं' वराहः 'मयि' मद्विषये 'तां' वृत्तिं 'सुतरां विधत्ते' जिघांसति इत्यर्थः । तत् 'इयं विकृतिः' तपःसामर्थ्यभङ्गरूपा 'भवेत् किं नु' यद्वा 'माया' कस्यचित दैत्यस्य वराहभूमिका भवेत् 'नु' [किं-नु-शब्दौ वितर्के] ॥ ४ ॥

Charcha.

1. वीतभयाः—भी + अच् = भयम् fear. वि + इ + क्त कर्त्तरि = वीत gone. वीतं भयं येषाम्, बहु । Qual. व्यालमृगाः । The व्यालमृग though वीतभय i. e. though not checked by others, still they gave up (जहति)

envy etc. on others. [This is the sense here, so we give अपि in Prose]. And this was due to तपःप्रभाव in आश्रम।

2. तपोनुभावात्—भू+घञ् भावे=भावः। अनुगतः भावः इति अनुभावः majesty, प्रादितत्। तपसः अनुभावः, ६तत्; तस्मात्। हेतौ ५मी। Here avoid अनु+भू+घञ्=अनुभाव, for भू without any उपसर्ग takes घञ् only by the rule "श्रिणीभुवोनुपसर्गे"।

3. जहति—हा त्यागे+लट अन्ति। Give up. Nom. व्यालमृगाः।

4. वृत्तिम्—It means either जीविका (Malli) or more appropriately हिंसावृत्ति। For in आश्रम we see the strong does not molest the weak, Cp. "क्षुद्रान्न जक्षुर्हरिणान्" etc. in Bhatti II. Obj. of जहति।

5. विधत्ते—वि+धा लट ते; assumes. Nom. अयम्॥ ताम् refers to वृत्तिम्—Obj. of विधत्ते।

6. भवेत्—भू+लिङ् सम्भावनायां+यात्। Nom. इयम्। किम implies प्रश्न, and नु denotes वितर्क। Both together implies वितर्कगर्भ प्रश्न॥ For Malli's "माया कस्यचित् दैत्यस्य" better say "माया कस्यचित् देवस्य दैत्यस्य वा"। For Arjuna was not till then aware that it was दैत्यकृता माया।

5. *Some prior birth-envy perhaps sets this boar against me.*

अथवैष कृतज्ञयेव पूर्वं भृशमासेवितया रुषा न मुक्तः।
अवधूय विरोधिनीः यदारात् मृगजातीरभियाति मां जवेन॥५॥

Prose.—अथवा एषः (वराहः) पूर्वं (पूर्वजन्मनि) भृशम् आसेवितया (ततः) कृतज्ञया रुषा न मुक्तः इव। यत् (यस्मात्) आरात् विरोधिनीः मृगजातीः अवधूय (परित्यज्य) जवेन मामेव अभियाति।

Eng.—Or, this animal (boar) can not perhaps avoid some

strong malice, deeply impressed in some prior birth and which remembers its previous incident ; for this is forcibly rushing at me, by forsaking the deer the natural enemy, at hand.

Beng.—অথবা এই বরাহ পূর্ব্বজন্মে গাঢ়ভাবে পরিচিত তাই বৈরানুবন্ধজ কোন হিংসাদ্বারা মুক্ত হইতে পারিতেছে না মনে হয় ; কারণ এ নিকটস্থ স্বভাবশত্রু হরিণগণ ত্যাগ করিয়া আমার দিকেই বেগে আসিতেছে।

Malli.—'अथवा' इति पक्षान्तरे 'एषः' मृगः 'पूर्वं' जन्मान्तरे 'भृशम्' अत्यर्थम् 'आसेवितया' अतिपरिचितया 'रुषा' क्रुधा, मन्योचरया इति 'शेषः', 'कृतज्ञया इव' पूर्वकृतं वैरानुबन्धं सम्प्रति जानाति इव [इति उत्प्रेक्षा], 'न मुक्तः' न त्यक्तः अद्यापि इति शेषः। [नूनमयं प्राग्भवीयवैरानुबन्धी कश्चित्, सम्प्रति वैरबीजासम्भवात् इति भावः]। कुतः ?—'यत्' यतः 'आरात्' समीपतः ["आरात् दूरसमीपयोः" इति अमरः] 'विरोधिनीः मृगजातीः अवधूय' त्यक्त्वा 'जवेन माम् अभियाति' अभिधावति। अन्यथा न अभियायात् इति भावः ॥ ५ ॥

Charcha.

1. कृतज्ञया—कृतं (i. e., पूर्वकृतं वैरं) जानाति या सा इति कृत + ज्ञा + क कर्त्तरि = कृतज्ञा that remembers prior incident (of enmity). तया। Qual. रुषा ॥ Here इव seems to imply सम्भावना and not उत्प्रेक्षा as Malli says ; for Arjuna infers probability e. g., that this was probable, otherwise it cannot rush at me by leaving its natural prey e. g. (the deer).

2. पूर्वम्—Adv. Qual. आसेवितया (आ + सेव + क्त कर्म्मणि = आसेविता known. तया—Qual. रुषा)। As this हिंसा was भृशम् आसेविता, so it was naturally कृतज्ञा (पूर्वकृतस्मारिका)।

3. मुक्तः—मुच + क्त कर्म्मणि destitute of. Its अनुक्त कर्त्ता is रुषा (The base is रुष् meaning lit. anger, here envy due to anger).

4. अवधूय—अव+धू+ल्यप्। Having discarded.

5. मृगजातीः—Here मृग refers to deer. मृगाणां जातिः, ६तत्। ताः। Obj. of अवधूय। विरोधिनीः मृगजातीः refers to naturally antagonistic deer. The boar avoids these and rushes at me, so it is my पूर्वजन्मशत्रु।

6. जवेन—प्रकृत्यादित्वात् वा करणे ३या।

7. अभियाति—अभि+या+लट् ति। Rushes. Nom. एषः॥ आरात् is a विभक्ति प्रतिरूपक अव्यय meaning समीप here. It has sense of ७मी here.

6. Its sight bespeaks enmity.

न मृगः खलु कोऽप्ययं जिघांसुः स्खलति ह्यत्र तथा भृशं मनो मे।
विमलं कलुषीभवच्च चेतः कथयत्येव हितैषिणं रिपुं वा॥ ६॥

Prose.—अयं मृगः न खलु, (किन्तु) कोऽपि जिघांसुः। हि (यतः) अत्र मे मनः तथा भृशं स्खलति (क्षुभ्यति)। (तथाहि) विमलं कलुषीभवत् च चेतः एव हितैषिणं रिपुं वा कथयति।

Eng.—This is not a mere animal; but some one willing to strike at me, for my mind is highly agitated at it. Thus a calm and disturbed mind (at one's sight), respectively signify that on is a friend or a foe.

Malli.—न केवलम् अभियानमेव, किन्तु मनोवृत्तिः अपि अत्र प्रमाणम् इति आह—न मृग इति। 'अयं मृगः न खलु', किन्तु 'कः अपि' कश्चित् अन्यः एव 'जिघांसुः' हन्तुमिच्छुः [हन्तेः सन्नन्तात् उप्रत्ययः। "अभ्यासाच्च" इति कुत्वम्। "अज्झनगमां सनि" इति दीर्घः]। कुतः?—'हि' यस्मात् 'अत्र' अस्मिन् मृगविषये 'मेमनः तथा भृशं स्खलति' क्षुभ्यति ; यथा अयं जिघांसुः इति बुद्धिः उत्पद्यते इत्यर्थः। तथाहि—'विमलं' प्रसन्नं तथा 'कलुषीभवत्' क्षुभ्यत् 'च चेतः

एव हितैषिणं रिपुं वा मित्रम् अमित्रं च 'कथयति'। यत्र यत्र मनः प्रसीदति, तदेव मित्रम्, यत्र क्षुभ्यति सोऽमित्र इति निश्चितम् इत्यर्थः। अतः अयं वध्यः इति भावः॥ ६॥

Charcha.

1. स्खलति—स्खल+लट् ति। Stumbles against i e., agitates. Nom. मनः।

2. कलुषीभवत्—कलुष is 'disturbed' here. अकलुषं कलुषं सम्पद्यमानं भूतम् इति कलुष+च्वि (अभूततद्भावे)+भू+शतृ=कलुषीभवत् becoming agitated. Qual. चेतः। If mind is कलुष at one's sight then he is to be taken as foe, otherwise friend. Now as my mind agitates at the sight of this boar, so I say that it is a foe of mine. So let me kill it. See Malli also.

3. कथयति—कथ+णिच्, चुरादि+लट् ति। Speaks, indicates. Nom चेतः। Cp. "अविज्ञातेपि बन्धौ हि बलात् प्रह्लादते मनः:"—Canto XI, sl 8. ante. See Malli also all along.

7. *This appression is not inopportune.*

मुनिरस्मि निरागसः कुतो मे भयमित्येष न भूतयेऽभिमानः।
परवृद्धिषु बद्धमत्सराणां किमिव ह्यस्ति दुरात्मनामलङ्घ्यम्॥७॥

Prak.—Not given where easy.

Psose.—(अहं) मुनिः अस्मि; निरागसः मे कुतः भयम्—इति एषः (एवंरूपः) अभिमानः (बुद्धिः) भूतये (श्रेयसे) न (भवति)। (यतः) परवृद्धिषु बद्धमत्सराणां दुरात्मनाम् (मे शत्रूणाम् इत्यर्थः) अलङ्घ्यं किमिव अस्ति हि (न किञ्चित् अकार्यमस्ति इति भावः)।

Eng.—"I am a sage. Whence can there be fear of me, the sinless?"—Such idea is also not conducive of good. For,

there is nothing unassailable to the wicked (i. e., to my wicked enemies) who are malicious at other's prosperity.

Malli.—ननु मुनेः किमनया दुःशङ्कया ?—तत्राह, मुनिरिति। 'मुनिः अस्मि' अतः 'निरागसः' निरपराधस्य 'मे कुतः भयम् ?'—'इति एषः अभिमानः' अहङ्कारः ["गर्वोऽभिमानोऽहङ्कार" इत्यमरः] अनपकारिणो मे कः अपि किं करिष्यति—इति बुद्धिः 'भूतये' श्रेयसे 'न' भवति। तथाहि 'परवृद्धिषु' विषये 'बद्धमत्सराणां दुरात्मनाम् अलङ्घ्यं किमिव अस्ति हि' न किञ्चित् अकार्य्यम् अस्ति इत्यर्थः। [इवशब्दः वाक्यालङ्कारे] ॥ ७ ॥

Charcha.

1. अस्मि—अस + लट मि। Nom. अहम् understood.

2. निरागसः—आगस् is sin. निरस्तम् आग. यस्य, बहु। तस्य। Qual. मे ॥ कुतः—किम् + ङसि (५मी) + तसि स्वार्थे = कुतः whence. अव्यय। अपादाने ५मी।

3. भूतये—भू + क्तिन् भावे = भूति meaning मङ्गल। तस्यै। "क्लृपि सम्पद्यमाने" इति ४र्थी।

4. परवृद्धिषु—वृध + क्तिन् भावे = वृद्धिः prosperity. परेषा वृद्धिः, ६तत्। तासु। विषयाधिकरणे ७मी।

5. बद्ध etc.—मत्सर is परश्रीकातरता। बद्धं मत्सरं येषाम्, बहु। तेषाम्। Qual दुरात्मनाम्।

6. अलङ्घ्यम्—लङ्घ + णिच् + यत् = लङ्घ्यम् to be assailable. न लङ्घ्यम्, नञ् तत्। Qual. किम्। Its अनुक्तकर्त्ता—'दुरात्मनाम्' takes optionally षष्ठी by the rule "कृत्यानां कर्त्तरि वा"। तृतीया is also correct in दुरात्मनाम् ॥ The wicked, who are my enemies, cant tolerate this prosperity of mine. So it is possible; they have come to attack me. So it is possible that my enemy दुर्य्योधन the मानिन्, has to strike me here. Cp. "परवृद्धिमत्सरि मनो हि मानिनाम्" in *Sisupala*, and see sl. 10 infra.

8. This is a demon surely.

दनुजः स्विदयं च्चपाचरो वा वनजे नेति वलं वतास्ति सत्त्वे ।
अभिभूय तथा हि मेघनीलः सकलं कम्पयतीव शैलराजम् ॥८॥

Prose.—अयं दनुजः (दानवः) स्वित् (एव), वा च्चपाचरः (राक्षसः) एव। (यतः) वनजे सत्त्वे (जन्तौ) इति (एवंविधं) वलं न अस्ति, वत। तथाहि मेघनीलः (अयं वराहः) सकलं शैलराजम् (हिमालयम्) अभिभूय कम्पयतीव।

Eng—This is indeed either a demon or a Rakshasha; for it is impossible that a wild animal should possess such strength. And this one (i e. the boar) dark like a cloud, indeed overpowers the entire mountain and agitates it.

Malli—अस्तु, जिघांसुरपि तुच्छः (? अयं) किं करिष्यति ?—इत्यत्राह, दनुज इति। 'अयं दनुजः स्वित्' दानवः 'वा च्चपाचरः' राक्षसः वा, न तु मृग एव इत्यर्थः। कुतः ?—'वनजे सत्त्वे' वन्यप्राणिनि 'इति' ईदृशं 'वलं न अस्ति'। ['वत' इति आश्चर्ये (? अव्ययम्)]। वलमेव समर्थयते—'तथाहि मेघनीलः' अयं वराहः 'सकलं शैलराजम् अभिभूय' आक्रम्य 'कम्पयति इव' पदविष्टम्भभरात् तथा प्रतीयते इत्यर्थः। [अत्र कम्पयति इव इति उत्प्रेक्षागर्भः अयं, शैलकम्पनरूपकार्येण तत्कारणवलातिरेकसमर्थनात् कार्येण कारणसमर्थनरूपः अर्थान्तरन्यासः] ॥८॥

Charcha.

1. स्वित्—An अव्यय denoting 'certainty' here.

2. च्चपाचरः—चरतीति चरः (पचाद्यच्)। च्चपा is night. च्चपायां चरः, सुप्सुपा। Or—च्चपायाम् चरतीति च्चपा+चर+ट कर्त्तरि (अधिकरणे उपपदे by the rule "चरेष्टः") = च्चपाचरः a Rakshasa (च्चपाट)। Nom. to भवति or भवेत् &c. understood.

3. वत—An अव्यय indicating 'आश्चर्य' here. It is आश्चर्य that a वनज सत्त्व will have (इति) such वल।

4. मेघनीलः—मेघ इव नीलः, उपमानतत् by the rule "उपमानानि सामान्यवचनैः"। Refers to the dark blue वराह। Nom. कम्पयति (कम्प + णिच् + लट ति)।

6. शैलराजम्—शैलानां राजा इति शैलराजः with समासान्त टच् by the rule "राजाहः सखिभ्यष्टच्"। तम्। Obj. of अभिभूय (अभि + भू + ल्यप्) and कम्पयति॥ He is so very strong that his footstep seems to shake this entire mountain. Cp. "नमयतीव गतिर्धरित्रीम्"—in *Uttaracharita* VI, spoken with reference to Kusa's strong foot-fall.

9. He is willing to strike at me.

अयमेव मृगव्यसत्रकामः प्रहरिष्यन्मयि मायया शमस्थे।
पृथुभिर्ध्वजिनीरवैरकार्षीत् चकितोद्भ्रान्तमृगाणि काननानि ॥९॥

Prak.—अयमेव मृगव्यसत्रकामः [It is this one that is wishing to occupy this place for मृगया]. Let it go on with मृगया, what's that to you ?—शमस्थे मयि मायया प्रहरिष्यन् अयम् [Though I am in the attitude of a sage, still this is willing to strike at me in the guise of a boar. And with this object in view it is desirous of occupying the मृगयाभूमि। So I cannot but give attention to this one]. You are mistaken in your apprehension—अयं पृथुभिः ध्वजिनीरवैः काननानि चकितोद्भ्रान्तमृगाणि अकार्षीत् [No, I am right in my surmise. For I believe it is this one who created the army at whose din the animals in the entire forest got agitated]

[N. B.—Arjuna took the din of Siva's army, as the army created by the माया of this demon. See Malli also here from beginning to end].

Prose.—अयम् शमस्थे मयि मायया प्रहरिष्यन् (प्रहर्त्तुम् इच्छन्) मृगव्यसत्र-कामः एव (भवति)। एषः पृथुभिः ध्वजिनीरवैः काननानि चकितोद्भ्रान्तमृगाणि अकार्षीत्। Or—अयम् शमस्थे......मृगव्यसत्रकामः (च सन्) पृथुभिः...... अकार्षीत् (Malli).

Eng.—This animal wishing to strike at me who am in the calm state of a sage, is striving to take the vantage-place in hunting. And this one made the animals in the woods get frightened and agitated by the din of a huge army.

Beng.—এই বরাহ শান্তনিবিষ্ট আমার প্রতি প্রহারেচ্ছু হইয়া মৃগয়া-যোগ্য ভূমিগ্রহণ করিতে যাইতেছে। আর এ ই, বিশাল সেনাকলকলদ্বারা কাননের প্রাণিগণকে ত্রস্ত ও পলায়মান করিয়াছিল।

Malli.—কিন্তু যঃ अयं शैले मृगयाकलकलः इव श्रूयते सः अपि एतन्मायापरि-कल्पित एव इति आह—अयमिति। 'अयमेव'—'शमस्थे' शान्तनिविष्टे [इति स्वोक्तिः] 'मयि' [अधिकरणविवक्षायां सप्तमी] 'मायया प्रहरिष्यन्' प्रहर्तुम् इच्छन् इत्यर्थः ["लृट् शेषे च" इति चकारात् क्रियार्थायां क्रियायां लृट्। "लृटः सद्वा" इति शत्रादेशः] 'मृगव्य' मृगया तस्य 'सत्र' वन, तदर्थंवनमित्यर्थः। तत्कामयते इति मृगव्यसत्रकामः' मृगयाभूमिपरिग्रहार्थी सन् इत्यर्थः ["कर्मण्यण्" (? शीलिकामिभक्ष्याचरिभ्यो णः")॥ "आच्छोदनं मृगव्यं स्यादाखेटो मृगयास्त्रियाम्" इति ; "सत्रमाच्छादने यज्ञे सदादाने वनेपि च" इति चामर] 'पृथुभिः' वृहद्भिः 'ध्वजिनीरवैः' सेनाकलकलैः स्वमायया कल्पितैः एव इत्यर्थः 'काननानि चकितोद्भ्रान्त-मृगाणि' चकितोद्भ्रान्ताः त्रस्तपलायिताः मृगाः येषु तानि 'अकार्षीत्' चकार। [यः अयं रन्ध्रान्वेषी मत्प्रहारार्थं स्वयमेव मृगयुः भूत्वा वनावरोधाय सैनाघोषः कल्पयामास, सः मृगरूपेण आगच्छति इत्यर्थः] ॥९॥

Charcha.

1. मृगव्य etc. – मृगव्य is मृगया hunting (See Malli). सत्र is वन (See Amara quoted in Malli). मृगव्यस्य सत्रम् इतत्। तत्कामयते इति मृगव्यसत्र + कामि + ण = मृगव्यसत्रकामः wishing to get at vantage position in hunting. Pred. to अयम्। Malli's quotation of the rule "कर्मण्यण्" here is a slip. Here the affix is ण by the Varttika "शीलिकामिभक्ष्याचरिभ्यो णः", where Bhattoji says "अणोपवादार्थं वार्त्तिकम्"।

2. प्रहरिष्यन्—प्र + हृ + लृटः स्थाने शतृ = प्रहरिष्यत् wishing to strike at. Pred. to अयम्। This क्रिया is intended as the cause for मृगव्यसत्रकामः, वा अकार्षीत् (See alt. Prose of Malli). So लृट् is by "लृट्शेषे च" (See Malli). Here the rule "लक्षणहेत्वोः क्रियायाः" may also be applied in support of शतृ।

3. मयि—अधिकरण विवक्षया ७मी। The कर्म of प्र + हृ is usually made the आधार as in "मयि प्रभुः प्रहर्त्तुम् नान्तकोपि etc.—Raghu II.

4. मायया—माया is illusory devise तया। करणे ३या।

5. शमस्थे—शमे (शान्तरसे) तिष्ठति य सः इति शम + स्था + क कर्त्तरि = शमस्थः। तस्मिन्। Qual. मयि। This shows the opportunity to strike at Arjuna.

6. ध्वजिनीरवैः—करणे ३या।

7. चकितोत् etc.—चकिताश्च ते उद्भ्रान्ताः (पलायिताः) च, कर्मधा। तादृशः मृगाः यत्र, बहु। तानि। Pred. to काननानि।

8. अकार्षीत्—कृ + लुङ् द। Made Nom. अयम् (acc. to Mall), वा एषः etc. understood acc. to our prose. Both construction suits well.

10. Or this one is set up against me by दुर्य्योधन ।

बहुशः कृतसत्कृतेर्विधातुं प्रियमिच्छन्नथवा सुयोधनस्य ।
क्षुभितं वनगोचराभियोगात् गणमाशिश्रियदाकुलं तिरश्चाम् ॥१०॥

Prak.—Easy.

Prose.—अथवा बहुशः कृतसत्कृतेः सुयोधनस्य प्रियं विधातुम इच्छन् (कं पि) वनगोचराभियोगात् क्षुभितम् (तथा) आकुलं तिरश्चां (मृगादिपशूनां) गणम् आशिश्रियत् ।

Eng.—Or,—He is some one wishing to do good to Durjodhana who has repeatedly rendered service to him, has entered (as a boar) into the agitated and running hosts of animals ; the animals are agitated owing to obstruction by the Kiratas.

Beng.—অথবা দুর্য্যোধনের দ্বারা উপকৃত এ আমার হত্যারূপ প্রিয়কার্য্য করিতে ইচ্ছুক হইয়া, পথে কিরাতবর্গ কর্ত্তৃক অবরুদ্ধ হইয়া প্রাণিগণের মধ্যে ঢুকিয়াছে।

Malli.—वितर्कान्तरमाह, बहुश इति। 'अथवा बहुशः कृतसत्कृतेः' बहुशः कृता सत्कृतिः सत्कारः येन तस्य 'सुयोधनस्य' 'प्रियं' मद्वधरूपं प्रतिप्रियं 'विधातुं' कर्त्तुम् 'इच्छन्' यः कश्चित् (इति शेषः), 'वनगोचराभियोगात्' वनं गोचरस्थानं येषां तेषाम् वनगोचराणाम् अभियोगात् अवरोधात् ["अभियोगोऽवरोधकः स्यात्" इति हलायुधः] 'क्षुभितम्' उद्विग्नम् 'आकुलं' चलं 'तिरश्चां' मृगादिपशूनां 'गणम्' आशिश्रियत्' वराहरूपेण प्राविचत् ["णिश्रिद्रुस्रुभ्यः कर्त्तरि चङ्" । "चङि" इति द्विर्भावः] ॥ १० ॥

Charcha.

1. कृतसत्कृतेः—सत् is a गति in the sense of आदर by "अदरानादरयोः सदसती" । सत् + कृ + क्तिन् भावे = सत्कृतिः good service. Or—सती कृतिः (कार्य्यम्) इति सत्कृतिः, कर्म्मधा and पुंवद्भावः ॥ कृता सत्कृतिः

येन, बहु। तस्य। Qual. सुयोधनस्य। दुर्योधन has repeatedly (बहुशः) done good to this one, and now he is going to render service in return by killing me, the enemy of दुर्योधन।

2. वनगोचराभि etc —वनगोचर (वनं गोचरः येषाम्, बहु, See Malli) may refer to किरात or wild animal. अभियोग is अवरोध (insurrection). See Malli. वनगोचराणाम् अभियोगः, ६तत्। तस्मात्। हेतौ ५मी। If वनगोचर is taken to refer to किरात, then the sense is—owing to invasion of forest by Kiratas the animals are disturbed (see sl. 9). And at this rage due to disturbance of the animals, my enemy (a partisan of दुर्योधनः) has sided the animals and has come to attack me :—I being taken as one of the Kiratas. If वनगोचर is taken to refer to 'wild animals' then the sense is—owing to this present attack to the animals, they are disturbed And one my enemy has come in the guise of a boar to attack me at this सुयोग—I being taken as a creator of disturbance. For now I will not mind or apprehend anything from the disturbed hosts of beasts. In the first case वनगोचरानां अभियोगः has कर्तृषष्ठीतत्, in the second it has कर्म्मषष्ठीतत्।

3. आशिश्रियत्—आ + श्रि + णिच् + लुङ् + द = आ + श्रि + णिच् + चङ् + लुङ + द = आशिश्रि + द = आशिश्रियत् (with इयङ्)। entered in. Nom. अयम् understood. See Malli for gram.

11. Or Is he my enemy during खाण्डववनदाहन।

अवलीढ़सनाभिरश्वसेनः प्रसभं खाण्डवजातवेदसा वा।
प्रतिकर्त्तुमुपागतः समनुः क्षतमनुः यदि वा वृकोदरेण ॥ ११ ॥

Prsoe.—खाण्डवजातवेदसा (खाण्डव-वनाग्निना) प्रसभम् अवलीढ़सनाभिः (दग्धबन्धुः) समन्युः अश्वसेनः (तन्नामकसर्पविशेषः) प्रतिकर्त्तुमुपागतः ; यदि वा (अथवा) वृकोदरेण कृतमन्युः (कश्चित् उपागतः) ।

Eng.— Is Aswasena (the serpent), has come here (in the guise of a boar) to take vengeances ; he being enraged for his kindreds where burnt down unawares by Khandava-Fire. Or is this some one set up with ire by Vrikodara (i. e. Bhimasena) ?

[N. B.—For allusion etc , here, see Malli.].

Malli.—वितर्कान्तरमाह, अवलीढ़ेति । 'खाण्डवजातवेदसा' खाण्डव वनाग्निना 'प्रसभम् अवलीढ़सनाभिः' दग्धबन्धुः ["सपिण्डास्तु सनाभयः । सगोत्र-बान्धव-ज्ञाति-बन्धु-स्व-स्वजनाः समाः "इति अमरः] अतएव 'समन्युः' बद्धवैरः, तस्य अर्जुनस्य अपकारयितृत्वात् इति भावः । 'अश्वसेनः' तक्षकपुत्रः कश्चित् महासर्पः 'प्रतिकर्त्तुम्' वैरनिर्य्यातनार्थम् 'उपागतः' वराहमायया इति शेषः । पक्षान्तरमाह— 'यदि वा वृकोदरेण' भीमसेनेन 'कृतमन्युः' जनितक्रोधः 'वा' कश्चित् इति शेषः । [पुरा किल पाण्डवः खाण्डवदाहे पावकभयात् पलायमानान् तक्षकपुत्रान् अश्वसेनस्य बन्धून् वाणैः अवरुध्य दाहयामास इति भारतकथानुसन्धेया इति] ॥

Charcha.

१. अवलीढ़ etc.—अव + लिह + क्त कर्म्मणि = अवलीढ़ burnt (here). सनाभि is kindred. अवलीढ़ः सनाभिः यस्य, बहु । Qual. अश्वसेनः । This epithet shows why अश्वसेनः was समन्युः ॥ मन्युना (क्रोधेन) सह विद्यमानः इति समन्युः, तुल्ययोगे बहु । Qual. अश्वसेनः । Cp. "मन्युर्दैन्ये क्रतौ क्रुधि" इत्यमरः ।

२. प्रसभम्—प्रगता सभा (विचारः) अस्मात् इति प्रसभम् suddenly, unawares बहु । Adv. qual. अवलीढ़ in अवलीढ़सनाभिः ।

3. खाण्डव etc. — जातवेदस् is fire. खाण्डवस्य वा खाण्डवस्थः जातवेदाः, इतत् वा, शाकपार्थिवादितत्। तेन। अनुक्ते कर्त्तरि इया—अनुक्तकर्त्ता of अवलीढ़।

4. कृतमन्युः—मन्यु is क्रोध। कृतः (जनितः) मनुाः यस्य, बहु। Adj. qual. कश्चित् understood.

5. वृकोदरेण—भीमसेन is so called 'for he was a voracious eater like a वृक, or because he was ferocious like a वृक, Cp. "वृककर्म्मा वृकोदरः" in *Beni-Sanhara.* वृकस्य उदरम्, इतत्। वृकोदरमिव उदरं यस्य, बहु by "सप्तम्युपमानपूर्व्वस्य उत्तरपदलोपश्च वक्तव्यः"। तेन। अनुक्ते कर्त्तरि इया।

6. *Voice*—अश्वसेनेन उपागतम् etc. easy. [N. B.—Voice avoided where easy.]

12. Any how let me destroy the enemy.

बलशालितया यथा तथा वा धियमुच्छेदपरामयं दधानः।
नियमेन मया निवर्हणीयः परमं लाभमरातिभङ्गमाहुः ॥ १२ ॥

Prose.—यथा तथा वा (येन केनापि भावेन) बलशालितया उच्छेदपरां धियं दधानः अयं नियमेन (अवश्यमेव) मया निवर्हणीयः (वध्यः)। अरातिभङ्गं (अरातिनाशं) परमं लाभम् आहुः (बुधाः कथयन्ति)।

Eng.—Any how owing to its excess of strength it (the boar) entertains the idea of my destruction, so it is surely to be killed by me. The learned say that destruction of enemies is a great gain (to one).

Malli.—अथ द्वाभ्यामनन्तरकारणीयम् अध्यवस्यति, बलेत्यादिना। किं बहुना? 'यथा तथा वा' अस्तु अयं मायिकः, पारमार्थिकोवा अस्तु इत्यर्थः, सर्वथापि 'बलशालितया' बलदृप्ततया इत्यर्थः, 'उच्छेदपरां धियं दधानः' मां जिघांसुरित्यर्थः,

अतः 'अयं' मृगः (वराहः) 'नियमेन' अवश्यं मया निवर्हणीयः' वध्यः ['प्रमापणं निवर्हणम्' इत्यमरः]। तथाहि –'अरातिभङ्गं' शत्रुवधं 'परमं' लाभमाहुः' ॥१२॥

Charcha.

1. बल etc.—बलेन शालते (शोभते) य स इति बल + शाल + णिनि कर्त्तरि साधुकारिणि = बलशालिन् one possessing strength. तस्य भावः इति बलशालिन् + तल् = बलशालिता। तया। हेतौ ३या।

2. यथा तथा—These two correlative words here indicate येन केनापि भावेन। Have the sense of करण ३या (Cp. "क्रियाविशेषणानां क्वचित् फलभावनां प्रति करणत्वम्")। See Malli also. Also compare "यत्तदोः नित्यसम्बन्धः"।

3. उच्छेदपराम्—पर is प्रधान। उद् + छिद + घञ् भावे = उच्छेदः destruction. उच्छेदः परः (प्रधानं) यस्याः, बहु। ताम्। Qual. धियम् ॥ धा + शानच् कर्त्तरि = दधानः। Qual. अयम्।

4. नियमेन—नि + यम + अप् भावे = नियमः law. तेन। By law. प्रकृत्यादित्वात् ३या।

5. निवर्हणीयः – नि + वर्ह भ्रादि + अनीयर् कर्म्मणि = निवर्हणीयः to be killed. Agrees with उक्तकर्म्म—अयम् here. अनुक्तकर्त्ता is मया।

6. अरातिभङ्गम्—भञ्ज + घञ् भावे = भङ्गः (here) destruction. अरातेः (शत्रोः) भङ्गः, ६तत्। तम्। Obj. of आहुः। To kill the enemy is the advise of नीतिशास्त्र ॥ लाभम् is its विधेयविशेषण।

7. आहुः—ब्रू + लट् अन्ति। Nom. बुधाः understood. ब्रुवन्ति is the other form here. Cp. the rule 'ब्रुवः पञ्चानामादित आहो ब्रुवः"।

13. हिंसा *to kill an enemy is not unjust.*

कुरु तात तपांस्यमार्गदायी विजयायेत्यलमन्वशान्मुनिर्माम्।
बलिनश्च वधादृतेऽस्य शक्यं व्रतसंरक्षणमन्यथा न कर्त्तुम् ॥१३॥

Prose.—"हे तात (वत्स), अमार्गदायी सन् (शत्रूणां प्रवेशम् अदत्त्वा इत्यर्थः) विजयाय तपांसि कुरु"—इति मुनिः (व्यासः) माम् अलं (भृशम्) अन्वशात् (उपदिदेश) ; वलिनः अस्य (वराहस्य) वधात् ऋते अन्यथा व्रतसंरक्षणं कर्त्तुं न शक्यते ।

Eng.—"O child, go on with penance for victory, without allowing access to enemy"—so Vyasa strongly advised me. And it is otherwise impossible to safeguard penance except by killing this boar.

[N. B.—So I will kill this boar].

Beng.—"হে বৎস, শত্রুর প্রবেশ না দিয়া, তুমি জয়ের জন্য তপস্যা করিও"—মুনি ব্যাস আমাকে সজোড়ে এই উপদেশ দিয়াছিলেন ; এবং এই বরাহের বধ ব্যতীত অন্য উপায়ে তপোরক্ষা করা অসম্ভব। [N. B.—তাই আমি বরাহকে মারিব]

Malli.—अथ तपोविरोधिनी हिंसा इत्याशङ्क्याह, कुर्विति—हे 'तात' वत्स, मार्गदायी न भवतीति 'अमार्गदायी' रन्ध्रान्वेषिणां प्रवेशम् अयच्छन् इत्यर्थः। कुतः ? —जयार्थित्वात। इत्याह—'विजयाय तपांसि कुरु इति मुनिः' व्यासः 'माम् अलम्' भृशम 'अन्वशात्' अनुशिष्टवान् [अनुशासेर्लङ्]। ननु मुनिः वा कथमधर्म्मम अन्वशात ? तत्राह—वलिन इति। 'अस्य' मृगस्य 'वलिनः' प्रबलस्य च 'वधात ऋते' वधं विना ["अन्यारादितरर्त्ते—" इत्यादिना पञ्चमी] 'अन्यथा' उपायान्तरेण 'व्रतसंरक्षणं' तपोरक्षणं 'कर्त्तुं न शक्यते'। [हिंसापि दुष्टनिग्रहात्मिका न अधर्म्मः इत्यर्थः] ॥ १३ ॥

Charcha

1. कुरु—कृ + लोट हि। Do. Nom. त्वम्।

2. अमार्गदायी—मार्ग is loophole. मार्गं (प्रवेशमार्गं) ददातीति मार्ग + दा + णिनि कर्त्तरि = मार्गदायी। न मार्गदायी, नञ् तत्। Pred. to त्वम्

understood. During penance don't allow your enemy to attack you.

3 विजयाय—वि+जि+अच् भावे=विजय victory. तस्मै। "तुमर्थाच्च भाववचनात्" इति ४र्थी॥ अलम्—an अव्यय meaning 'strongly'. Adv. Qual. अन्वशात्।

4. अन्वशात्—अनु+शास+लङ् द्। Did advise Nom. मुनिः।

5. वधात्—ऋतेशब्द योगे ५मी। See also Malli for Gram.

6. शक्यम्—शक + यत कर्मणि। Is capable (to be done). Nom. मया understood. Agrees with उक्तकर्म व्रतसंरक्षणम्। As my word cannot be safeguarded but by its destruction, so its (boar's) destruction here is justified. See Malli also "हिंसापि .. न अधर्मः"।

14. So Arjuna takes up an arrow.

इति तेन विचिन्त्य चापनाम प्रथमं पौरुषचिह्नमाललम्बे।
उपलब्धगुणः परस्य भेदे सचिवः शुद्ध इवाददे च बाणः॥१४॥

Prose.—तेन (अर्जुनेन) इति विचिन्त्य चापनाम (चापाख्यं) प्रथमं पौरुषचिह्नम् आलम्बे (गृहीतम); परस्य (शत्रोः) भेदे उपलब्धगुणः शुद्धः सचिवः इव बाणः च तेन आददे।

Eng.—Thus thinking Arjuna assumed the first sign of manliness known as bow; and he took resort to a straight fit arrow like unto a frank and able minister.

Malli—'तेन' अर्जुनेन 'इति' इत्थं 'विचिन्त्य' वितर्क्य 'चापनाम' चापाख्यं 'प्रथमं पौरुषचिह्नं' तस्य मुख्यायुधत्वात् इति भावः। 'आललम्बे' गृहीतम [कर्मणि लिट्]। अथ 'परस्य शत्रोः 'भेदे' विदारणे उपजापे च 'उपलब्धगुणः' जातशक्तिः, बाणस्तु प्राप्तमौर्वीकश्च इति शेषः। 'शुद्धः' ऋजुः, दिग्धत्वादिदोषरहितो

वा ["न कर्णभिद्रैः नों दिग्धैर्नाग्निज्वलिततेजनैः" इति निषेधात् अन्यत्र—'शुद्धो' निर्मलचित्त इति यावत्। 'बाणश्च सचिव इव आददे' जगृहे। [अत्र बाणसचिवयोः शब्दमात्रसाधर्म्यात् श्लेषालङ्कारः प्रकृताप्रकृतविषय इति सर्वस्वकारः। उपमैव इति केचित्]॥ १४॥

Charcha.

1. चापनाम—चाप bow. चापं नाम (अभिधानं) यस्य, known as bow, बहु। Qual. पौरुषचिह्नम्। As use of bow shows one's manliness, so it is said as चापनाम।

2. पौरुषचिह्नम्—पुरुषस्य इदम् इति पुरुष + अण् = पौरुषम् manliness. पौरुषस्य चिह्नम्, ६तत्। Obj. i. e. उक्तकर्म of आललम्बे। आ + लम्ब + लिट् ए कर्मणि = आललम्बे was adopted. Nom. i. e., अनुक्त कर्त्ता is तेन।

3. उपलब्धगुणः—It applies both to सचिव and बाण। सचिवपक्षे उपलब्धः (अधिगतः) गुणः (शौर्य्यादिः) यस्य, बहु। बाणपक्षे—उपलब्धः (प्राप्तः) गुणः (मौर्वीरूपः) येन, बहु। See Malli also.

4. भिदे—In case of बाण it means विदारण, and in case of सचिव it means internal estrangement of शत्रुपक्ष। अधि' ७मी ॥ परस्य has अनुक्तौ कृदयोगे कर्मणि षष्ठी।

5. आददे—आ + दा + लिट् ए कर्मणि। Was taken. Nom. तेन।

15. The bow favourably drawn.

अनुभाववता गुरु स्थिरत्वात् अविसंवादि धनुर्धनञ्जयेन।
स्वबलव्यसनेपि पीड्यमानं गुणवन्मित्रमिवानतिं प्रपेदे ॥ १५ ॥

Prose.—गुरु, स्थिरत्वात् अविसंवादि (अभङ्गुरम्) गुणवत् धनुः, अनुभाववता धनञ्जयेन स्वबल्व्यसने (तपसा स्वबलक्षये) सति अपि पीड्यमानं (सत्) मित्रमिव आनतिं (नम्रतां) प्रपेदे (भेजे)।

Eng.—The huge, non-brittle owing to solidity, and strung

bow, being drawn by resolute Arjuna even in his emaciation, attained pliancy like an honourable, firm, qualified friend, though requested during his loss of wealth.

Beng.—বিশাল, সারত্বহেতু অভঙ্গুর, সজ্য সেই ধনু, নিশ্চয়বুদ্ধিযুক্ত অর্জ্জুনকর্ত্তৃক তপঃ ক্ষীনাবস্থায়ও আকৃষ্যমাণ হইয়া, পূজ্য অসত্যরহিত গুণবান্ ধনক্ষয়াবস্থায় ও অনুরুদ্ধ সন্মিত্রের ন্যায় নম্রতা ধারণ করিল।

Malli.—'गुरु' महत् पूज्यं च ; 'स्थिरत्वात्' सारवत्वात् 'अविसंवादि' अभङ्गुरम् अन्यत्र—प्रतिष्ठितत्वात् असत्यरहितं ; 'गुणवत्' सज्यम्, अन्यत्र—औदार्य्यादिगुणवत् ; 'धनु: मित्रमिव', 'अनुभाववता' निश्चयबुद्धिमता ["अनुभाव: प्रभावे च सतां मतिनिश्चये" इत्यमर:] 'धनञ्जयेन स्वबलव्यसनेपि' तपसा क्षीणत्वेपि, अन्यत्र—'स्वं' च धनं तदेव 'बलं' तस्य 'व्यसने' नाशेपि 'पीड्यमानम्' आकृष्यमाणम्, अवरुद्ध्यमानञ्च सन्मित्रमिव 'आनतिं' नम्रताम् आनुकूल्यञ्च 'प्रपेदे'। [अलङ्कारश्च पूर्व्ववत्] ॥१५॥

Charcha.

1. अनुगत: भाव: इति अनुभाव: majesty or resolution. प्रादितत्। स अस्ति यस्य इति अनुभाव + वतुप् = अनुभाववत् having resolution. तेन। Qual. धनञ्जयेन (which has अनुक्तें कर्त्तरि ३या—अनुक्त कर्त्ता of पीड्यमानम्)॥ स्थिरत्वात्—See Malli for meaning—हेतौ ५मी॥

2. गुरु, अविसंवादि, गुणवत्—These qualify both धनु and मित्रम्। For meaning in either cases, See Malli.

3. स्वबलव्यसने—स्वस्यबलम्, ६तत्। तस्य व्यसनं (नाश:) ६तत्। तस्मिन्। Arjuna's बलनाश was due to तपस्या। भावे ७मी। In case of मित्र—स्वबलव्यसन is धनबलनाश (See Malli). A good friend being requested (पीड्यमानं सत्) comes to one's help though he is in a state of poverty. So his good धनु: being drawn in

his emaciated state, became pliant. This indicated favourableness of his धनुः।

4. पीड्यमानम्—पीड़+शानच कर्म्मणि। Qual. both धनुः and मित्रम्। For meaning See Malli.

5. प्रपेदे—प्र+पद+लिट ए। Attained. Nom. धनुः and मित्रम्॥ This धनुः was गाण्डीव; for Arjuna's धनुः was गाण्डीव। See next Sloka. आनतिं प्रपेदे in case of मित्र means नम्रतां भेजे, and in case of धनुः means आनुकूल्यं भेजे।

16. Thus गाण्डीव *being drawn, all trembled.*

प्रविकर्षणिनादभिन्नरन्ध्रः पदविष्टम्भनिपीड़ितस्तदानीम्।
अधिरोहति गाण्डिवं महेषौ सकलः संशयमारुरोह शैलः॥१६॥

Prose.—तदानीं महेषौ (अर्जुनगृहीते वाणे) गाण्डिवं अधिरोहति (सति), प्रविकर्षणिनादभिन्नरन्ध्रः पादविष्टम्भनिपीड़ितः सकलः शैलः संशयं (नाशसंशयम्) आरुरोह।

Eng. &c.—Then the great arrow being put to Arjuna's bow named Gandiva, the entire mountain with its caves rent asunder by the sound of this drawing, and being pressed by his footstep, attained a dubious position.

Malli.—'तदानीं' तस्मिन् काले 'महेषौ' वाणे 'गाण्डिवम्' अर्जुनधनुः 'अधिरोहति' सति ["कपिध्वजस्य गाण्डीवगाण्डिवौ पुंनपुंसकौ" इत्यमरः। "गाण्ड्यजगात् संज्ञायाम्" इति वप्रत्ययः] 'प्रविकर्षणिनादभिन्नरन्ध्रः' प्रविकर्षण ज्यास्फालनेन यो निनादः तेन भिन्नरन्ध्रः विदलितगह्वरः, तथा 'पदविष्टम्भनिपीड़ित.' पदविष्टम्भेन पादाक्रमणेन निपीड़ितः नुन्नः 'सकलः सर्व्वः 'शैलः 'संशयम्' जीवितसन्देहम् 'आरुरोह' प्राप इत्यर्थः। [अत्र शैलस्य संशयासम्बन्धेऽपि सम्बन्धकथनात् अतिशयोक्तिरलङ्कारः] ॥ १६ ॥

Charcha.

1. प्रविकर्ष etc.—प्र + वि + कृष + घञ् = प्रविकर्ष drawing. नि + नद + घञ् = निनाद sound. रन्ध्र is गह्वर (hole), प्रविकर्षेण निनादः, सुप्सुपा। भिन्नं (विदलितं) रन्ध्रं यस्य, whose holes were pounded (i. e. pounded through echo of drawing of bow.) बहु। प्रविकर्ष-निनादेन भिन्नरन्ध्रः, सुप्सुपा। Or—प्रविकर्षनादेन भिन्नम्, ३तत्। तादृशं रन्ध्रं यस्य बहु। Qual. शैलः। The echo of धनुः शब्दः in hole of mountain, seemed to burst it open.

2. पदविष्टम्भ etc.—वि + स्तम्भ + घञ् = विष्टम्भ weight. पदस्य विष्टम्भः, ६तत्। तेन निपीड़ितः pressed by weight of footsteps, ३तत्। Qual. शैलः। The mountain was pressed through Arjuna's पपदपात ; this proves his manliness and prowess.

3. अधिरोहति—अधि + रुह + शतृ। Pred. to महेषौ॥ महान् इषुः (वाणः), कर्मधा। तस्मिन्। भावे ७मी॥ Both गाण्डीव and गाण्डिव refers to Arjuna's bow, See Malli. and comp. "गाण्डीवधन्वा" in Canto XI. Sl. 16.

4. आरुरोह—आ + रुह + लिट अ। mounted to i. e attained. Nom. शैलः।

17. Arjuna terrible.

ददृशेऽथ सविस्मयं शिवेन स्थिरपूर्णायतचापमण्डलस्थः।
रचितस्त्रिसृणां पुरां विधातुं वधमात्मेव भयानकः परेषाम् ॥१७॥

Prak.—सः शिवेन सविस्मयं ददृशे। When did Siva look wonderfully on Arjuna?—स्थिरपूर्णायतचापमण्डलस्थः सः [Arjuna was so looked by Siva when he (Arjuna) was within the circle of the bow drawn in by him fully and tightly, and remained fixed in

that posture]. How was that like ?—तिसृणां पुरां वधं विधातुं रचितः आत्मा इव सः [Arjuna appeared like Siva's ownself when he (Siva) was about to destroy the city of Tripurasura]. A terrible sight indeed—आत्मा इव परेषां भयानकः (सन्) [Yes ; he was thus a terror to his enemies ; so grim was his posture then. And Siva eyed him with wonder when Arjuna was in this attitude].

Prose—अथ स्थिरपूर्णायतचापमण्डलस्थः सः (अर्जुनः), तिसृणां पुरां वधं विधातुं रचितः आत्मा इव परेषां भयानकः (सन्), शिवेन सविस्मयं ददृशे।

Eng.—Now Arjuna being within the circle of his bow drawn firmly and fully, was looked on wonderfully by Siva ; for he was then terrible to his enemies like Siva's own-self, placed in the attitude of destroying the city of Tripurasura.

Beng.—নিশ্চল ও পূর্ণভাবে ধনুরাকর্ষণ করিয়া সেই মণ্ডলে থাকায় অর্জ্জুন ত্রিপুরনাশে স্থাপিত স্বাত্মার অর্থাৎ শিবের ন্যায় শত্রুর পক্ষে ভীষণ হইলেন। এই সময় শিব তাকে বিস্ময়ের সহিত দেখিতেছিলেন।

Malli.—'अथ' बाणसन्धानानन्तरं 'शिवेन', स्थिरपूर्णायतचापमण्डलस्थः स्थिरं निश्चलं पूर्णं च यथा तथा आयते आकृष्टे-चापमण्डले तिष्ठतीति तथोक्तः, चापमण्डल-मन्तर्गाय स्थित इत्यर्थः, 'तिसृणां' ["नतिसृचतसृ" इति दीर्घप्रतिषेधः] 'पुरां' त्रिपुरासुरस्य इत्यर्थः 'वधं' संहारं 'विधातुं कर्त्तुं' 'रचितः' कल्पितः स्थानविशेषे स्थापित इति यावत्, 'आत्मा' स्वयम् इव परेषां भयानकः' भयङ्करः सः अर्जुनः 'सविस्मयं ददृशे' दृष्टः। [उपमा अलङ्कारः] ॥ १७ ॥

Charcha.

1. ददृशे—दृश+लिट ए कर्मणि। Was seen. अनुक्त कर्त्ता is शिवेन। Here उक्तकर्म्म is सः understood.

2. सविस्मयम्—वि + स्मि + अच् भावे = विस्मयः wonder. तेन सह वर्त्तमानं, तत् यथा तथा, बहु—by "तेन सहेति तुल्ययोगे"। Adv. Qual. ददृशे। सहविस्मयम् is also correct by the rule "वोपसर्जनस्य"।

3. स्थिरपूर्ण etc.—आ + यम + क्त कर्म्मणि = आयत drawn. स्थिरं च तत् पूर्णं च स्थिरपूर्णं, खञ्जकुब्जादिवत् विशेषणद्वयस्य कर्म्मधा। स्थिरपूर्णं यथा तथा आयतम् drawn firmly and fully, सुप् सुपा। तादृशं चापमण्डलं, कर्म्मधा। तत्र तिष्ठति यः इति स्थिरपूर्णायतचापमण्डल + स्था + क कर्त्तरि। उपपदतत्। Qual. सः। Such Arjuna appeared like Siva himself.

4. पुराम्—The base पुर् is fem. like गिर्। कृद्योगे कर्म्मणि षष्ठी in connection with कृत in वधम्। हन + अप् भावे = वधः destruction. तम्। Obj. of विधातुम् (वि + धा + तुमुन्)।

5. आत्मा इव—Refers to Siva's own self in the attitude of destroying the city of त्रिपुरासुर। Arjuna is in this attitude compared to Siva's above posture.

6. भयानकः—Her was thus terrible to his enemies (परेषाम्)। Qual. सः understood परेषाम् has शेषविवक्षया षष्ठी॥

18. Siva also draws his bow to kill the boar.

विचकर्ष च संहितेषुरुच्चैः चरणास्कन्दननामिताचलेन्द्रः।
धनुरायतभोगवासुकिज्यावदनग्रन्थिविमुक्तवह्नि शम्भुः॥१८॥

Prose—शम्भुः च संहितेषुः (योजितवाणः सन्) तथा उच्चैः चरणास्कन्दननामिताचलेन्द्रः (सन्), आयतभोगवासुकिज्यावदनग्रन्थिविमुक्तवह्नि धनुः विचकर्ष।

Eng.—Having fit the arrow, Siva by his foot-fall terribly lowered the king of mountains (i. e., Himalaya), and drew his bow which emitted fire from its knot in the shape of mouth

of Vasuki whose huge body (? hood) was made into the string (of his bow).

Beng.—শিব ও বাণ যোজনা করিয়া তদীয় পাদভরে পর্ব্বতরাজ হিমালয়কে ভীষণভাবে নামিত করিয়া, ধনুরাকর্ষণ করিলেন। বাসুকির বিশালকায় ঐ ধনুর ছিলা হইয়াছিল এবং তখন তদীয় বদনগ্রন্থি হইতে অগ্নি বাহির হইতেছিল ।

Malli.—अथ पिनाकिवृत्तान्तमाह – विचकर्षेति । अथ 'शम्भुश्च संहितेषुः' सन् 'उच्चैः' भृशं 'चरणास्कन्दननामिताचलेन्द्रः' चरणास्कन्दनेन पादविष्टम्भेन नामितः अधोनीतः अचलेन्द्रो येन सः तथोक्तः (? सन्)। 'आयतभोगवासुकिज्यावदनग्रन्थिविमुक्तवह्नि' आयतभोगः आकृष्टकायः वासुकिः एव ज्या तस्य वदनमेव ग्रन्थिः तेन विमुक्तः उत्सृष्टो वह्निः यस्य तत् 'धनुः विचकर्ष' [इति स्वभावोक्तिः]॥ १८ ॥

Charcha.

1. विचकर्ष—वि + कृष + लिट्, अ। Drew. Nom. शम्भुः।

2. संहितेषुः—इषु is वाण। सम् + धा + क्त कर्म्मणि = संहित i. e., योजित (placed). संहितः इषुः येन, बहु। Pred. to शम्भुः।

3. चरणा etc.—आ + स्कन्द + ल्युट भावे = आस्कन्दन trampling. चरणेन आस्कन्दनम्, ३तत्। तेन नामितः, ३तत्। तादृशः अचलेन्द्रः येन, बहु। Or – चरणास्कन्दनेन नामिताचलेन्द्रः, सुप् सुपा। Pred. to शम्भुः। नम + णिच् + क्त = नामित or नमित lowered. अचल is mountain ; तेषाम् or तेषु इन्द्रः (श्रेष्ठः), ६तत् वा सुप्सुपा। अचलेन्द्र refers to हिमालय।

4. आयतभोग etc.—भोग is lit. hood of serpent ; here it better refers to 'body'. आ + यम + क्त कर्त्तरि = आयत i. e., विस्तृत (huge). Malli renders आयत as आकृष्ट। Both suit us. आयतः भोगः यस्य, बहु। आयतभोगः वासुकिः (सर्पराजः), कर्म्मधा। स एव ज्या, कर्म्मधा। वदनमेवग्रन्थिः, कर्म्मधा। आयतभोगवासुकिज्यायाः वदनग्रन्थिः, ६तत्। तस्मात् विमुक्तः, सुप् सुपा।

तादृशः वह्निः यस्य or यस्मात्, बहु। Qual. धनुः। Thus it suggests terribleness of the धनुः।

19 *The enemy (i. e. boar) in the midst of Arjuna & Siva.*

स भवस्य भवक्षयैकहेतोः सितसप्तेश्च विधास्यतोः सहार्थम् ।
रिपुराप पराभवाय मध्यं प्रकृतिप्रत्यययोरिवानुबन्धः ॥१९॥

Prose.—रिपुः (वराहः), सहार्थं (अरिवधरूपं मिलितार्थं) विधास्यतोः भवक्षयैकहेतोः भवस्य सितसप्तेः (अर्जुनस्य) च मध्यं, अनुबन्धः प्रकृतिप्रत्यययोः मध्यमिव पराभवाय प्राप।

Eng.—The enemy (i. e., the boar) came but to die in the midst of Siva the cause of severing the sansar and of Arjuna both of whom together were doing the same purpose (of killing the enemy), like the eliding word (i. e , *Anubandha*) coming to meet destruction between a root (Prakriti) and the affix (Pratyaya).

Beng.—শত্রু সেই বরাহ, শত্রুবধরূপ এক কার্য্য করণে রত উভয়ের অর্থাৎ ভবোচ্ছেদকর শিব ও অর্জ্জুনের মধ্যে, মৃত্যুর জন্য আসিল, যেমন ইৎসংজ্ঞকবর্ণ, প্রকৃতি ধাত্বাদি ও প্রত্যয় সনাদির মধ্যে আসিয়া লোপ পায়।

Malli.—'सहार्थं' सह सम्भूय अर्थम् अरिवधरूपप्रयोजनं 'विधास्यतोः' करिष्यतोः ; अन्यत्र—सहार्थम् अभिधेयम् अभिधास्यतोः इत्यर्थः ["प्रकृतिप्रत्ययौ सहार्थं ब्रूतः" इति वचनात्]। 'भवक्षयैकहेतोः' संसारोच्छेदनिदानस्य 'भवस्य' शिवस्य 'सितसप्तेः' अर्जुनस्य 'च', 'मध्यं' स 'रिपुः' वराहः 'प्रकृतिप्रत्यययोः' यस्मात् प्रत्ययौ विधीयेते सा प्रकृतिः धात्वादिः, सनादिः प्रत्ययः तयोः, मध्यम् 'अनुबन्धः' इत्संज्ञकः वर्णः [यथा भूतं भूतिः इत्यादौ ककारः]। स 'इव पराभवाय' लोपार्थमेव 'आप' न तु स्थित्यर्थम् इत्यर्थः ॥ १९ ॥

Charcha

1. भवक्षय etc.—एकः (मुख्यः) हेतुः sole cause, कर्म्मधा। भवतीति भू+अच् कर्त्तरि=भवः 'Siva', also 'Sansara'. Cp. "भवतीति भवः। भवोदेवः संसारश्च"—*Kasika* भवस्य क्षयः destruction of sansara (re birth). ६तत्। भवक्षयस्य एकहेतुः, ६तत। तस्य। Qual भवस्य (which refers to Siva). भवस्य has शेषे ६ष्ठी being related to मध्यम्।

2. सितसप्तेः—सप्ति horse. सित white. सिताः सप्तयः यस्य, बहु। तस्य। शेषे ६ष्ठी, related to मध्यम। Arjuna was so called, for his horses in the chariot were white.

3. विधास्यतोः—वि+धा+लृटः स्थाने शतृ=विधास्यत doing. तयोः। Qual. both भवस्य and सितसप्तेः jointly ; hence dual. Also it qualifies प्रकृतिप्रत्यययोः॥ सहार्थम् means both मिलितार्थम् and अभिधेयार्थम् see Malli. Both Siva and Arjuna were going to do मिलितार्थ in the shape of अरिवध, as both root & affix together signify the same अभिधेयार्थ।

4. आप—आप+लिट ण। Attain d. Nom. रिपुः।

5. पराभवाय—परा+भू+अप् भावे=पराभवः defeat. elision. तस्मै। तादर्थ्य ४र्थी or कर्म्मणि ४र्थी by the rule "क्रियार्थोपपदस्य च कर्म्मणि स्थानिन."। Thus पराभवाय=पराभवम् अधिगन्तुम्।

6. प्रकृतिप्रत्यययोः—प्रकृति is the original root it is compared to Siva (भव) and प्रत्यय the affix is compared to अर्जुन here शेषे ६ष्ठी, related to मध्यम्।

7. अनुबन्धः—अनुबन्ध in grammar is the eliding word as क् in क्त and क्तवत् and ल् उ &c. in लुट् &c. It is उपमान of रिपुः। For the simile here see Malli. & also Eng. above.

20 Arrow thrown from Pinaka.

अथ दीपितवारिवाहवर्त्मा रवविवासितवारणादवार्य्यः ।
निपपात जवादिषुः पिनाकात् महतोऽभ्रादिव वैद्युतः कृशानुः ॥२०

Prose.—अथ दीपितवारिवाहवर्त्मा अवार्य्यः इषुः (शिववाणः), रवविवासितवारणात् पिनाकात् महतः अभ्रात् (मेघात्) वैद्युतः कृशानुः (अशनिः इत्यर्थः) इव, जवात् निपपात ।

Eng.—Now the invincible arrow that lighted up the sky, fell with great velocity from Pinaka whose sound terrified the elephants, like the fire of lightning (i e , thunderbolt) falling from a huge cloud.

Malli.—'अथ' रिपोः मध्यप्रवेशानन्तरं 'दीपितवारिवाहवर्त्मा' दीपितं वारिवाहवर्त्म आकाशं येन सः 'अवार्य्यः' दुर्वारः 'इषुः' शरः 'रवविवासितवारणात्' स्वघोषभीषितगजात् 'पिनाकात्' शिवधनुषः ["पिनाकोऽजगवं धनुः" इत्यमरः] 'महतः अभ्रात्' मेघात् विद्युतोऽयं 'वैद्युतः कृशानुः' अशनिः 'इव जवात्' वेगात् 'निपपात' आदधाव ॥ २० ॥

Charcha.

1. दीपित etc —वारिवहतीति वारि + वह + अण्, कर्त्तरि = वारिवाहः cloud. तस्य वर्त्म (track), ६तत् । दीपितं वारिवाहवर्त्म येन, बहु । Qual. इषुः । The epithet is to match इषु here with the firing thunderbolt.

2. रवविवासित etc.—वारण elephant. रवेण विवासितम् , ३तत् । रवविवासितं वारणं येन, बहु । तस्मात् । Qual. पिनाकात् । This is to compare पिनाक with a rumbling cloud.

3. निपपात—नि + पत + लिट अ । Fell. Nom. इषुः & कृशानुः (which are here compared).

4. जवात्—हेतौ ५मी। वा ल्यप् लोपे ५मी ; thus जवमाश्रित्य = जवात्।

5. पिनाकात्—अपादाने ५मी। It is compared to महत: श्वभ्रात्।

21. Terrible sound followed therefrom.

व्रजतोऽस्य बृहत्पतत्रजन्मा कृततार्क्ष्योपनिपातवेगशङ्कः।
प्रतिनादमहान् महोरगाणां हृदयश्रोत्रभिदुत्पपात नादः ॥२१॥

Prak.—व्रजत: अस्य (बाणस्य) नाद: उत्पपात [As the arrow proceeded on, a sound arose]. What kind of sound was it ?—प्रतिनादमहान् नाद: [The sound was a great one due to echo in the mountain-caves &c.] But how such sound issued from a mere arrow ?—बृहत्पतत्रजन्मा नाद: [The sound arose from the long feathers of the arrow. As the arrow proceeded with great velocity so a sound of feathers due to motion in the air came out]. What more of this sound ?—कृततार्क्ष्योपनिपातवेगशङ्क: [From the sound due to motion of the arrow, it seemed as if Garuda was in flight at that spot ; so great and terrible was the sound]. And then what was its effect there ?—महोरगाणां हृदयश्रोत्रभित् नाद: [The sound being taken as that of Garuda it naturally pierced so to say, the ear and the heart of great snakes there Now I think, you can guess the magnitude of the sound].

Prose.—व्रजत: अस्य (बाणस्य) बृहत्पतत्रजन्मा कृततार्क्ष्योपनिपातवेगशङ्क: (अत:) महोरगाणां हृदयश्रोत्रभित् प्रतिनादमहान् नाद: उत्पपात।

Eng.—As the arrow proceeded on a sound arising from its feathers and doubled by reverberation issued ; this sound produced the apprehension of the flight of Garuda and so pierced (so to say) the ears and heart of great serpents there.

Beng.—বাণটী যখন ছুটিতেছিল, তখন উহার বৃহৎ পক্ষ হইতে প্রতিধ্বনিবর্দ্ধিত শব্দ উত্থিত হইল। এই শব্দ গরুড়াগমের ভ্রম ঘটাইয়া বিশাল সর্পগণের কর্ণ ও হৃদয় ভেদকারী হইয়াছিল।

Malli.—'व्रजतः' धावतः 'अस्य' बाणस्य 'बृहत्पतत्रजन्मा' बृहद्भ्यः पतत्रेभ्यः पक्षेभ्यः जन्म यस्य स तथोक्तः, कृततार्क्ष्योपनिपातवेगशङ्कः, कृता तार्क्ष्योपनिपातवेगशङ्का गरुड़ागमनवेगभ्रमो येन स, अतएव 'महोरगाणां' सर्पाणां हृदयानि ग्रीवाणि च भिनत्तीति 'हृदयग्रीवभित्' ["सप्तम्याश्रयात् षः" इति सूत्रे पूर्व्वनिपातव्यभिचारः (See char.)] 'प्रतिनादमहान्' प्रतिनादैः प्रतिध्वनिभिः महान् स मूर्च्छितः नादः उत्पपात। [अत्र नादस्य उरगहृदयभेदकत्वासम्बन्धेऽपि सम्बन्धाभिधानात् अतिशयोक्तिः। सा च तार्क्ष्यवेगभ्रमोत्थापिता इति (? भ्रान्तिमानलङ्कारः) तयो- रङ्गाङ्गिभावेन (च ?) सङ्करः] ॥ २१ ॥

N. B.—Here Malli's reading seems defective. It is corrected here.

Charcha

1. बृहत् etc.—पतत्रं वायते इति पतत् + त्रै + क कर्त्तरि = पतत्र feather, wing. बृहत् पतत्रम्, कर्म्मधा। तस्मात् जन्म यस्य, व्यधिकरण बहु। Cp. "अवर्ज्यो हि बहुव्रीहिः जन्माद्युत्तरपदः"—*Vamana.* Qual. नादः।

2. कृत etc.—तार्क्ष्य is Garuda. तार्क्ष्यस्य उपनिपातवेगः (आगमनवेगः), ६तत्। तस्य शङ्का, ६तत्। कृता तार्क्ष्योपनिपातवेगशङ्का येन, बहु। Qual. नादः See Prak and Malli for the idea here.

3. प्रतिनादमहान्—प्रति + नद + घञ् भावे = प्रतिनादः echo. तेन महान् (प्रवृद्धः), ३तत् वा सुप्सुपा (for acc. to some हेतुतृतीया also enters into ३यातत् compound—Cp. "हेतुतृतीययापि समासः इष्यते"—*Jnanendra*). Qual. नादः।

4. हृदय etc.—हृदयानि च ग्रीवाणि च हृदयग्रीवम्, प्राण्यङ्गत्वात्

एकवद्भाव: । तत्भिनत्ति इति हृदयग्रीव + भिद + क्विप् = हृदयग्रीवभित् । Qual. नाद: ।

5. उत्पपात—उद् + पत + लिट श्र । Arose. Nom. नाद: । The नाद was of flying (व्रजत:) arrow (श्रस्य) ।

22. Course of Siva's arrow.

नयनादिव शूलिन: प्रवृत्तै: मनसोप्याशुतरं यत: पिशङ्गै: ।
विदधे विलसत्तडिल्लताभै: किरणैर्व्योमनि मार्गणस्य मार्ग: ॥२२॥

Prak—व्योमनि मार्गणस्य मार्ग: विदधे [The flight of the arrow was marked in the sky]. But the arrow's course is very quick —मनस: अपि आशुतरंयत: मार्गणस्य । [The arrow's course was quicker than mind's course]. How then was the focreful flight marked ?—किरणै: मार्ग: विदधे [The course of the arrow was marked by rays issuing from the arrow.]. But were the rays bright enough to become visibie during flight of the arrow ?—पिशङ्गै: (च) विलसत्तडिल्लताभै: किरणै: [The rays were brown and resplendent like flesh of lightning. So it was visible in the sky and this marked the course of the arrow]. Anything more of the rays ? —शूलिन: नयनात इव प्रवृत्तै: किरणै: [The rays were also bright and dazzling like the light that issues from Siva's eyes. So this was easily visible to all in the sky during its flight].

Prose.—शूलिन: (शिवस्य) नयनात् प्रवृत्तै: इव (उज्ज्वलै:) (च) पिशङ्गै: (तथा) विलसत्तडिल्लताभै: किरणै:, मनस: अपि आशुतरं यत: (गच्छत:) मार्गणस्य मार्ग: व्योमनि विदधे (रचित:) ।

Eng.—The course of the arrow that flew more quickly

than one's mind even, was marked out in the sky by brown rays resembling flash of lightning and that was bright like light issued from Siva's eye.

Beng.—শিবের নেত্রপ্রসৃত কিরণের ন্যায় উজ্জ্বল, পিঙ্গল ওবিস্ফুরিত বিদ্যুতের ন্যায় দীপ্যমান তেজোরাশিদ্বারা বাণের গমনমার্গ আকাশে রচিত হইল।

Malli.—'शूलिन: नयनात् प्रवृत्तै:' निर्गतै: इवस्थितै: [इति उत्प्रेक्षा], नेत्राग्निशिखाकल्पै: इत्यर्थ:। 'पिशङ्गै:' पिङ्गलै: 'विलसत्तडिल्लताभै:' विद्युद्दामतुल्यै: [इत्युपमा], 'मनस:' चित्तात् 'अपि आशुतर' शीघ्रतर [आशुशब्दात् अनव्ययात् तरप्। अत: 'किमेतिङ्अव्ययघात् आमु अद्रवप्रकर्षे" इति आम् प्रत्ययो न। "क्लीवे शीघ्राद्यसत्त्वे स्यात, त्रिष्वेषां सत्त्वगामिवत्" इत्यमर:] 'यत:' [इण: शतृप्रत्यय:] 'मार्गणस्य' शरस्य ["कलम्बमार्गणशरा:" इत्यमर:] 'किरणै:, व्योमनि' आकाशे 'मार्ग:' उल्काशिखाकार: पन्था: 'विदधे' विरचित: [इति स्वभावोक्तिरलङ्कार:] ॥२२॥

Charcha

1. नयनात्—अपादाने ५मी ॥ प्रवृत्तै:—प्र + वृत + क्त कर्त्तरि = प्रवृत्त: issued. नै:। Qual. किरणै:। 'इव' here implies उपमा and not उत्प्रेक्षा as Malli says. Malli's synonym here as नेत्राग्निशिखाकल्पै: also contradicts his उत्प्रेक्षा here। It suggests उपमा। Thus नयनात् प्रवृत्तै (उज्ज्वलै:) किरणै: इव मार्गणस्य किरणै: मार्ग: विदधे - is the construction here The light of arrow was resplendent like light coming from Siva's eye.

2. मनस:—अपादाने ५मी ॥ For notes on आशुतर see Malli.

3. यत:—इ धातु गतौ + शतृ = यत् going. तस्य। Qual. मार्गणस्य।

4. विदधे—वि + धा + लिट ए कर्म्मणि। Was marked. Nom. किरणै:। Its उक्तकर्म्म is मार्ग:।

5. विलसत्तड़िल्लताभैः—वि + लस + शतृ + ङीप् = विलसन्ती shining. विलसन्ती तडित् (flashing lightning) इति विलसत्तड़ित्, by पुंवद्भाव in कर्म्मधा। तस्याः लता ६तत्। ताभिः तुल्याः इति विलसत्तडिल्लताभाः, नित्यसमास of तृतीया तत् class as in तमालनिभ in sl. 24. Or—better विलसत्तड़िल्लतायाः आभा (श्रीः), ६तत्। विलसत्तड़िल्लताभाः इव आभा यस्य बहु—with उत्तरपदलोप by the Varttika "सप्तम्युपमानपूर्ब्बस्य उत्तरपदलोपश्च वक्तव्यः"। तैः। Qual. किरणैः।

6. व्योमनि—व्योमन् sky. तस्मिन्। अधिं ७मी। व्योम्नि is also correct in the seventh singular of व्योमन्।

23. Arrow's velocity described.

अपयन् धनुषः शिवान्तिकस्थैः विवरेसद्भिरभिख्यया जिहानः।
युगपत् ददृशे विशन् वराहं तदुपोढ़ैश्च नभश्चरैः पृषत्कः ॥२३॥

Prak.—पृषत्कः युगपत् ददृशे [The arrow was simultaneously seen by all]. By whom and when was it simultaneously seen ? धनुषः अपयन शिवान्तिकस्थैः नभश्चरैः ददृशे [It was first seen by beings in heaven that were near Siva, when it issued from the bow of Siva]. And who else saw it at that very time ? अभिख्यया जिहानः विवरेसद्भिः ददृशे [As the arrow was coursing its aerial way it was seen by heavenly creatures in the heaven]. Is this all ?—वराहं विशन् तदुपोढैः नभश्चरैः च ददृशे [Lastly as the arrow went deep into the boar's body, then it was seen by heavenly beings near the boar. The seeing of the arrow by all these at its different position was done at the same time (युगपत)। This was evidently due to the extreme velocity of the arrow].

Prose—पृषत्कः धनुषः अपयन् शिवान्तिकस्थैः नभश्चरैः, अभिख्यया (शोभया) जिहानः (आकाशे गच्छन्) विवरेसद्भिः, च वराहं विशन् तदुपोढैः (तत्प्रत्यासन्नैः) नभश्चरैः युगपत् ददृशे

Eng.—The arrow thrown from the bow was seen by heavenly beings near Siva, simultaneously was it seen by aerial creatures while shiningly proceeding, simultaneously again was it seen while entering the boar's body by heavenly beings near the animal.

[N. B.—The simultaneous seeing of the arrow by heavenly creatures stationed at different positions indicate its velocity. So great was its force that all saw it at the same time so to say]

Beng.—ধনু হইতে বহির্গত হইলে বাণটী শিবনিকটস্থ নভশ্চরগণ কর্ত্তৃক দৃষ্ট হইল, আকশপথে শোভমান হইয়া যাইবার কালে তত্রস্থ জীবগণ-কর্ত্তৃক, এবং বরাহশরীরে প্রবেশকালে তৎসমীপস্থ নভশ্চরকর্ত্তৃক (সকল-কর্ত্তৃকই) যুগপৎ দৃষ্ট হইল। [অর্থাৎ—এতে এর বেগিতা অনুমিত হইতেছে]।

Malli.—'पृषत्कः' बाणः ["पृषत्कबाणविशिखाः" इत्यमरः] 'धनुषः' पिनाकात् 'अपयन्' निर्यन्, निर्गच्छन् इत्यर्थः [इणः शतृप्रत्ययः], 'शिवान्तिकस्थैः नभश्चरैः' ; 'अभिख्यया' शोभया 'जिहानः' शोभां (? आकाशं) गच्छन् इत्यर्थः [ओहाङ् गतौ इति धातोः शानच्। "अभिख्या नामशोभयोः." इत्यमरः] विवरे सीदन्तीति विवरेसदः तैः 'विवरेसद्भिः' अन्तरालवर्त्तिभिः नभश्चरैः ["सत्सूद्विष—" इत्यादिना क्विप्। "तत्पुरुषे कृतिबहुलम्" इत्यलुक्]; अथ 'वराहं विशन्' प्रविशन् 'तदुपोढैः' तं वराहम् उपोढैः प्रत्यासन्नैः [वहेः कर्त्तरि क्तः] च 'नभश्चरैः, युगपत् ददृशे' दृष्टः - इति बाणवेगोक्तिः। [अत्र क्रमेण निष्क्रमणादिक्रियाविशिष्टस्य बाणस्य

शिवान्तिकादिभिन्नदेशस्थनभश्चरकर्तृकदर्शनयौगपद्यासम्बन्धेऽपि तत्सम्बन्धोक्तिमूलातिशयोक्त्या लोकोत्तरवेगप्रतीतेः अलङ्कारेण वस्तुध्वनिः (See char.)।

Charcha.

1. अपयन्—अप + इ गतौ + शतृ। Qual. पृषत्कः॥ धनुषः has अपादाने ५मी।

2. शिवान्तिकस्थैः—शिवान्तिके तिष्ठन्ति ये इति शिवान्तिक + स्था + क कर्त्तरि शिवान्तिकस्थाः those near Siva. तैः। Qual. नभश्चरैः॥ नभसि चरन्ति इति नभस् + चर + ट कर्त्तरि = नभश्चराः, heavenly beings. तैः ; अनुक्ते कर्त्तरि ३या— अनुक्त कर्त्ता of ददृशे—

3. विवरेसद्भिः—विवर is अन्तरीक्षविवर। विवरे सीदन्ति इति विवर + सद + क्विप् कर्त्तरि = विवरेसदः those in the heaven ; तैः। Here अलुक् of ७मी in विवरे is by the rule "तत्पुरुषे कृतिबहुलम्" (which directs irregular retention of ७मी in उपपद तत्पुरुष)। अनुक्ते कर्त्तरि ३या। The word means same as नभश्चरैः।

4. अभिख्यया—अभिख्या is शोभा। ३या। प्रकृत्यादित्वात् ३या।

5 जिहानः—हाङ् गतौ + शानच् कर्त्तरि = जिहानः going. Qual. पृषत्कः। This going refers to going in the aerial region. Here Malli's reading जिहानः' शोभां गच्छन्" should be "जिहानः आकाशं गच्छन्"।

6. ददृशे—दृश + लिट् ए कर्म्मणि। was Seen. उक्तकर्म्म is पृषत्कः।

7. तदुपोढैः—उप + वह + क्त कर्त्तरि = उपोढ़ gone near. तम् उपोढाः, सुप्सुपा। तैः। Qual. नभश्चरैः।

8 *Remark*—Though the arrow's throwing going and entering were in gradual order still the hyperbolic statement that it was simultaneously seen by नभश्चर at different places implies its unnatural speed. Thus also there is implication of this fact owing to this hyperbolic statement (अतिशयोक्तिमूला) ;

24. *The arrow goes deep in earth by piercing the boar.*

स तमालनिभे रिपौ सुराणां घननीहार इवाविषक्तवेगः ।
भयविप्लुतमीक्षितो नभःस्थैः जगतीं ग्राह इवापगांजगाहे ॥२४॥

Prose.—स (बाणः) तमालनिभे सुराणां रिपौ घननीहारे इव अविषक्तवेगः (अप्रतिहतवेगः सन्), नभःस्थैः भयविप्लुत' (यथातथा) ईक्षितः (सन्), ग्राहः (जलचरः) इव, जगतीं जगाहे (विवेश) ।

Eng.—The arrow with its force unchecked in the Tamala-like black foe of the gods, as in solid snow, and being frightfully seen by the heavenly creatures, entered into the earth like a shark entering the river-current.

Malli.—'स' बाणः 'तमालनिभे' तमालप्रभे, नीलाभे इति यावत् । सुराणां रिपौ' वराहे 'घननीहारे' सान्द्रतुहिने 'इव, अविषक्तवेगः' अप्रतिबद्धवेगः सन् , तथा 'नभःस्थैः' खेचरैः 'भयविप्लुतं' भयेन विप्लुतं विह्वलं यथा तथा 'ईक्षितः' सन्, 'आपगां' अपां सम्बन्धी वेग आपः, अपां समूहो वा आपम् [अण् प्रत्ययः ?] आपेन गच्छतीति 'आपगा' नदी, ताम् । गृह्णातीति 'ग्राहः' जलग्रहः जलचरः इति यावत ["जलचरे" इति वक्तव्यात "विभाषा ग्रहः" इति ण प्रत्ययः] स 'इव, जगतीं' भूमिम ["जगती विष्टपे भूम्याम्" इति वैजयन्ती] 'जगाहे' विवेश, अन्तर्हित इत्यर्थः ॥ २४ ॥

Charcha.

1 तमालनिभे—निभ &c in the उत्तरपद means तुल्य । तमालेन तुल्यः इति तमालनिभ , नित्यसमासः । तस्मिन् । Qual. रिपौ ।

2. घननीहारे—नीहार is snow घननीहार is solid snow. As small snow is easily pierced by arrow, so the boar was also easily pierced by the arrow. This is उपमान of रिपौ ।

3. अविषक्तवेगः—वि + सञ्ज + क्त कर्त्तरि = विषक्तः struck, checked. विषक्तः वेगः यस्य, बहु। न तादृशः, नञतत्। Pred. to सः (बाणः)।

4. भयविप्लुतम्—भयेन विप्लुत (विह्वल) इतत्। तत् यथा तथा। Adv. Qual. ईक्षितः (which is pred. to सः)।

5. नभस्थैः—नभसि तिष्ठन्ति ये ते इति नभस् + स्था + क कर्त्तरि = नभःस्थाः। तैः। अनुक्ते कर्त्तरि ३या।

6. आपगाम्—Deriv. in Malli. आप + गम + ड कर्त्तरि स्त्रियाम् = आपगा a river. ताम्। उपमान of जगतीम्।

7. ग्राह.—ग्रह + ण = ग्राहः an alligator, shark &c. (जलचर)। Cp. "जलचरे ग्राहः। ज्योतिषि ग्रहः" in Siddhanta-Kaumudi under the rule "विभाषा ग्रह"। उपमान of सः।

8. जगाहे—गाह + लिट ए। Entered. Nom. सः।

25. Now Arjuna's arrow is being described.

सपदि प्रियरूपपर्वरेखः सितलोहाग्रनखः खमाससाद।
कुपितान्तकतर्जनाङ्गुलिश्रीः व्यथयन् प्राणभृतः कपिध्वजेषुः ॥२५॥

Prose.—सपदि प्रियरूपपर्वरेखः सितलोहाग्रनखः कुपितान्तकतर्जनाङ्गुलिश्रीः कपिध्वजेषुः (अर्जुनबाणः) प्राणभृतः व्यथयन् खम् (आकाशम्) आससाद।

Eng—At that time the arrow of Arjuna, having charming appearance, knots and decorations, having nail-like white iron points, and resembling the index finger of enraged god of Death, ascended the sky by frightening the creatures there.

Beng.—শিবের বাণপ্রয়োগকালেই, সুন্দর আকৃতি গ্রন্থি ও রচনাযুক্ত, শুভ্র লৌহফলস্বরূপ অগ্রনখযুক্ত ও কুপিত যমরাজের তর্জনীর শ্রীর ন্যায় শ্রীযুক্ত অর্জ্জুনের বাণ, প্রাণিগণকে ভীত করিয়া আকাশে উঠিল।

Malli—অথ অর্জুনবাণপ্রয়োগমাহ, সপদীতি। 'সপদি' শিববাণপ্রয়োগ-

समये एव 'प्रियरूपपर्वरेखः' प्रियाः रूपम् आकृतिः पर्वाणि ग्रन्थयो रेखा रचनाश्च यस्य सः ; अङ्गुलिपक्षे—पर्वरेखाः प्रसिद्धाः । 'सितलौहाग्रनखः' लौहाग्रमयः फलं तत् नखम् इव [इति उपमित समास.], सितं लौहाग्रनखं यस्य सः । कुपितान्ततर्जनाङ्गुलिश्रीः' कुपितस्य अन्तकस्य मृत्योः या तर्जना तस्याः अङ्गुलिः तर्जनाङ्गुलिः तर्जनी, तस्याः श्रीरिव श्रीः यस्य सः, 'कपिध्वजेषुः' अर्जुनबाणः 'प्राणभृतोव्यथयन्' भीषयमाणः 'खम्' आकाशम् 'आससाद' प्राप । [उपमालङ्कारः] ॥

Charcha.

1. सपदि—An अव्यय meaning 'immediately.'

2. प्रियरूप etc.—रूपम् च पर्व च रेखा च, द्वन्द्व । प्रियाः रूपपर्वरेखाः यस्य, बहु । See Malli also. Qual. कपिध्वजेषुः । This compound becomes optionally रूपपर्वरेखाप्रियः by the Varttika "वा प्रियस्य" । The epithet refers to अङ्गुलि also, to which the arrow is compared in the epithet कुपितान्तकतर्जनाङ्गुलिश्रीः—See Malli.

3. सित etc.—The point of arrow is shod in iron. लौहमयम् अग्रम् लौहाग्रम् iron points, शाकपार्थिवादितत् । लौहाग्रम् नखमिव, उपमिततत् । सितम् लौहाग्रनखम् यस्य. बहु । Qual. कपिध्वजेषुः । The iron point appeared white, because, it being of polished steel appeared bright and so white as well. It applies to अङ्गुलि also—लौह इव अग्रनखम्, उपमितसमासः । सितं लौहाग्रनखम् यस्य &c. as before.

4. कुपित etc.—तर्जनाख्यः अङ्गुलिः वा तर्जनस्य अङ्गुलिः, शाकपार्थिवादि, वा ६तत् । Malli's.—"कुपितान्तकस्य तर्जना । तस्याः अङ्गुलिः" is not very satisfactory. Prefer our exposition कुपितान्तकस्य तर्जनाङ्गुलिः, ६तत् । तस्याः श्रीः, ६तत् । कुपितान्तकतर्जनाङ्गुलिश्रीः इव श्रीः यस्य, बहु by the Varttika "सप्तम्युपमानपूर्व्वस्य उत्तरपदलोपश्च वक्तव्यः" । Qual. कपिध्वजेषुः । The इषु is compared to the index (or – fore) finger of Yama, owing to its pointed rush.

5. आससाद—आ + सद् + लिट् अ। Attained, went to. Nom. कपिध्वजिषु:।

6. प्राणभृत:—प्राणान् बिभर्ति इति प्राण + भृ + क्विप कर्त्तरि = प्राणभृत: living ones. तान्। Obj. of व्यथयन् (व्यथ + णिच् + शतृ)।

26. The sound of the arrow.

परमास्त्रपरिग्रहोरु तेज: स्फुरदुल्काकृति विक्षिपन् वनेषु।
स जवेन पतन् पर:शतानां पततां व्रातइवारवं वितेने ॥ २६ ॥

Prose.—परमास्त्रपरिग्रहोरु स्फुरदुल्काकृति तेज: वनेषु विक्षिपन् जवेन पतन् स: (वाण:), पर:शतानां (शताधिकानां) पततां (पक्षिणां) व्रात: (समूह:) इव आरवं वितेने।

Eng.—The arrow scattering rays in the wood, the rays that were vast being born of divine weapon and that appeared like a burning meteor, went with velocity and produced sound like that of hundreds of flocks of birds.

Malli.—'परमास्त्रपरिग्रहोरु' परमास्त्रपरिग्रहेण दिव्यास्त्राधिष्ठानेन उरु महत्, अतएव 'स्फुरदुल्काकृति' उल्कावत् दीर्घायमाणम् इत्यर्थ:। 'तेज:, वनेषु विक्षिपन्' विकिरन् सन्, 'जवेन पतन्' धावन् 'स:' वाण:, 'पर:शतानां' शतात् परे पर:शता: तेषाम्, शतसंख्याधिकानाम् इत्यर्थ: ['पर:शताद्यास्ते येषां परा संख्या शताधिकात्' इत्यमर:। "पञ्चमी" इति योगविभागात् समास:। "राजदन्तादिषु परम्" इति उपसर्जनस्य शतशब्दस्य परनिपात:। पारस्करादित्वात् सुडागम:] 'पततां' पतत्रिणाम् ["पतत्पतत्रपत्राण्डजा:" इत्यमर:] 'व्रात:' समूह 'इव आरवं वितेने' विस्तारयामास ॥ २६ ॥

Charcha.

1. परमास्त्र etc.—परमास्त्र refers to the divine arrow of Arjuna. परिग्रह is taking i. e., 'secondarily' अधिष्ठान। परमास्त्रस्य परिग्रह:

(आश्रयः, अधिष्ठानमित्यर्थः), ६तत् । तेन उरु (महत्), सुप् सुपा or ३तत् । Qual. तेजः । The ray was vast being born of the divine arrow.

2. स्फुरदु etc.—स्फुरन्ती उल्का, कर्मधा, पुंवद्भावश्च । तस्या आकृतिः, ६तत् । स्फुरदुल्काकृतिः इव आकृतिः यस्य । बहु—as in अङ्गुलिश्रो sl. 25 ante. Qual. तेज. (which is obj. of विक्षिपन्) ।

3 विक्षिपन्—वि + क्षिप + शतृ । Qual. यः ।

4. जवेन—करणे ३या ।

5. पततम्—पतत् is bird. तेषाम् । शेषे ६ष्ठी, related to व्रातः । As host of birds produce a huge note, so the arrow produced a terrible sound

6. वितेने—वि + तन + लिट ए । Produced. Nom. सः and व्रातः (the उपमान) ।

7. परःशतानाम्—पर is अधिक । शतात् परे is to be compounded by योगविभाग of पञ्चमी in the rule "पञ्चमी भयेन" । We then expect शतपराः । But Vardhamana places it under the राजदन्तादि list, so पर leads here. Lastly assuming that the word is of the पारस्करादि class as is done by भानुजि, we have परस् शता which yields परः शताः । Vardhamana however makes it of the पृषोदरादि class and introduces सकारागम at the last stage. See also Malli. N. B—If योगविभाग of पञ्चमी is objected to then make शतात् परे as सुप सुपा compound. Qual. पतताम् । See also our notes under परःसहस्राः in Uttarcharit I. sl. 15.

27. *Its inconceivable quickness in descent.*

अविभावितनिष्क्रमप्रयाणः शमितायाम इवातिरंहसा सः ।
सह पूर्वतरं नु चित्तवृत्तेः अपतित्वा नु चकार लक्ष्यभेदम् ॥२७॥

Prak.—स: (शर:) अपतित्वा नु लक्ष्यभेदम् चकार [The arrow in the twinkling of an eye pierced its aim. So it seemed as if to pierce the mark by not falling on it at all]. This does not prove its quickness of motion—perhaps it was not thrown at all —चित्तवृत्ते: (?) सह पतित्वा लक्ष्यभेदं चकार नु [The arrow was thrown. And the arrow seemed to reach the mark as soon as there was mental inclination to that effect]. Still greater motion is possible—चित्तवृत्ते: पूर्वतरं नु लक्ष्यभेदं चकार [So inconceivably great was its force that I think, the arrow pierced the mark even before mental tendency developed. The arrow was thrown with the advent of the idea of killing the boar, but the arrow seemed to hit the mark even before the idea ended. Now just imagine its quickness]. How can you infer so ?—अविभावितनिष्क्रमप्रयाण: स: (शर:) [The arrow's throwing and flight were not at all seen through its velocity ; but its killing of the boar was known only. So I infer such motion in the arrow]. Yes I follow you now—अतिरंहसा शमितायाम इव स: [Its intense motion so greatly minimised the length of track].

Prose.—अविभावितनिष्क्रमप्रयाण: (तत:) अतिरंहसा शमितायाम: इव स: (शर:) चित्तवृत्त्या सह (पतित्वा) नु, चित्तवृत्ते: पूर्वतरं (पतित्वा) नु, (अथवा) अपतित्वा नु लक्ष्यभेदं चकार: ।

Eng.—The arrow with its throwing and flight unnoticed and so its length of journey minimised as if owing to speed, seemed to pierce its mark (i. e., the boar) by falling along with the mental inclination or by falling before it, or even without falling at all.

[N. B —It is so said because the boar fell along with the throwing of the arrow].

Beng.—শরের নিষ্ক্রমণ ও প্রয়াণ লক্ষিত হয় নাই এবং তাই বেগহেতু ইহার পথদৈর্ঘ্য কমিয়াছিল। তাই মনে হইল শরটা যেন মনের পশুবধরূপ বাসনার সঙ্গেই পতিত হইয়া লক্ষ্যভেদ করিল, অথবা বাসনা-বিকাশের পূর্ব্বেই পতিত হইয়া লক্ষ্য ভেদ করিল ; এমন কি মনে হয় ইহা যেন না পতিত হইয়াই লক্ষ্য ভেদ করিল।

[অর্থাৎ—কারণ তীরক্ষেপের সহিতই পশুটী ভূপতিত হইল, কিন্তু শরটী দেখা গেল বা না গেল। তাই এইরূপ অনুমান করা হইতেছে]

Malli.—'अतिरंहसा' अतिवेगेन 'अविभावितनिष्क्रमप्रयाणः' अविभाविते अलक्षिते निष्क्रमो गाण्डीवात् निःसरणं प्रयाणं अन्तरागमनं च यस्य सः। तथा 'शमितायामः' सङ्क्षिप्तदैर्घ्यः 'इव' स्थितः [इति उपात्तवेगगुणनिमित्ता दैर्घ्यगुणाभावोत्प्रेक्षा] 'स' शरः 'सह नु' सह वा, चित्तवृत्त्या इति शेषः। 'चित्तवृत्तेः पूर्वतरं नु' प्राक् एव वा [उभयत्र अपि लक्ष्ये पतित्वा इति शेषः]। अथवा 'अपतित्वा नु', लक्ष्ये इति शेषः, 'लक्ष्यभेदं चकार'। [अत्र उपात्तवेगगुणनिमित्तात् बाणस्य चित्तवृत्त्या सहपात-पूर्वपात-पतनाभावोत्प्रेक्षाः तिस्रः, उत्तरोत्तरोत्कर्षेण वेगातिशय-व्यञ्जिकाः—इति अलङ्कारेण वस्तुध्वनिः (see charcha)] ॥ २७ ॥

Charcha.

1 अविभावित etc —निष्क्रमश्च प्रयाणं च, द्वन्द्व। See Malli for meaning. अविभाविते निष्क्रमप्रयाणे यस्य, बहु। Qual. सः शरः। Owing to force the arrow was not seen to be thrown (निष्क्रम) or to be going (प्रयाण)।

2. शमितायामः—आयाम is here length of journey. The length of journey was greatly minimised owing to force in arrow. It reached the mark as soon as thrown. शमितः आयामः (पथदैर्घ्यम्)

येन, बह्। Qual. स:। It is also evident from the epithet that the length (आयाम) itself of the arrow was also could not be seen.

3. अतिरंहसा— रंहस् is वेग। अतिशयितं रंहः, प्रादितत। तेन। हेतौ ३या (Acc. to Malli's construction). But we connect this with शमितायाम only. The निष्कम &c being अविभावित, रंहस is evident in arrow, and hence to say that its पथदैर्घ्य was minimised (शमित) by its speed requires अतिरंहस्। So connect it with शमित। This is the sense here. In this case— अतिरंहसा has अनुक्ते कर्त्तरि ३या, अनुक्तकर्त्ता of शमित in शमितायामः। Prefer this construction & see our Prose.

4. चित्तवृत्ते:—Here चित्तवृत्ति refers to Arjuna's wish to kill the boar. तस्याः। दिग्‌वाचक पूर्व्वेतर शब्द योगे ५मी, or शेषे ६ष्ठी। See Malli & Prose for construction here.

5. अपतित्वा—नञ्+पत+क्त्वाच्। No ल्यप् in connection with नञ्। The rule is "समासे अनञपूर्व्वे क्त्वो ल्यप्"।

6. चकार—कृ+लिट ण। Nom. स:।

28 It goes right to its aim.

स वृषध्वजसायकावभिन्नं जयहेतुः प्रतिकायमेषणीयम्।
लघु साधयितुं शरः प्रसेहे विधिनेवार्थमुदीरितं प्रयत्नः ॥२८॥

Prose.—जयहेतुः सः शरः वृषध्वजसायकावभिन्नम् एषणीयम् (वेद्धुम् अनुगमनीयम) प्रतिकायम् (प्रतिपक्षम्), प्रयत्नः विधिना (विधिवाक्येन) उदीरितम् अर्थम् (यागादिकं) इव लघु (सत्वरं) साधयितुं प्रसेहे (शशाक)।

Eng.—That arrow the cause of victory was seen able to pierce the enemy,—enemy already pierced by Siva's arrow and who is wished to be pierced as well, just as good effort easily

accomplishes the matter (i e., sacrifices) significantly uttered as injunctions.

Malli.—'जयहेतुः स शरः वृषध्वजसायकावभिन्न'' शिवशरविद्धम् 'एषणीयम्' वेद्धुमिष्टि शेषः [इ रिच्छार्थात् अनीयर् प्रत्ययः] 'प्रतिकाय'' प्रतिपक्षम् इति यावत् ; 'विधिना' विधिवाक्येन 'उदीरितम्' फलसाधनतया प्रतिपादितम् 'अर्थ'' यागादिक 'प्रयत्न.' पुरुषव्यापारः 'इव, लघु' अक्लेशेन यथा तथा 'साधयितुम्' [स्वार्थेणिजन्तात तुमुन् ?] 'प्रसेहे' शशाक । [उपमालङ्कारः] ॥ २८ ॥

Charcha.

1. वृषध्वज etc.—सो अन्तकर्मणि + ण्वुल् = सायक arrow. वृषध्वजस्य (शिवस्य) सायकः, इतत् । तेन अवभिन्नम् (विद्धम्), इतत । Qual. प्रतिकायम् ।

2. जयहेतुः—जयस्य हेतुः (निदानम्), इतत । Qual. शरः । It is जयहेतु for शर gives one victory over enemy.

3. एषणीयम्—इष + अनीय कर्मणि । To be sought to be pierced. Qual. प्रतिकायम् ।

4. साधयितुम्—सिध दिवादि + णिच् + तुमुन । To do, Here आ in णिच् of सिध comes by the rule "सिध्यतेरपारलौकिके" । Malli's स्वार्थनिजन्तात् तुमुन् seems to be a slip ; for Panini Dh[illegible] do not read साध in the चुरादि list which takes स्वार्थे णिच् ॥ साध स्वादि + हेतुमत् णिच् also gives साधयति । So साध + णिच् हेतुमति + तुमुन = साधयितुम ।

5. प्रसेहे—प्र + सह + लिट ए । Was able. Nom शरः and प्रयत्नः । उपमान of शरः is प्रयत्नः ।

6. अर्थम्—It means यागादि । It is compared to प्रतिकाय । In case of शर, साधयितुम् means हन्तुम and in case of प्रयत्न, साधयितुम् means निष्पादयितुम ॥ Similarly लघु in case of शर means 'quickly' and in case of प्रयत्न it means 'easily'.

29. Both arrows destroy the boar.

अविवेकवृथाश्रमाविवार्थं क्षयलोभाविव संश्रितानुरागम् ।
विजिगीषुमिवानयप्रमादौ अवसादं विशिखौ विनिन्यतुस्तम् ॥२९॥

Prose.—अविवेकवृथाश्रमौ अर्थम् इव, क्षयलोभौ संश्रितानुरागम् (आश्रितानुरागम्) इव, अनयप्रमादौ विजिगीषुम् इव, विशिखौ (शिवार्जुनयोः वाणौ) तं (वराहम्) अवसादं विनिन्यतुः (नीतवन्तौ) ।

Eng.—The two arrows (of Siva and Arjuna) reduced the boar to destruction, like indiscrimination and useless effort destroying wealth, like loss and avarice destroying affection of dependents, like evil policies and carelessness destroying one wishing victory.

Beng.—অবিবেক ও বৃথাশ্রম যেমন ধন নষ্ট করে, অর্থক্ষয় ও লোভ যেমন আশ্রিতের অনুরাগ নষ্ট করে, দুর্নীতি ও অসাবধানতা যেমন জিগীষু-ব্যক্তিকে নষ্ট করে, তদ্রূপ শিব ও অর্জ্জুনের বাণ সেই বরাহকে নষ্ট করিল ।

Malli.—'अविवेकवृथाश्रमौ' अविवेकः अन्तरानभिज्ञत्वं, वृथाश्रमः निष्फलप्रयासः तौ 'अर्थं' धनम् इव, अस्थानविनियोगहेतुकत्वात अनयोः धनहानिकरत्वम् इति भावः । 'क्षयलोभौ' क्षयः अनुपचयः, लोभः अदातृत्वं, तौ 'संश्रितानुरागं' संश्रितानाम् अनुजीविनाम् अनुरागम 'इव', अकिञ्चित्करे स्वामिनि अनुरागस्य अनवस्थानात इति भावः । 'अनयप्रमादौ' अनयः दुर्नीतिः, प्रमादः अनवधानता तौ 'विजिगीषुम् इव', वस्थभूयिष्ठस्य जयासिद्धेः इति भावः । 'विशिखौ' शिवार्जुनवाणौ 'तं' वराहम 'अवसादं' करणशोषित्वं 'विनिन्यतुः' नीतवन्तौ [नयतिः द्विकर्म्मकः ॥ मालोपमेयम्] ॥ २९ ॥

Charcha.

1. अविवेकवृथाश्रमौ, क्षयलोभौ and अनयप्रमादौ—There are द्वन्द्व समास । For meanings and sense, see Malli.

2. अवसादम्—अव + सद् + घञ् भावे = अवसादः lit. dejection, here end, extinction. अप्रधानकर्म्म of विनिन्यतुः।

3. विनिन्यतुः –वि + नी + लिट अतुस्। Reduced to. Nom विशिखौ। The root नी is द्विकर्म्मक ; so its प्रधानकर्म्म here is तम् (See Malli also).

30 The boar reels before death.

अथ दीर्घतरं तमः प्रवेक्ष्यन् सहसा रुग्नरयः स सम्भ्रमेण।
निपतन्तमिवोष्णरश्मिमुर्व्यां वलयीभूततरुं धराञ्च मेने ॥ ३० ॥

Prose.—अथ स (वराहः) दीर्घतरं तमः प्रवेक्ष्यन् सहसा रुग्नरयः (भग्नवेग, वेगरहितः सन् इत्यर्थः) सम्भ्रमेण (भ्रान्त्या हेतुना), उष्णरश्मिम् (सूर्यं) भूमौ निपतन्तं (मेने) धरां च वलयीभूततरुं मेने।

Eng.—The boar while about to enter the long-lasting darkness (of death), suddenly had its movement checked, and owing to its reeling, took the sun as falling down and the earth as having its trees circling on.

Malli.—'अथ सः' वराहः 'दीर्घतरं तमः' दीर्घनिद्रां 'प्रवेक्ष्यन्' मरिष्यन् इत्यर्थः। 'सहसा' झटिति 'रुग्नरयः' भग्नवेगः 'सम्भ्रमेण भ्रान्त्या ["सम्भ्रमो भ्रान्तिहावयोः" इति विश्वः] 'उष्णरश्मिम् उर्व्यां' भूमौ 'निपतन्तम् इव मेने', 'धराञ्च' 'वलयीभूततरुं' वलयीभूताः मण्डलीभूताः तरवः यस्याः तां तथा 'मेने' ; तथा बभ्राम इत्यर्थः। [स्वभावोक्तिरलङ्कारः] ॥३०॥

Charcha.

1. प्रवेक्ष्यन्—प्र + विश + लृटः स्थाने शतृ। Pred. to सः। In order to enter. Thus it (लृट) has the sense of क्रियार्थाक्रिया here, see the rule "लृटशेषे च" under "प्रहरिष्यन् मन्त्रि" in sl. 9 ante.

2. रुग्णरयः—रयः is force (वेग)। रुज+क्त कर्त्तरि=रुग्ण broken, checked. रुग्णः रयः यस्य, बहु। As the boar was about to die, so its वेग was checked.

3. सम्भ्रमेण—सम्भ्रम is reeling like a wheel. तेन। दृष्टौ श्या। owing to its reeling, it saw the sun (उष्णरश्मिम्) as falling.

4. निपतन्तम्—नि+पत+शतृ। Pred. to उष्णरश्मिम्।

5. वलयीभूततरुम्—वलय is bracelet i. e., मण्डल (circle) here. अवलयं वलयं भूतः सम्पद्यमानः इति वलय+च्वि (अभूततद्भावे)+भू+क्त कर्त्तरि =वलयीभूतः turned to circle. तादृशः तरुः यस्याम्, बहु। ताम्। Pred. to धराम्। Owing to its own reeling, the earth seemed to be so to the animal.

6. मेने - मन दिवादि+लिट ए। Took. Nom. सः।

31. The boar dies.

स गतः क्षितिमुष्णशोणितार्द्रः खुरदंष्ट्राग्रनिपातदारिताश्मा।
असुभिः क्षणमीक्षितेन्द्रसूनुः विहितामर्षगुरुध्वनिर्निरासे ॥३१॥

Prose—क्षितिं गतः उष्णशोणितार्द्रः खुरदंष्ट्राग्रनिपातदारिताश्मा क्षणम् ईक्षितेन्द्रसूनुः (अतः) विहितामर्षगुरुध्वनिः सः (वराहः) असुभिः निरासे (त्यक्तः)।

Eng.—Fallen on earth, drenched with hot blood, the boar, the piercer of stones by its hoofs and teeth, having seen Arjuna for a moment, made a load wrathful sound, and was bereft of its life.

Malli.—'क्षितिंगतः' क्षितौ पतितः 'उष्णशोणितार्द्रः' प्रत्यग्रत्वात् उष्णेन शोणितेन आर्द्रः प्लुतः 'खुरदंष्ट्राग्रनिपातदारिताश्मा' खुराणां दंष्ट्रयोश्च अग्राणां निपातेन आघातेन दारिताश्मा पाटितपाषाणः, किञ्च 'क्षणम् ईक्षितेन्द्रसूनुः' क्षणम् ईक्षितः

इन्द्रसूनुः येन सः, 'स्वार्थविघातरोषात् इति भावः। अतएव 'विहितामर्षगुरुध्वनिः' विहितः कृतः अमर्षगुरुः क्रोधोद्धतः ध्वनिः क्रन्दितं येन स तथोक्तः 'सः' वराहः असुभिः प्राणैः 'निरासे' निरस्तः, त्यक्तः इत्यर्थः [अस्यतेः कर्म्मणि लिट ॥ इयं च स्वभावोक्तिः]।

Charcha.

1. उष्णशोणित etc.—उष्णशोणितेन आर्द्रः, ३तत्। सद्यःप्रसृत शोणित is hot. See Malli also. Qual. सः।

2 खुर etc —खुरं च दंष्ट्राच, खुरदंष्ट्रम् प्राण्यङ्गत्वादेकवद्भावः। तस्य अग्राणि, ६तत्। तेषाम् आघातः, ६तत्। तेन दारिताश्मा, बहु। दारितम् अश्म (पाषाणं) येन, इति दारिताश्मा ; बहु। Qual. सः। The boar struggled when falling on earth, so its teeth and hoof stuck against stones underground and pierced these.

3. क्षणम्—व्याप्तार्थे २या by the rule "कालाध्वनोरत्यन्तसंयोगे"।

4. ईक्षितेन्द्रसूनुः—Samasa in Malli. Qual. सः। The boar eyed out of क्रोध। See Malli.

5. विहितामर्ष etc.—अमर्षजनितः गुरुध्वनिः, शाकपार्थिवादितत्। विहितः अमर्षगुरुध्वनिः येन, बहु। Qual. सः। His internal क्रोध found ventilation in wrathful sounds during death-time.

6. निरासे—निर + अस + लिट ए कर्म्मणि। was forsaken. उक्त कर्म्म is सः। Here अनुक्तकर्त्ता is असुभिः। The base प्राण + असु meaning 'life' is always masc plural.

32. Arjuna goes to take up that very arrow.

स्फुटपौरुषमापपात पार्थः तमथ प्राज्यशरः शरं जिघृक्षुः।
न तथा कृतवेदिनां करिष्यन् प्रियतामेति यथा कृतावदानः ॥३२॥

Psose'—अथ पार्थः प्राज्यशरः (अपि) स्फुटपौरुषं तं शरं जिघृक्षुः आपपात।

कृतवेदिनां (कृतज्ञानां सम्बन्धे), कृतावदानः (कृतकर्मा) यथा प्रियतामेति करिष्यन् (जनः) तथा प्रियतां न एति ।

Eng.—Then Arjuna though possessed of various arrows went there to take up that very arrow which showed strength (by killing the boar). For to a grateful one, the would be successful one is not so favourite as the really successful one.

Malli.—'अथ' वराहपातानन्तरं 'पार्थः' अर्जुनः 'प्राज्यशरः' प्रभूतशरः सन् अपि इत्यर्थः ["प्रभूतं प्रचुरं प्राज्यम्" इत्यमरः] 'स्फुटपौरुषं' व्यक्तविक्रमं वराहभेदिनं 'तं' शरं जिघृक्षुः' ग्रहीतुमिच्छुः [ग्रहेः सन्नन्तात् उप्रत्ययः], 'आपपात' आधावति स्म ; कृतज्ञतया शरग्रहणं, न तु लोभात् इत्यर्थः । ननु अन्येपि उपकर्त्तारं एव, किमिति अत एवादरः तस्य—इत्यत आह, 'कृतवेदिनां' कृतज्ञानां 'कृतावदानः' कृतकर्मा ["अवदानं कर्म्म वृत्तम्" इत्यमरः] 'यथा प्रियतामेति, तथा करिष्यन्' उपकरिष्यन्, जन इति शेषः 'न प्रियताम् एति' । कृतकरिष्यमाणयोः कृतं बलीयः इति न्यायात्—इति भावः ॥३२॥

Charcha.

1. स्फुटपौरुषम्– स्फुटं पौरुषं (वराहमारणरूपम्) यस्य, बहु । Qual. शरम् ।

2. आपपात—आ + पत + लिट अ । went to. पततिरत्र गमनार्थे वर्त्तते, धातूनामनेकार्थत्वात् । Nom. पार्थः ।

3. जिघृक्षुः– ग्रह + सन् + उ = जिघृक्षुः wishing to take. Pred. to पार्थः । The arrow did him good ; so out of gratitude to it, Arjuna went near it, to take it up by way of embrace ; for it was his benefactor.

४. कृतवेदिनाम्—कृतं विदन्ति इति कृत + विद + णिनि कर्त्तरि साधुकारिणि = कृतवेदिनः appreciator of deed done i. e. a कृतज्ञव्यक्ति । तेषाम् । शेषे ६ष्ठी ।

5. एति—इ गतौ+लटति। Goes. Nom. करिष्यन् (कृ+लृट: स्थाने शतृ) and कृतावदानः separately।

6. कृतावदानः—अव+दैप+ल्युट=अवदानम् deed. कृतम् अवदानं (कर्म्म) येन, बहु। कृतावदानः and करिष्यन् are adj. used substantively. One who has already done good deed. Such a person is more favourite than one who has not but may do good. Cp. "कृतकरिष्यमाणयोः कृतं बलीयः" in Malli.

33 & 34. The arrow earnestly looked at for its success.

उपकार इवासति प्रयुक्तः स्थितिमप्राप्य मृगे गतः प्रणाशम् ।
कृतशक्तिरधोमुखो गुरुत्वात् जनितव्रीड़ इवात्मपौरुषेण ॥३३॥
स समुद्धरता विचिन्त्य तेन स्वरुचं कीर्त्तिमिवोत्तमां दधानः ।
अनुयुक्त इव स्ववार्त्तमुच्चैः परिरेभे नु भृशं विलोचनाभ्याम् ॥३४॥

Prose.—असति (असज्जने) प्रयुक्तः उपकारः इव मृगे स्थितिमप्राप्य प्रणाशं (अदर्शनं) गतः, (तथा) कृतशक्तिः गुरुत्वात् अधोमुखः (अतः) आत्मपौरुषेण जनितव्रीड़ इव (स्थितः), उत्तमां स्वरुचं कीर्त्तिमिव दधानः, विचिन्त्य समुद्धरता तेन (अर्जुनेन) उच्चैः स्ववार्त्तम् (स्वपाटवम्) अनुयुक्तः (पृष्टः) इव (स्थितः) स (वाणः) विलोचनाभ्यां भृशं परिरेभे नु (आलिङ्गितः किम्) ?

Eng.—The arrow, meeting no obstruction from the animal was lost to eyes like good deed lost (i. e. gone unappreciated) in a vicious one; the arrow owing to its heaviness remained with its tip downwards being ashamed as if, for its own manliness which it had shown—it bore immense highness resembling fame; it remained as if loudly asked about its skillfulness by Arjuna who was about to pick it up after deliberation; thus it was as if highly embraced by his eyes.

Malli.—अथ युग्मेनाह, उपकार इति—'असति' नीचे 'प्रयुक्तः' उपकार इव मृगे स्थितिमप्राप्य प्रणाशम्' अदर्शनं गतः [इति उपमा], तथा 'कृतिशक्तिः' कृतपौरुषः, 'गुरुत्वात्' लोहभारात् महत्त्वाच्च 'अधोमुखः' नम्रमुखः, अतएव 'आत्मपौरुषेण जनितव्रीड़ इव' स्थितः [इति उत्प्रेक्षा] ॥ ३३ ॥ 'उत्तमां स्वरुच'' स्वकान्तिं 'कीर्त्तिम् इव दधानः [इति उत्प्रेक्षा]; किंच 'विचिन्त्य' सर्व्वथा ग्राह्यः अयम् इति विमृश्य 'समुद्धरता तेन' अर्जुनेन 'उच्चैः स्ववार्त्तं' स्वपाटवम् ["वार्त्त पाटवमारोग्यं भव्यं स्वास्थ्यमनामयम्" इति यादवः] 'अनुयुक्तः' पृष्टः इव स्थितः [इति उत्प्रेक्षा]; आदरात् तथा प्रतीयते इत्यर्थः। ["प्रश्नोनुयोग पृच्छा च" इत्यमरः]। 'सः' वाणः विलोचनाभ्यां' नयनाभ्यां 'भृशं' 'परिरेभे नु' आलिङ्गितः किम्? [इति उत्प्रेक्षा]। तेन अत्यादरेण दृष्ट इत्यर्थः ॥३४॥

Charcha.

1. उपकारः etc.—Construe :—उपकारः यथा असति नश्यति, तथा वाणः मृगे स्थितिमप्राप्य (तं प्रविश्य इत्यर्थः) प्रणाशं (अदर्शनं) गतः। The arrow was अदर्शनं गतः, for it entered the body of the boar. See Malli also.

N. B.—Remember that Siva's arrow went deep into earth, whereas Arjuna's arrow went deep into its body.

2. कृतशक्तिः—कृता (दर्शिता) शक्तिः (पौरुषम्) येन, बहु। Qual. वाणः। Being कृतशक्तिः it was आत्मपौरुषेण जनितव्रीड़ः इव।

3. गुरुत्वात्—गुरुत्व is heaviness due to iron tip of arrows.

4. आत्मपौरुषेण—अनुक्ते कर्त्तरि ३या।

5. जनितव्रीड़ः—जनिता व्रीड़ा (लज्जा) यस्य, बहु। Qual. वाणः।

6. अनुयुक्तः—अनु + युज + क्त कर्म्मणि। Being asked.। Qual. वाणः। Here अनुक्त कर्त्ता is तेन re'erring to अर्जुन। Arjuna's eagerness for the arrow made him look to it on andon. As the वाण was

कीर्त्तिं दधान:, so it was thus अनुयुक्त: ॥ It was as if अनुयुक्त by Arjuna when he was picking it up (समुद्धरता तेन अर्जुनेन अनुयुक्त:)। So the poet surmises thus.

7. परिरेभे—परि+रभ+लिट ए कर्म्मणि। Was embraced. अनुक्त कर्त्ता is विलोचनाभ्याम्। उक्तकर्म्म is वाण:। This is also surmised for Arjuna looked at it ardently to take it up.

35 A kirata appears there.

तत्र कार्म्मुकभृतं महाभुज: पश्यति स्म सहसा वनेचरम्।
सन्निकाशयितुमग्रत: स्थितं शासनं कुसुमचापविद्विष: ॥३५॥

Prose—तत्र (स्थाने) महाभुज: (अर्जुन: इत्यर्थ:), कुसुमचापविद्विष: (शिवस्य इत्यर्थ:) शासनं (आदेशं) सन्निकाशयितुं (प्रकाशयितुं) अग्रत: स्थितं कार्म्मुकभृतं वनेचरं सहसा पश्यति स्म।

Eng.—The large-armed (Arjuna), suddenly saw there a forester with bow in hand and remained before him to promulgate the order of the destroyer of Cupid (i e. Siva).

Malli—'तत्र' प्रदेशे 'महाभुज:' अर्जुन: 'कुसुमचापविद्विष:' स्मरारे: शिवस्य 'शासनं' वक्ष्यमाणम् आदेशं 'सन्निकाशयितुं' प्रकाशयितुं, निवेदितुम् इति यावत्। 'अग्रत: स्थितं कार्म्मुकभृतं वनेचरं सहसा झटिति 'पश्यति स्म' ॥ [इत: प्रभृति रथोद्धता वृत्तम्—"रो नराविह रथोद्धता लगौ" इति लक्षणात्] ॥ ३५ ॥

Charcha.

1. कार्म्मुकभृतम्—कर्म्मणे प्रभवतीति कर्म्मन्+उकञ्=कार्म्मुकम् bow. तत् बिभर्त्ति इति कार्म्मुक+भृ+क्विप् कर्त्तरि=कार्म्मुकभृत् bearer of a bow. तम्। Qual. वनेचरम् ॥ वने चरतीति वन+चर+ट कर्त्तरि=वनेचर: or वनचर: forester. See also "युधिष्ठिरं द्वैतवने वनेचर:" Canto I. Sl. 1,

Here optional अलुक् of ङमी in वने is by the rule "तत्पुरुषे कृति-बहुलम्"। The Kirata (forester) was disguised Siva's अनुचर।

2. महाभुजः—महान्तौ भुजौ यस्य, बहु। Refers to Arjuna. Adj. used substantively. Cp. "विशेषणमात्रप्रयोगो विशेष्यप्रतिपत्तौ।"—*Vamana.*

3. पश्यति—दृश + लटति। 'स्म' indicates past tense here. स्मयोगे अतीतार्थे लट।

4. सन्निकाशयितुम्—सम् + नि + काश + णिच् तुमुन। To declare.

5. कुसुमचापविद्विषः—कुसुमचाप is a name of cupid. तस्य विद्विट् (शत्रुः), ६तत्। Or—तं विद्वेष्टि इति कुसुमचाप + वि + द्विष + क्विप = कुसुमचापविद्विट् the enemy of cupid. तस्य ; शेषे ६ष्ठी। Siva is so called, for he destroyed कामदेव। See Kumar Canto III.

36. The Kirata speaks out.

स प्रयुज्य तनये महीपतेः आत्मजातिसदृशीं किलानतिम्।
सान्त्वपूर्वमभिनीतिहेतुकं वक्तुमित्थमुपचक्रमे वचः ॥ ३६ ॥

Prose.—सः (वनेचरः) महीपतेः तनये (अर्जुने इत्यर्थः) आत्मजातिसदृशीम् आनतिं प्रयुज्य किल, सान्त्वपूर्वं (विनयपूर्वकं) अभिनीतिहेतुकं (युक्तियुक्तं) वचः, इत्थं (अनेन प्रकारेण) वक्तुमुपचक्रमे।

Eng.—The forester having first shown suppliance befitting his race began humbly to say to Arjuna a highly reasonable speech in the following way.

Malli.—'सः' वनेचरः 'महीपतेः तनये राजपुत्रे अर्जुने 'आत्मजातिसदृशीं' किरातजात्यनुरूपां 'किल' [किलेति जातेः अलीकतां दर्शयति, यतः परमार्थतः प्रथम एव सः]। 'आनतिं' प्रणतिं 'प्रयुज्य, 'सान्त्वपूर्वं' सामपूर्वकम् ["सान्त्वसुभे समौ" इत्यमरः] अभिनीतिहेतुकं' प्रियुक्तिहेतुकं 'वचः, इत्थम्' वक्ष्यमाणप्रकारेण 'वक्तुमुपचक्रमे' उद्युक्तवान् ॥३६॥

Charcha.

1. तनये—अधि'ऽमी। महीपतेः तनये means अर्जु'ने ; he is said so, for his father Pandu was a king.

2. आत्मजातिसदृशीम्—आत्मनः जातिः ६तत्। तया सदृशी equal to i. e. befitting his race, ३तत्। "पूर्व्वसदृश" इत्यादिसूत्रे'णात्र तृतीया समासः। ताम्। Qual. आनतिम् (which is obj. of प्रयुज्य)।

3. किल—It means 'narration of fact' (वार्त्ता)। Malli takes it as अलीके। He being the first to offer salution, how can it be said that his आनति was आत्मजातिसदृशी, so किल implies अलीक here. See Malli "किलेति……सः"।

4. सान्त्वपूर्व्वम्--सान्त्व is सामवाक्य। तत्पूर्व्वं यस्मिन्, बहु। तत् यथा तथा। Adv. Qual. वक्तुम् (वच+तुमुन्)।

5. अभिनीति etc.—अभि+नी+क्तिन् भावे=अभिनीतिः i. e. सम्यक् नीति right pol:cy. अभिनीतिः हेतुः यस्य, of which true policy is the reason, बहु। Qual वचः। (which is obj. of वक्तुम्)।

6. इत्थम्—अनेन प्रकारेण इति इदम्+थमु (प्रकारवचने)=इत्थम् in the way. An अव्यय, having sense of तृतीया। क्रियाविशेषणे ३या। Cp. "क्रियाविशेषणानां फलभावनां प्रति करणत्वम्"—Bhashya.

7. उपचक्रमे—उप+क्रम+लिट ए। Began. Nom. सः। In this sense उप+क्रम is आत्मनेपदी by the rule "प्रोपाभ्यां समर्थाभ्याम्"।

8. *Voice*—तेन...उपचक्रमे &c. easy. Voice being easy is not given anywhere.

37. *Your greatness is inferred from your appearance &c.*

शान्तता विनययोगि मानसं भूरिधाम विमलं तपः ।
आह ते नु सदृशी दिवौकसाम् अन्ववायमवदातमाकृतिः ॥३७॥

Prose.—शान्तता ते विनययोगि (विनययुक्तं) मानसं प्राह नु (कथयति खलु), भूरिधाम तपः विमलं श्रुतं (प्राह नु) ; (तथा) ते दिवौकसां सदृशी आकृतिः अवदातं (विमलं) अन्ववायं (वंशं) प्राह नु ।

Eng.—Tranquility (in appearance) bespeaks your humble mentality, your penance of immense prowess points to your pure knowledge, and lastly your frame resembling that of gods bespeaks your pure (i e. high) race.

Malli.—तत्र तावत् चतुर्भिः सान्त्वमाह, शान्ततेभि । 'शान्तता' बहिरनौद्धत्य' 'ते' तव 'विनययोगि' अनौद्धत्ययुक्तं 'मानसं' कर्म्म 'प्राह नु' ब्रूते खलु । तथा 'भूरिधाम' भूरि बहु धाम तेजो यस्मिन् तत् 'तपः' कर्त्तृ, 'विमलं' सम्प्रदायविशुद्धं 'श्रुतं' प्राह । किञ्च—द्यौः दिवं वा ओको येषां 'तेषां 'दिवौकसां' देवानाम् [पृषोदरादित्वात् साधुः । 'दिव' स्वर्गेऽन्तरिक्षे च' इति विश्वः] 'सदृशी' तुल्या 'आकृतिः' मूर्त्तिः 'अवदातं' शुद्धम् 'अन्ववायं' वंशं प्राह ["वंशोऽन्ववायः सन्तानः" इत्यमरः] । शान्ततादिभिः लिङ्गैः विनयादयोऽनुमीयन्ते, अन्यथा तदसम्भवात् इति भावः ।

Charcha.

1. विनययोगि—विनय modesty. तं युङ्क्ते इति विनय+युज+णिनि कर्त्तरि साधुकारिणि=विनययोगिन् united with modesty i. e. humble. Qual. मानसम् (which is obj of प्राह) ॥ For भूरिधाम् (Qual. तपः) See Malli.

2. प्राह—प्र+ब्रू+लट ति । speaks. Nom. शान्तता, तपः and आकृतिः in these clause. The first five लिटविभक्ति are ordered optionally in first five लट विभक्ति of ब्रू and आह is then directed also by the rule "ब्रुवः पञ्चानामादितः आहो ब्रुवः" । नु has the sense of मन्ये (certainty) here. See Malli.

3. दिवौकसाम्—द्यौ ओकः (स्थानं) येषाम् इति दिव्+ओकस्=दिवौकस्

(पृषोदरादित्वात्) god तेषाम्। सदृशी शब्दयोगे ६ष्ठी by the rule "तुल्यार्थै-रतुलोपमाभ्यां तृतीयान्यतरस्याम्"।

4. अवदातम्—व + दैप शोधने + क्त = अवदात pure. Qual. अन्ववायम् (which is obj. of आह)।

38. You seem to be Indra's superior guider.

दीपितस्त्वमनुभावसम्पदा गौरवेण लघयन् महीभृतः।
राजसे मुनिरपीह कारयन् आधिपत्यमिव शातमन्यवम् ॥३८॥

Prose.—मुनिरपि अनुभावसम्पदा दीपितः, गौरवेण महीभृतः (राज्ञः) लघयन् त्वम् इह (अद्रौ) शातमन्यवम् आधिपत्यम् कारयन् इव राजसे (शोभसे)।

Eng.—Though a sage you are resplendant by your wealth of prowess ; and you having lowered the kings by your greatness, shine in this mountain by causing as if, Indra to conduct his divine kingdom.

Expl.—You are so very resplendant and so full of divine power that I hope Indra carries on his heavenly kingdom by your prowess only. You seem to urgehimon to his work—You are his supporter thus.

Malli.—'मुनिरपि' ऐश्वर्य्यरहितः अपि इत्यर्थ, 'अनुभावसम्पदा' प्रभावातिशयेन 'दीपितः' प्रकाशितः ["अनुभावः प्रभावे च" इत्यमरः] 'गौरवेण' महत्तया 'महीभृतः' राज्ञः 'लघयन्' लघूकुर्व्वन् 'त्वमिह' अद्रौ, शतमन्योः इन्द्रस्य इद 'शातमन्यवम्' ऐन्द्रम् ["तस्येदम्" इति अण् प्रत्यय.। "शतमन्युर्दिवस्पतिः" इत्यमरः] अधिपतेः कर्म्म 'आधिपत्यम्' त्रैलोक्यरक्षाधिकारम् [ब्राह्मणादित्वात् ष्यञ् प्रत्ययः] 'कारयन् इव' इन्द्रेन इति शेषः, 'राजसे' तस्य अपि उपजीव्य इति प्रतीयसे, स्वमहिम्ना इत्यर्थः ॥३८॥

Charcha

1. दीपितः—दीप + णिच् क्त कर्म्मणि = दीपितः shown to advantage. Qual. त्वम्।

2. अनुभावसम्पदा—अनुगतः भावः इति अनुभावः majesty. प्रादितत्। we avoid अनु + भू + घञ् = अनुभाव, for the rule "श्रिणीभुवोनुपसर्गे" directs भू to take घञ्, only when not preceded by any उपसर्ग। अनुभावस्य सम्पद्, ६तत्। तया। अनुक्त कर्त्ता of दीपितः।

3. गौरवेण—गुरु + अण् भावे = गौरव greatness. तेन। करणे ३या।

4. लघयन्—लघु' करोति इति लघु + णिच् + लट ति = लघयति। ततः लटः स्थाने शतृ = लघयन्। Qual. त्वम्।

5 राजसे—राज + लट से। Shine. Nom. त्वम्।

6. कारयन्—कृ + णिच् + लटः स्थाने शतृ = कारयत् Causing to do. You cause Indra to do his आधिपत्य, thus you are Indra's superior. You seem so by your wealth of asceticism. See Malli also मुनिरपि &c. इन्द्र आधिपत्यम् करोति becomes in णिच् = त्वम् इन्द्रेण आधिपत्यं कारयति (कारयन् वा)। The प्रयोज्यकर्म्म i. e. इन्द्रेण here will optionally take तृतीया in connection with कृ by the rule "हृक्रोरन्यतरस्याम्"।

7. आधिपत्यम्—Deriv. in Malli. Obj. of कारयन्।

8. शातमन्यवम्—शतमन्यु is Indra for he perfomed 100 sacrifices. शतं मन्यवः यस्य, बहु। See Malli also. तस्य इदम् इति शतमन्यु + अण् = शातमन्यवम् refering to Indra. Qual. आधिपत्यम्। That Indra carries on his इन्द्रत्व seems to due to your power. This is my surmise due to your अनुभावसम्पद्।

39. You seem to be the repository of all wealth.

तापसोपि विभुतामुपेयिवान् आस्पदं त्वमपि सर्वसम्पदाम् ।
दृश्यते हि भवतो विना जनैः अन्वितस्य सचिवैरिव द्युतिः ॥३९॥

Prose—विभुतां (प्रभावम्) उपेयिवान् (उपगतः) त्वं तापसः (मुनिः) अपि सर्वसम्पदाम् आस्पदम् (स्थानम्) असि ; हि जनैः विना अपि भवतः (तव) सचिवैः अन्वितस्य (राज्ञः) इव द्युतिः दृश्यते ।

Eng.—Having attained majesty, though a sage you seem to be the resort of all wealth ; for, though without any one you seem to be possessed of lustre like a king endowed with ministers.

Malli.—विभोर्भावः विभुता, तां 'विभुतां' प्रभावम् 'उपेयिवान्' उपगतः, अतएव 'तापसोपि त्वं सर्वसम्पदाम् आस्पदम्' स्थानम् असि ["आस्पदं प्रतिष्ठायाम्" इति निपातः]। विभुतामेव समर्थयते—'हि' यस्मात् 'भवतः' तव 'जनैः विना' एकाकिनोपि इत्यर्थः, 'सचिवैः अन्वितस्य इव' अमात्यादियुक्तस्य इव 'द्युतिः' तेजः दृश्यते' । अतः सर्वसम्पदाम् आस्पदत्वं युक्तम् इत्यर्थः ॥ ३९ ॥

Charcha.

1. तापस—तपः अस्ति अस्य इति तपस्+अण्=तापसः a sage. Pred. to त्वम् ॥ अपि here implies disregard (गर्हा) ; inspite of your तापसत्व, you seem to be the resort of all jewel ; this is because you are possessed of power due to asceticism.

2. विभुताम्—विभुता is प्रभुता i. e., प्रभाव (see Malli). ताम् । Obj. of उपेयिवान्। Or—it means 'प्रभुत्व'। Being lord of Indra even (इन्द्रस्य विभुताम् उपगतः सन् इत्यर्थः)—You are सर्वसम्पदाम् आस्पदम् (see sl. 38 where it is said Arjuna seem to cause Indra to rule). Prefer this sense.

3. उपेयिवान्– उप+इ गतौ+क्वसु=उपेयिवस् attained to. Qual. त्वम्। The word is irregularly formed by the rule "उपेयिवान् अनाश्वान् अनूचानश्च"।

4. असि—अस्+लिट सि। Nom. त्वम्।

5. आस्पदम्—आ+पद+घ=आस्पद, with सुट in the sense of प्रतिष्ठा (stability=resort) by the rule "आस्पदम् प्रतिष्ठायाम्"। विधेयविशेषण of त्वम्। "विधेयोद्देश्ययोः लिङ्गवचनेषु न तन्त्रता" इति न्यायात् 'त्वम्' इति आस्पदम्' इति चानयोः भिन्नलिङ्गत्वम्।

6 दृश्यते—दृश+लट ते कर्म्मणि। Is seen. Nom. मया &c. understood ; उक्तकर्म्म is द्युतिः।

7. जनैः—विनाशब्द—योगे ३या। Though without जन, you seem to be सचिवै अन्वित। This is because you possess power.

8. सचिवैः अन्वितस्य—Refers to a king who is सचिवैः अन्वित (युक्त)। अन्वितस्य=युक्तस्य राज्ञः (see Prose).

40. Thus you can win all.

विस्मयः क इव वा जयश्रिया नैव मुक्तिरपि ते दवीयसी।
ईप्सितस्य न भवेदुपाश्रयः कस्य निर्जितरजस्तमोगुणः ॥४०॥

Prak.—See charcha—note. 1.

Prose—जयश्रिया (उपलक्षितस्य) तव क इव वा विस्मयः (न किञ्चित् आश्चर्य्यम्, सर्वं सम्भवमेव), (ततः) मुक्तिरपि ते दवीयसी (दूरतरा) न (भवति)। निर्जितरजस्तमोगुणः (जनः) कस्य ईप्सितस्य उपाश्रयः (आस्पदं) न भवेत् (सर्वस्यैव ईप्सितस्य आश्रयः भवेत् एव)।

Eng.—Marked with rising fortune, what is impossible to you ? So even liberation is not far from thee. Of what

desire does not a man who has conquered the quality of Rajas and Tamas, become the resort ?

Expl.—You seem to possess grand fortune, so everything is possible to you—liberation even is not far ahead of you. You have won Rajas and Tamas—you are सत्वयुक्त, so you cannot but gain all desires.

Malli.—किञ्च 'जयश्रिया' हेतुना, प्राप्तया अपि इति शेषः। 'क इव वा विस्मयः' किमाश्चर्यम्, न कश्चित् इत्यर्थः ["विस्मयोऽद्भुतमाश्चर्यम् चित्रम्" इत्यमरः]। अतः 'मुक्तिरपि ते' तव 'दवीयसी' दूरतरा दुर्लभा न भवति एव ["स्थूलदूर—" इत्यादिना यणादिपरलोपः पूर्वगुणश्च]। तथाहि 'निर्जितरजस्तमोगुणः' निर्जितौ रजस्तमसी एव गुणौ येन सः भवत्सदृशः पुरुषः 'कस्य ईप्सितस्य' वाञ्छितस्य 'उपाश्रयः' आस्पद' 'न भवेत्' इत्यर्थः ॥ ४० ॥

Charcha

1. जयश्रिया—जयस्य श्रीः, auspicious or victorious fortune. तत्। तया। हेतौ ३या (acc. to Malli.); or—उपलक्षणे ३या। जयश्रिया (उपलक्षितस्य) तव इत्यर्थ.—See Prose. एवम्भूतस्य तव क इव (विषयः इत्यर्थः) विस्मयः (विस्मयकरः) भवति ? एवम्भूतस्य तव सर्वं एव सुलभः इत्यर्थः। ततः किम् ?—ततः ते मुक्तिः दवीयसीन भवति &c.

1. A. कः इव—इव here indicates indescribable (indefinite) something.

2. दवीयसी—दूर + ईयसुन् = दव् + ईयसुन् = दवीयस् + ङीप् स्त्रियाम् = दवीयसी far. Pred. to मुक्तिः।

3. भवेत्—भव + लिङ् (शक्ति) + यात्। Can become. Nom. जनः understood. See Prose.

4. उपाश्रयः—Pred. to जनः।

5. निर्जित etc.—रजश्च तमश्च रजस्तमसी, द्वन्द्वः। ते एव गुणौ इति कर्मधा। नितरां जितः इति निर् + जि + क्त कर्मणि = निर्जित won. निर्जितौ रजस्तमोगुणौ येन, बहु। Qual. जनः understood. Such a man can win all, so you too can win all.

41. Hence you should not take other's arrow.

ह्रेपयन्नहिमतेजसं त्विषा स त्वमित्थमुपपन्नपौरुषः।
हर्तुमर्हसि वराहभेदिनं नैनमस्मदधिपस्य सायकम् ॥४१॥

Prose—त्विषा (तेजसा) अहिमतेजसं (सूर्यं) ह्रेपयन् उपपन्नपौरुषः स त्वम्, एनं वराहभेदिनम् अस्मदधिपस्य सायकम् इत्थं (अनेन प्रकारेण) हर्तुं न अर्हसि।

Eng.—It does not behove thee to take away in this way, this boar—piercing arrow of our master; for you have lowered the hot-rayed sun by your lustre and has thus established your manliness (prowess) [as a great one].

Malli.—अथ आगमनप्रयोजनं उपालम्भमुखेन आह (the kirata states his cause of arrival there by censuring Arjuna) ह्रेपयन्निति। 'त्विषा' तेजसा 'अहिमतेजसं' उष्णतेजसं 'ह्रेपयन्' लज्जयन् 'उपपन्नपौरुषः' सम्भावितपराक्रमः 'सः' प्रसिद्धः 'त्वं, वराहभेदिनं' (? अतः) कृतोपकारकम् 'एनं' त्वत्करगतं 'अस्मदधिपस्य सायकं' शरम् 'इत्थं' साहसेन 'हर्तुं न अर्हसि' ॥

Charcha.

1. ह्रेपयन्—ह्री लज्जायाम् + णिच् + लटः स्थाने शतृ = ह्रेपयन् by putting to shame. Qual. त्वम्। Here पुगागम in णिच् is by the rule "अर्त्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ"। Arjuna's divine lustre due to penance, surpassed सूर्य।

2. अहिमतेजसम्—अहिमं (उष्णमित्यर्थः) तेजः यस्य, बहु। तम्।

Refers to सूर्य्य। Obj. of क्षेपयन्॥ त्विषा—त्विष् is lustre. तेन ; करणे ३या।

3. उपपन्न etc.—उप+पद+क्त कर्त्तरि=उपपन्न means युक्त (उपगत); उपपन्नं पौरुषं यस्य, बहु। Or—with अन्तर्भावितण्यर्थ, उपपन्न means प्रकाशित (स्थापित)। तादृशं पौरुषं यस्य, बहु। Qual. त्वम्।

4. अर्हसि—अर्ह+लट सि। Nom. त्वम्।

5. वराहभेदिनम्—वराहं भिनत्तीति वराह+भिद+णिनि कर्त्तरि साधुकारिणि =वराहभेदिन् piercer of the boar. तम। Qual. सायकम्। Such an arrow is उपकारक and is to be cared for.

6. एनम्—अन्वादेशे (i e, to denote subsequent mention or assertion) एतद्-शब्द स्थाने 'एन' आदेश in द्वितीया, २या १म and ६ष्ठ & ७मी द्विवचन by the rule "द्वितीया टौ स्वेनः"। Qual. सायकम् (which is obj. of हर्त्तुम्)।

7. अस्मदधिपस्य—अधिपातीति अधि+पा+क कर्त्तरि=अधिपः lord. अस्माकम् अधिपः, ६तत्। तस्य। शेषे ६ष्ठी, related to सायकम्। This appearance of kitrata was due to Siva's device. Thus Siva will test Arjuna. Being ultimately pleas d he will grant boon to Arjuna for his success in destroying his enemies.

42. As a good, you must stick to virtue.

स्मर्यते तनुभृतां सनातनं न्याय्यमाचरितमुत्तमैर्नृभिः।
ध्वंसते यदि भवादृशस्ततः कः प्रयातु वद तेन वर्त्मना ॥४२॥

Prose—उत्तमैः नृभिः तनुभृतां (देहिनां) सनातनं न्याय्यं आचरितं (आचारः) स्मर्य्यते (उपदिश्यते)। (यदि) भवादृशः ततः (तस्मात्) ध्वंसते (विच्युतो भवति), तदा त्वं वद, तेन वर्त्मना कः प्रयातु (गच्छेत्)?

Eng.—Eternal good line of action for men, is advised

(in smritis) by good sages (like Manu etc.) ; if men of your calibare deviates from that, then say, who indeed will follow this line of action.

Malli.—अनर्हत्वमेवाह (The poet enumerates his unbecomingness in picking the arrow of another), स्मर्यत इति । 'उत्तमैः नृभिः' सत्पुरुषैः मन्वादिभिः 'तनुभृतां' शरीरिणां 'सनातनं' नित्यं 'न्याय्यं' न्यायात् अनपेतम् 'आचरितं' आचारः 'स्मर्यते' कर्त्तव्यतया इति शेषः, न तु अनाचारः (स्मर्यते) इत्यर्थः। तथापि अनाचरणे दोषमाह—ध्वंसत इति भवानिव दृश्यते इति 'भवादृशः ततः' सदाचारात् 'ध्वंसते' भ्रश्यते यदि 'तदा' 'तेन वर्त्मना' न्यायमार्गेण 'कः प्रयातु' गच्छतु ? 'वद' कथय, न कोपि इत्यर्थः। तथा च सन्मार्गः एव खिलः स्यात् इति भावः ॥ ४२ ॥

Charcha.

1. स्मर्यते—स्मृ+लट् ते कर्मणि। Is being remembered i. e., is advised in स्मृतिशास्त्र। Nom. नृभिः (refering to मनु etc.). Its उक्तकर्म is आचरितम् ॥ आ+चर+क्त नपुंसके भावे=आचरितम् behaviour, line of action.

2. तनुभृताम्—तनु+भृ+क्विप्=तनुभृत् bodied being. See also प्राणभृत् in sl. 25. तेषाम्। शेषे षष्ठी।

3. सनातनम्—सना+सदा are अव्यय meaning always. सना भव इति सना+ट्यु (अन)=सना+तुट् (त)+अन=सनातन eternal. तत्। Qual. आचरितम्। Here affix ट्यु and तुडागम is by the rule "सायंचिरं प्राह्णे प्रगे अव्ययेभ्यः ट्युट्युलौतुट् च"।

4. न्याय्यम्—न्यायात् अनपेतम् इति न्याय+यत्=न्याय्यम् virtuous. Qual. आचरितम्। Here यत् comes by the rule "धर्मपथ्यर्थन्यायादनपेते"।

5. ध्वंसते—ध्वंस भ्वादि + लट ते। Slips. Nom. भवादृशः।

6. ततः—An अव्यय, having sense of अपादाने ५मी। ततः = तस्मात् आचारात्।

7. भवादृशः—भवत् + दृश + कञ् कर्म्म कर्त्तरि = भवादृशः manlike you. Adj. and substantively. Here आ in भवा comes by the rule "आ सर्व्वनाम्न."—(दृग्दृशवतुषु)। See our notes on मादृशाम् in Canto I. under "प्रवृत्तसाराः खलु मादृशां गिरः"।

8. प्रयातु—प्र + या + लोट तु। Should go. अर्हार्थे लोट्। Nom. कः।

9. वद—वद + लोट हि। Do tell. Nom. त्वम्।

10. वर्त्मना—वर्त्मन् track. तेन। करणे ३या।

43. Ascetics like you practise good action.

आकुमारमुपदेष्टुमिच्छवः सन्निवृत्तिमपथात् महापदः।
योगशक्तिजितजन्ममृत्यवः शीलयन्ति यतयः सुशीलताम् ॥४३॥

Prose.—योगशक्तिजितजन्ममृत्यवः यतयः (योगिनः), आकुमारं (शिशून् प्रति) महापदः (आपद्युक्तात्) अपथात् सन्निवृत्तिम् (अपगमम्) उपदेष्टुम् इच्छवः (सन्तः), सुशीलतां शीलयन्ति।

Eng.—The ascetics that have conquered re-birth and death by their *Joga power* and that are desirous of advising even to boys, non-entrance into wrongful path full of perils, do indeed practise goodness.

[N. B.—So as a योगिन्, you must observe सन्मार्ग and सुशीलता and should not take away other's arrow].

Malli—आकुमारमिति—किं च......'योगशक्तिजित-जन्ममृत्यवः' योगशक्त्या आत्मज्ञानमहिम्ना जितौ जन्ममृत्यू यैः ते 'यतयः' योगिनः, आ कुमारेभ्यः 'आकुमारम्' कुमारात् आरभ्य इत्यर्थः ["आङ् मर्य्यादाभिविध्योः" इति अव्ययीभावः], महत्यः

आपदः यस्मिन् तस्मात् 'महापदः' महानर्थहेतोः इत्यर्थः, 'अपथात्' अमार्गात् ['पथो विभाषा" इति निषेधविकल्पात् समासान्तः। "अपथं नपुंसकम्"] 'सन्निवृत्तिम्' अपगमनं 'उपदेष्टुम् इच्छवः' सन्तः 'सुशीलतां' सद्वृत्तताम् ["शीलं स्वभावे सद्वृत्ते" इत्यमरः] 'शीलयन्ति' अभ्यस्यन्ति। अतो न (त्वया) त्याज्यम् शीलमित्यर्थः ॥ ४३ ॥

Charcha.

1. आकुमारम्—कुमार is children. आ कुमारेभ्यः (beginning with children) ; आकुमारम्, अव्ययीभावः। For rule See Malli. Here 'आ' denotes inclusion (अभिविधि) as opposed to exclusion (मर्य्यादा)। Cp. "तेन विना मर्य्यादा तत्सहितोऽभिविधिः। Adv. Qual. उपदेष्टुम् (उप+दिश+तुमुन्)। The really good one wish to advise all beginning with कुमार even. Cp. also "आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः"—Raghu IV.

2. इच्छवः—इच्छु desirous. ते। Pred. to यतयः।

3. सन्निवृत्तिम्—सम् + नि + वृत + क्तिन्। Entrance Obj of उपदेष्टुम्।

4. अपथात्—न पन्थाः इति अपथम् wrong track. Here optional समासान्त in तत्पुरुष is by the rule "पथो विभाषा"। And the word is also neuter—See Malli. Cp "वर्णानां अपथमपकृष्टोपि भजते"—Sak. V. तस्मात्। अपादाने ५मी॥ महत्यः आपदः यस्मिन् इति महापत्, बहु and पुंवद्भावः। तस्मात्। Qual. अपथात्॥

5. योगशक्ति etc.—जन्म च मृत्युः च जन्ममृत्यू, द्वन्द्वः। योगशक्त्या जितौ, ३तत्। तादृशौ जन्ममृत्यू यैः, बहु। Or—जितौ जन्ममृत्यू यैः, बहु। योगशक्त्या जितजन्ममृत्युः, ३तत्। तौ। Qual. यतयः।

6. शीलयन्ति—शील+णिच्+लट अन्ति। Nom. यतयः।

7. सुशीलताम्—सु शोभनं शीलं यस्य, सुशीलः, बहु। तस्य भाव इति तल् (सुशीलता)। ताम्। Obj. of शीलयन्ति।

44. Goodness is liked by all.

तिष्ठतां तपसि पुण्यमासजन् सम्पदोऽनुगुणयन् सुखैषिणाम्।
योगिनां परिणमन् विमुक्तये केन नास्तु विनयः सतां प्रियः ॥४४॥

Prak.—विनयः केन (हेतुना) सतां प्रियः न अस्तु? [Why should not honesty (goodness) be liked by the good]. Why do you say so?—तपसि तिष्ठतां (जनानां) पुण्यमासजन् विनयः [For, goodness is conducive of merit to those practising penance]. Is this all?—सुखैषिणां सम्पदः अनुगुणयन् विनयः [Further because goodness favours accumulation of wealth to those hankering after happiness in this world]. Anything more?—योगिनां विमुक्तये परिणमन् [For goodness results in salvation to the jogins even. As goodness is so very meritorious, so it is liked by all].

Prose.—तपसि तिष्ठतां (जनानां) पुण्यम् आसजन् (स्थापयन्), सुखैषिणां सम्पदः अनुगुणयन् विनयः (सौशील्यं) केन (हेतुना) सतां प्रियः न अस्तु?

Eng—Why should not goodness—which establishes merit to the practiser of penances, which augments wealth of those yearning for happiness, and which results in salvations of the *jogins*, be liked by all?

Beng.—তপোনিরতদের পুণ্যস্থাপক, সুখান্বেষিদের সম্পদ্বর্দ্ধক ও যোগিদের মুক্তিপ্রদ সুশীলতা কেন না সৎদিগের প্রিয় হইবে।

Malli.—न केवलं सौशील्यात् अनर्थनिवृत्तिः, किन्तु अर्थप्राप्तिरपि इत्याह तिष्ठतामिति। 'तपसि तिष्ठतां' तपोनिष्ठानां, धर्मार्थिनाम् इत्यर्थः, 'पुण्यं' धर्मम् 'आसजन्' सम्पादयन् ["स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः" इत्यमरः]।

'सुखैषिणां' सुखार्थिनां 'सम्पदः' सुखसाधनभूतान् अर्थान् 'अनुगुणयन्' अनुकूलयन्, अर्थकामयोः अपि हेतुभूत इत्यर्थः। तथा 'योगिनां विमुक्तये' अपवर्गाय 'परिणमन्' सम्पद्यमानः 'विनयः' सौशल्य' 'केन' हेतुना 'सतां प्रियः न अस्तु' [सम्भावनायां लोट्]। सर्व्वथा विनय एव चतुर्वर्गसाधनम् इत्यर्थः। अतः त्वया न अस्मत्-स्वामिशरचौर्य्यं कार्य्यम् इति तात्पर्य्यम् (1) ॥ ४४ ॥

1. Goodness indeed yields चतुर्वर्ग (i. e. धर्म्म, अर्थ, काम, मोक्ष) ; So you as a good must not steal away the arrow of our master.

Charcha.

N. B—In previous sloka it is said that sages practise goodness (see sl. 43). So the implication is that as a sage you also observe goodness, for goodness is चतुर्वर्गद and is liked by all (as said in sl. 44). By this, now it is said that you should not thus steal other's arrow. That you seem to like it is (so I believe) due to you misapprehension (sl. 45).

1. तिष्ठताम्—स्था + शतृ = तिष्ठत् remaining तेषाम्। Qual. जनानाम्। Or—adj. used substantively.

2. आसजन्—आ + सञ्ज + शतृ = आसजन् establishing. Qual. विनयः। Cp. "आससञ्ज भूमिर्धुरम्", and "सतंस्कन्धे समासजत्"।

3. अनुगुणयन्—अनुगुण is favourable. अनुगुणं करोति इति अनुगुण + णिच् + शतृ = अनुगुणयन् favouring, augmenting. Qual. विनयः। Owing to विनयः, सुखैषिण् (सुख + इष + णिनि) gets his wealth (सम्पद्) nessecery for his सुख।

4. परिणमन्—परि + नम + शतृ। Qual. विनयः। "उपसर्गात् असमासेपि णोपदेशस्य" इति अत्र णत्वम्।

5. विमुक्तये—वि + मुच + क्तिन् भावे = विमुक्ति salvation. तस्यै। "क्लृपिसम्पद्यमाने च" इति ४र्थी।

6. केन—हेतौ ३या।

7. अस्तु—अस्+लोट्तु। सम्भावनायां लोट। Nom. विनयः। Goodness is favoured by all.

8 सताम्—शेषे ६ष्ठी। Or कृद्योगा कर्त्तरि षष्ठी—the कृत् being in प्रियः। Thus सन्तः प्रीणन्ति in तिङ्=becomes सतां प्रियः in कृत्योग।

45. You take the arrow surely owing to similarixy.

नूनमत्रभवतः शराकृतिं सर्वथा अयमनुयाति सायकः।
सोऽयमित्यनुपपन्नसंशयः कारितस्त्वमपथे पदं यया॥ ४५॥

Prose—अयम् सायकः नूनम् अत्रभवतः (पूज्यस्यतव) शराकृतिं सर्वथा अनुयाति। यया (आकृत्या) सोयम् इति अनुपपन्नसंशयः त्वम् अपथे पदं कारितः।

Eng.—This arrow surely imitates the appearance of your arrow by all means, whereby you having no doubt as this is yours, is caused to set your foot on this unlawful track.

Beng.—Easy.

Malli.—अथवा किं भवादृशेषु अन्यसम्भावनया, यतो भ्रान्तिरपि सम्भाव्यते इति मृदूक्तिमवलम्ब्याह नूनमिति। 'अयम्' अस्मदीयः 'सायकः', 'अत्रभवतः' पूज्यस्य इत्यर्थः ["पूज्यस्तत्रभवानत्रभवान्" इति सज्जनः। "इतराभ्योपि दृश्यन्ते" इति सार्वविभक्तिकः तल् प्रत्ययः। सुप्सुपेति समासः] 'शराकृतिं' 'सर्वथा' रूपेण रेखादिना च सर्वप्रकारेण 'अनुयाति' अनुसरति, अत्यन्तम् अनुकरोति इत्यर्थः ['नूनम्' इति वितर्के]। 'यया' आकृत्या कर्त्र्या 'त्वम् अनुपपन्नसंशयः' अत्यन्तसादृश्यात् अनुपपन्न-स्वान्यदीयत्व-सन्देहः सन्, 'सोयम् इति' यः स्वकीयः स एवायम् इति भ्रान्त्युत्पत्त्या एव इति शेषः। 'अपथे' अमार्गे शरापहरणरूपे 'पदं कारितः' निधापितः इत्यर्थः ["हृक्रोरन्यतरस्याम्" इत्यणिकर्त्तुः कर्म्मता। "स्युन्ते कर्त्तुश्च कर्म्मणः" इति तत्रैव अभिहिते कर्म्मणि क्तः]॥ ४५॥

Charcha.

1. नूनम्—An अव्यय indicating certainty. Thus it means 'surely'. Malli. has वितर्के i. e, in the sense of this certain apprehension.

2 अत्र भवतः—शेषे ६ष्ठी। अयम् इति इदम्+सु (१मा)+त्रल् = अत्र this. अत्र भवान्, इति सुप्सुपा। तस्य. For rules see Malli and also our notes under अत्रभवान् in sl. 18 Canto XI.

3. अनुयाति—अनु+या+लट ति। Imitates. Nom सायकः। For सर्वथा अनुकरण—see Malli "रूपेण रेखादिना च" &c.

4. अनुपपन्न etc.—अनुपपन्नः (अयुक्तः असम्पादितः वा) संशयः यस्य, बहु। Qual. त्वम्। See also उपपन्न in उपपन्नपौरुष in sl. 41 ante. As you had no doubt, so you have done go. Otherwise as a good sage, you cant do so—this is my strong apprehension.

5. कारितः—कृ+णिच्+क्त कर्म्मणि। Is caused to made. Agrees with उक्तकर्म्म—त्वम्। For rules here see Malli and our notes under कारयन् (sl. 38). त्वम् पदं कृतवान् becomes in णिच्—सा त्वां (त्वया वा) पदं कारितवती। In change of voice it is = तया त्वं पदं कारितः।

6. अपथे—For समास &c. see अपथात् sl. 43. अधिं ७मी।

7. यया—Refers to शराकृतिः। अनुक्ते प्रयोजके कर्त्तरि ३या।

46. You should feel shame to take other's arrow.

अन्यदीयविशिखे न केवलं निःस्पृहस्य भवितव्यमाहृते।
निघ्नतः परनिबर्हितं मृगं व्रीडितव्यमपि ते सचेतसः॥ ४६॥

Prose.—सचेतसः ते अन्यदीयविशिखे (विषये) आहृते (आहरणे) न केवलं निःस्पृहस्य भवितव्यम्, अपि ते परनिबर्हितं (परव्यापादितं) मृगं निघ्नतः व्रीडितव्यम्।

Eng.—You being sympathetic should not only be unattached in the matter of taking other's arrow, but should feel shame too in killing the boar already struck by another.

Beng.—তুমি সহৃদয়, অন্যের শর আহরণবিষয়ে নিঃস্পৃহত হইবেই, তা ছাড়া অন্য কর্তৃক আহত মৃগকে (বরাহকে) মারিতেও লজ্জা বোধ করা উচিত।

Malli.—पुनरपि स्तेयमेव द्रढ़यन् दोषान्तरम् आपादयति, अन्यदीयेति। सह चेतसा वर्त्तते इति सचेताः तस्य 'सचेतसः' मनस्विनः ते 'अन्यदीयविशिखे' विषये 'आहृतौ' यदाहृतम् आहरणम् [भावे क्तः] तस्मिन्; अन्यदीयविशिखस्य आहरणे इत्यर्थः। 'निःस्पृहस्य केवलं' निःस्पृहेणैव 'न भवितव्यम्' किन्तु 'परनिर्वर्हितं' परेण प्रहृतं 'मृगं निघ्नतः' प्रहरतः 'ते' निघ्नता त्वया इत्यर्थः ["कृत्यानां कर्त्तरि वा" इति षष्ठी] 'वोड़ितव्यम्' लज्जितव्यम् 'अपि' [भावे तव्यप्रत्ययः]। सम्प्रति त्वया परविद्धं मृगं विद्ध्वापि न व्रीड्यते, प्रत्युत स्तेयमेव क्रियते इत्यहो महत् साहसम् इत्यर्थः। ['मृगम्' इत्यत्र शेषत्वाविवक्षणात् "जासिनिप्रहणनाटक्राथपिषां हिंसायाम्" इति षष्ठी न भवति। (? अस्य सूत्रस्य) शेषाधिकारात्। 'निप्रहण' इत्यत्र निप्रयोः सङ्घातव्यस्तविपर्य्यासानां ग्रहणात् (? ग्रहणम्)] ॥ ४६ ॥

N. B.—The correct reading in Malli is suggested by (?) this sign.

Charcha.

1. अन्यदीयविशिखे—अन्यस्यायम् इति अन्य+छ (दुगागमश्च)। अन्यदीयः विशिखः, कर्म्मधा। तस्मिन्। विषयाधिकरणे ७मी।

2. निःस्पृहस्य—निर्गता स्पृहा यस्य, बहु। तस्य। Pred. to ते।

3. भवितव्यम्-भू+तव्य भावे। Nom. ते। This takes optionally षष्ठी by the rule "कृत्यानां कर्त्तरि वा"। Hence त्वया is also correct—thus त्वया निःस्पृहेण भवितव्यम्।

4. आहृते—आ + हृ + क्त नपुंसके भावे = आहृतम् i. e. आहरणम् (taking). तस्मिन्। विषयाधिकरणे ७मी।

5 निघ्नतः—नि + हन + शतृ। तस्य। Pred. to ते।

6. परनिवर्हितम्—परेण निवर्हितम् (प्रहृतम्), ३तत्। Qual. स्वगम्।

7. व्रीड़ितव्यम्—व्रीड़ + तव्य भावे। Nom. ते which takes षष्ठी hereby "कृत्यानां—" see notes 3 above.

8. सचेतसः—चेतसा सह वर्त्तते इति सचेताः, बहु—by "तेन सहेति तुल्ययोगे"। तस्य। Qual. ते।

47-48. I do not hereby publish brag of my master.

सन्ततं निशमयन्त उत्सुकाः यैः प्रयान्ति मुदमस्य सूरयः।
कीर्त्तितानि हसितेऽपि तानि यं व्रीड़यन्ति चरितानि मानिनम् ॥४७॥
अन्यदोषमिव स स्वकं गुणं ख्यापयेत् कथमधृष्टताजड़ः।
उच्यते स खलु कार्यवत्तया धिग्विभिन्नबुधसेतुमर्थिताम् ॥४८॥

Prose—अस्य (अस्मत्स्वामिनः) यैः (चरितैः) सूरयः (बुधाः) सन्ततं उत्सुकाः (सन्तः) निशमयन्तः (शृण्वन्तः) मुदं प्रयान्ति, तानि (चरितानि) हसितेपि (परिहासप्रसङ्गेपि) कीर्त्तितानि (सन्ति) यं मानिनं (अस्मत्स्वामिनं) व्रीड़यन्ति, अधृष्टताजड़ः (अविकत्थनः) सः (अस्मत्स्वामी) अन्यदोषमिव कथं स्वकं गुणं ख्यापयेत् ? सः (स्वगुणः) मया कार्य्यवत्तया उच्यते खलु।. विभिन्न-बुधसेतुम् (लङ्घितमर्य्यादाम्) अर्थितां (शरणहणरूपाम् इत्यर्थः) धिक्।

Eng.—The deeds of our spirited master, by which the goods ever eagerly listening to, attain pleasure and which even if uttered by way of joke, puts him to shame, can not be spoken of by him like other's faults ; because he is inactive out of his delicacy. It is however being stated by me owing.

to necessity. But I fie to your desire for taking which has transgressed the limits of the good.

Beng.—আমাদের স্বামীর যে কার্য্যচরিত নিরন্তর সোৎসুক হইয়া শুনিতে শুনিতে পণ্ডিতগণ আনন্দ লাভ করে, এবং যাহা পরিহাসচ্ছলে উচ্চারণ করিলেও মানী স্বামীর লজ্জা উৎপাদন করে, এরূপ লজ্জাস্তব্ধ আমাদের স্বামী পরদোষের ন্যায় নিজগুণ খ্যাপন করিতে পারেন না। তবে কার্য্যবশতঃ আমি তদীয় গুণ খ্যাপন করিলাম। (কিন্তু) তোমার শরগ্রহণরূপ অর্থিতা—যে অর্থিতা (পরদ্রব্য গ্রহণহেতু), সুজনের সীমা অতিক্রম করিয়াছে,—তাকে ধিক্ (অর্থাৎ নিন্দা করিতেছি)।

Malli —अथ अस्मिन् कृतघ्नताभियोगाय स्वीयोपकारत्वं वर्णयितु', विकत्थनदोषं तावत युग्मेन परिहरन् आह—सन्ततमित्यादि। 'सूरय:' विद्वांस: 'अस्य' अस्मत्-स्वामिन: सम्बन्धिभि: 'यै:' चरितै: करणभूतै: 'सन्ततं' सततं 'उतसुका:' सोत्कण्ठा: सन्त: 'निशमयन्त:' चरितानि शृण्वन्त: 'मुद: प्रयान्ति' [अत्र चरितानां मुत्प्राप्तौ शाब्दं करणत्वम्। अर्थात् निशमनकर्म्मत्वम् इति विवेक:], 'तानि चरितानि हसितेपि' परिहासेपि 'कीर्त्तितानि' परै: उच्चारितानि सन्ति 'यं' मानिनं व्रीडयन्ति'। मानित्वात् व्रीडा, न तु चरित्रदोषात्। तेषां अलङ्कारत्वपत्वात् इति भाव: ॥ ४৩ ॥ 'अधृष्टताजड:' अधृष्टतया विकत्थनेनशालीनतया जड: स्तब्ध:, अविकत्थन इत्यर्थ:, 'स' अस्मत्स्वामी 'अन्यदोष'' परावरगुणम् 'इव स्वक' स्वकीय' 'गुण' कथ ख्यापयेत्' प्रकटयेत्? [''आत्मप्रशंसा परगर्हामिव वर्जयेत्'' इति स्मरणात्] तथापि 'कार्य्यवत्तया' कार्म्मार्थितया इत्यर्थ:, 'स:' स्वगुण: 'उच्यतेखलु'। कार्य्यार्थिन: कुतोगर्व: इति भाव: ? (? अधुना) निर्विन्न इव आह धिगिति—'विभिन्नबुधसेतुम्' अतिक्रान्त-सुजनमर्य्यादाम् 'अर्थिताम्' याचनां 'धिक' निन्दामि इत्यर्थ:। यत् अयमपि इयं विकत्थयितुम् प्रवृत्त इति भाव:। ''धिक् निर्भत्सननिन्दयो:'' इत्यमर:। उभसर्वतसो: कार्य्याधिगुपर्य्यादिषु त्रिषु द्वितीयाम्रेडितान्तेषु ततोन्यत्रापि दृश्यते'' इति (? धिक् शब्दयोगे) द्वितीया] ॥४८॥

Charcha.

1. सन्ततम्—सम् + तन + क्त = सन्ततम् or सततम् always. Adv. Qual. निशमयन्त:। "समो वा ततहितयो:" इति विकल्पेन 'म्' लोप:।

2. निशमयन्त.—नि + शम + णिच् + शतृ। Hearing; Pred. to सूरय:। शम + णिच् in the sense of 'hearing' is मित्। Cp. "शाम्यतिदर्शने मिन्नस्यात्'—Bhattoji.

3. यै:—Refers to चरित ; करणे ३या। It should be कर्म्म of निशमन here. So Malli says "व्रतचरितानां......कर्म्मत्वम् इति विवेक:"।

4. प्रयान्ति—प्र + या + लट अन्ति। Attain to Nom. सूरय:।

5. हसिते—हस + क्त नपुंसके भावे = हसितम (हसनम्) i. e. joke. तस्मिन्। अधिं ७मी।

6. व्रीडयन्ति—व्रीड् + णिच् + लट अन्ति। Nom. तानि चरितानि।

7. ख्यापयेत्—ख्या + णिच् + लिङ् यात्। Should promulgate Nom. स:।

8. अधृष्टता etc,—अधृष्टता is delicacy. जड़: is inactive. अधृष्टतया जड़. i. e. अविकत्थन, सुप्सुपा (or ततत्)। Qual. स:। Our master is silent in bragful utterance i. e. he feels delicacy in h's आत्मप्रशंसा। He avoids it like परदोषकीर्त्तन।

9. कार्य्यवत्तया—कार्य्य + वतुप् अस्त्यर्थे = कार्य्यवत् one having work. तस्य भाव: इति कार्य्यवत्ता (with तल् added). तया ; हेतौ ३या। स: स्वगुण: is beingsaid (उच्यते = ब्रू + लट ते कर्म्मणि) owing to necessity of circumstances.

10. अर्थिताम्—Refers to शरयाञ्चा etc. धिक् शब्दयोगे २या। See Malli also.

11. विभिन्न etc.—वि + भिद + क्त कर्म्मणि = विभिन्न transgressed (अतिक्रान्त)। सेतु is मर्य्यादा (limit in observance of goodness).

बुधानां सेतुः इतत्। विभिन्नः बुधसेतुः यया, बहु। ताम्। Qual. अर्थिताम्। Such अर्थिता is censured. So your अर्थिता in taking arrow is to be censured ; for you take (steal) other's arrow.

49. Our master has served you by killing the boar.

दुर्वचं तदथ मा स्म भून्मृगः त्वय्यसौ यदकरिष्यदोजसा।
नैनमाशु यदि वाहिनीपतिः प्रत्यपत्स्यत शितेन पत्रिणा ॥४८॥

Prose.—यदि वाहिनीपतिः शितेन पत्रिणा एनं (मृगं) आशु न प्रत्यपत्स्यत (अभियुञ्जीत) (तदा) असौ (मृगः) ओजसा त्वयि यत् अकरिष्यत् तत् दुर्वचम् (वक्तुं न शक्यते) ; अथ तत् (अनिष्टम्) मा स्म भूत्।

Eng—It is unspeakahle what the boar would forcibly have done to thee, had not the leader of our army attacked this one with his sharp arrow. And let not that happen to thee.

Mulli—सम्प्रति स्वकृतोपकारं दर्शयति—दुर्वचमिति। 'वाहिनीपतिः' सेनापतिः अस्मत्स्वामी 'शितेन पत्रिणा' शरेण 'एनं' मृगं 'आशु न 'प्रत्यप्रत्स्यत यदि' न अभियुञ्जीत चेत् 'असौमृगः ओजसा' बलेन 'त्वयि' विषये 'यदकरिष्यत्' यत्अनिष्टं कुर्य्यात् तत् 'दुर्वचम्' दुर्वाच्यम् अमङ्गलतया वक्तुं न शक्यते। 'तत्' अनिष्टम् 'अथ' अनन्तरम् अपि 'मा स्म भूत्' इति सौहार्दकथनम् ; तदुपेक्षणे स मृगः त्वां हन्यात् इति भावः। ["लिङ्निमित्ते लृङ् क्रियातिपत्तौ" इति करोतेः पद्यतेश्च लृङ्] ॥ ४९ ॥

Charcha.

1. दुर्वचम् - दुर + वच + खल् कर्मणि = दुर्वचम् hardly to be spoken. The result (i. e. तत्) is said as दुर्वच, for the result i. e. death being अमङ्गल is not to be uttered. Pred. to तत् (See Prose).

2. मा भूत्—भू + लुङ् द। Let not be. Nom. तत्। माङ् is a निषेधार्थक अव्यय। लुङ् in connection with माङ् comes to

denote all tenses by "माङि लुङ्"। Then अड़ागम of लुङ् is prohibited in लुङ् owing to presence of माङ् by "न माङ्योगे"। Here लङ् will be optional for we have स्म—the rule being "स्मोत्तरे लङ् च"।

o. ओजसा, पविणा—करणे तृया। शो + क्त = शित sharp. तेन। Qual. पविणा।

4. अकरिष्यत्—कृ + लृङ् स्यत्। Would have done. Nom. मृग:।

5. प्रत्यपत्स्यत—प्रति + पद + लृङ् स्यत। Would have attacked. Nom. वाहिनीपति: It suggests that he is your ally as well for this. Its object is एनम् (referring to मृगम्); अन्वादेशे एतत्स्थाने एनादेश: ॥ Here लृङ् is used to denote causal connection of non-fulfilment of one implying nonfulfilment of another. The rule is—"लिङनिमित्ते लृङ् क्रियातिपत्तौ" (See Malli.). Cp. "कथम् वाभविष्यत् अरुणस्तमसां विभेत्ता यदि ··धुरि नाकरिष्यत्" in Sak VII.

50. None but our master can kill such a boar.

को न्विमं हरितुरङ्गमायुधस्थेयसीं दधतमङ्गसंहतिम् ।
वेगवत्तरमृते चमूपते: हन्तुमर्हति शरेण दंष्ट्रिणम् ॥ ५० ॥

Prose.—हरितुरङ्गमायुध-स्थेयसीं (वज्रकठिनाम्) अङ्गसंहतिं दधतं वेगवत्तरं इमं दंष्ट्रिनं चमूपते: ऋते क: नु शरेण हन्तुम् अर्हति ?

Eng.—Who else except the leader of our army can by arrow, behove to kill this invincible boar having teeth and having a bodily structure firm like thunderbolt ?

Malli.—ननु मयैव हत: मृग: न तु सेनापतिना, तत्राह क इति। 'हरितुरङ्गमायुधस्थेयसीं' हरितुरङ्गमायुधम् इन्द्रायुधं तद्वत् स्थेयसीं स्थिरतराम्, वज्रकठिनाम् इत्यर्थ: [स्थिरशब्दात् ईयसुन्। "प्रियस्थिर—"इत्यादिना स्थादेश:] 'अङ्गसंहतिम्' अवयवसंघातं 'दधतं' धारयन्तं, 'वेगवत्तरं' दुर्वारवेगम् 'इमं' 'दंष्ट्रिणं' वराहं

'चमूपते:' किरातवाहिनीपते. 'ऋते' विना ["अन्यारात्—"इत्यादिना ५मी] 'क: नु' को वा 'शरेण' एकेन इति भाव:। 'हन्तुम् अर्हति' न कोपि इत्यर्थ: ॥ ५० ॥

Charcha.

1. हरि etc.—हरि is the name of Indra's horses, as हरित् is the name of Sun's horses. तुरं (वेगं वेगेन वा) गच्छतीति तुर + गम + खच् = तुरङ्गम or तुरग (for खच् is in such cases treated as डित् प्रत्यय by "खच्च डिद्वा वक्तव्य:)। हरय: तुरङ्गमा: यस्य स हरितुरङ्गम: i. e. Indra, बहु। तस्य आयुधम् his weapon i. e. thunderbolt, ६तत्। स इव स्थेयसी, उपमिततत्। ताम्। Qual. अङ्गसंहतिम् (अङ्गानां संहति: ताम्)। अङ्गसंहतिम् is obj. of दधतम् (धा + शतृ)। स्थिर + ईयसुन = स्थ + ईयसुन् = स्थेयसी firmer (See Malli.).

2. वेगवत्तरम् = वेग: अस्ति अस्य इति वेग + वतुप् = वेगवान्। अतिशयेन वेगवान् इति वेगवत् + तरप् = वेगवत्तर:। तम्। Qual. दंष्ट्रिणम् ॥ दंष्ट्रा (दन्तम्) अस्ति यस्य इति दंष्ट्रा + इनि मत्वर्थे = दंष्ट्रिन् a teethful one ; here refers to the boar having teeth. तम्। Obj. of हन्तुम्।

3. चमूपते:—ऋतेशब्दयोगे ५मी। See Malli.

4. अर्हति — अर्ह + लटति। Nom. क:।

5. शरेण — करणे ३या। See Malli.

51. *He is thus your friend by killing the boar and thus saving you.*

मित्रमिष्टमुपकारि संशये मेदिनीपतिरयं तथा च ते।
तं विरोध्य भवता निरासि मा सज्जनैकवसतिः कृतज्ञता ॥५१॥

Prose.—तथा च अयं मेदिनीपति: (किरातराज) ते संशये (प्राणसङ्कटे) उपकारि इष्टं मित्रम् (भवति)। तं विरोध्य भवता सज्जनैकवसति: कृतज्ञता मा निरासि (न निराक्रियताम्)।

Eng.—And this king of kiratas is your benefactor and desirable friend during your time of danger ; so by coming into collusion with him you should not discard gratefulness to which the good only stick to.

Malli.—अस्तु स एव सूगस्य हन्ता, ततः किम् ?—इत्यत आह, मित्रमिति. 'तथाच' तस्य एव सूगहन्तृत्वे सति इत्यर्थः, 'अयं मेदिनीपतिः' किरातभूपतिः 'ते' तव 'संश्रये' प्राणसङ्कटे 'उपकारि' उपकारकम् 'इष्टम् मित्रम्'। तथापि किम् ?—तत्राह, तमिति। 'तं' मित्रभूतं 'विरोध्य,' सज्जनैकवसतिः' भवादृशसुजनमात्राधारा 'कृतज्ञता' उपकारवेदित्व' 'मा निरासि' न निराक्रियताम् 'भवता'। अन्यथा जगति कृतघ्नत्वम् अस' यायात्, कृतघ्नता च ते भवेत् इत्यर्थः। [अस्यतेः कर्म्मणि आशिषि माङ्गिलुङ्,] ॥ ५१ ॥

Charcha.

1. उपकारि, इष्टम—Qual. मित्रम ॥ मित्रम meaning friend is always neuter. It is Pred. to मेदिनीपतिः ॥ For deriv. of मेदिनी (मेद fat + इनि), see canto I in वसूपमानस्य मसूनि मेदिनी। मेदिन्याः पतिः, ६तत्। The किरातपति is here called मेदिनीपतिः, for he is also king there of kiratas.

2. विरोध्य—वि+रुध+णिच +ल्यप। Having caused (i. e. compelled) him to conflict.

3. निरासि—निर+अस क्षेपे +लुङ चिण् कर्म्मणि। Be discarded. Here आशीरर्थे लुङ is used, in connection with मया by "माङि लुङ"। Then अडागम is prohibited by "न माङ्योगे"। Here अनुक्तकर्त्ता is भवता, and कृतज्ञता is उक्तकर्म्म।

4. सज्जनैकवसतिः—एका वसतिः only abode or resort, कर्म्मधा। सज्जनानां एकवसतिः, only resort of the good, ६तत्। Qual. कृतज्ञता। It is so called, for good only stick to कृतज्ञता। In case of your

conflict with your benefactor, you discard सन्मार्ग and become कृतघ्न, see Malli also "अन्यथा जगति......ते तावत्"।

5: *Vosce*—भवान्...एकवसति कृतघ्नतां मा निरस्थत्...।

52 & 53. Friendship with him will do you good—for friend rises above all.

लभ्यमेकसुकृतेन दुर्लभा: रक्षितारमसुरक्ष्यभूतय: ।
स्वन्तमन्तविरसा जिगीषतां मित्रलाभमनु लाभसम्पद: ॥५२॥
चञ्चलं वसु नितान्तमुन्नता: मेदिनीमपि हरन्त्यरातय: ।
भूधरस्थिरमुपेयमागतं मावमंस्त सुहृदं महीपतिम् ॥ ५३ ॥

[N. B.—If it be argued that I do not want किरातपति's friendship but I want the gain only in this matter, then the answer is—wealth &c falls below मित्रलाभ &c.]

Prose.—जिगीषतां दुर्लभा: असुरक्ष्यभूतय: अन्तविरसा: लाभसम्पद:, एकसुकृतेन (एकोपकारेण) लभ्यं रक्षितारं स्वन्तं मित्रलाभम् अनु (मित्रलाभात् हीन: इत्यर्थ:) । ५२ । (किञ्च) प्रबला: अरातय: नितान्तं चञ्चलं वसु मेदिनीमपि हरन्ति, (किन्तु) भूधरस्थिरम् उपेयम् (गन्तव्यम्) आगतं महीपतिं सुहृदं मा (भवान्) अवमंस्त ।

Eng—The acquired weath of those wishing victory, is difficult to attain, it has its benefit hardly to be protected and it has bad sequel, so these fall below acquisition of friendship gained by a single good deed. Friendship which is thus a benefactor and has good sequel. Further the powerful enemy can snatch away highly fickle fortune and the earthly property as well (but not a friend); so do not set at naught the king

friend firm like mountain, and to be sought after but come to you (so to say).

Malli.—ननु सर्वस्य अर्थमूलत्वात स एवास्तु किं मित्रेण—इत्याशङ्का मित्रस्य सर्वाधिक्यं युग्मेनाह, लभ्यमिति [by लभ्यं etc. it is said that friend is above all. So the apprehension that all being derivable from wealth what's the use of friend, in done away with]—'जिगीषतां' जेतुमिच्छतां [जयतेः सन्नन्तात् शतृप्रत्ययः] 'दुर्लभाः' कृच्छ्रेण अपि लब्धुम् अशक्याः, तथापि 'असुरक्ष्यभूतयः' रक्षितुम् अशक्यमहिमानः, नित्यं रक्षणादिक्लेशावहाश्च इति भावः। 'अन्तविरसाः' गत्वर्यः इत्यर्थः लाभसम्पदः' लभ्यन्ते इति लाभाः अर्थाः, तेषां सम्पदः। 'एकसुकृतेन' एकोपकारेण 'लभ्यं' सुलभं न तु दुर्लभम्, 'रक्षितारं' न तु रक्ष्यं, 'स्वन्तं' शुभावसानं न तु अन्तविरसं 'मित्रलाभम् अनु' मित्रलाभात् हीनाः निकृष्टा इत्यर्थः ["हीने" इत्यणोः कर्मप्रवचनीय संज्ञा। तद्योगे द्वितीया ॥ अत्र उपमेयस्य मित्रलाभस्य लाभान्तरं प्रति आधिक्याभिधानात् व्यतिरेकालङ्कारः] ॥५२॥ किञ्च 'वसु' धनं 'नितान्तं चञ्चलं' मेदिनीमपि, उन्नताः' प्रबलाः 'अरातयः हरन्ति', मित्रं तु न तथा इत्याह, भूधर इति—'भूधरस्थिरं' भूधरात् स्थिरम् 'उपेयम्' अन्विष्य गन्तव्यम् अपि 'आगतं' स्वतः प्राप्तं 'महीपतिं' सर्वधुरीणम् इत्यर्थः 'सुहृदं' मित्रं 'मावमंस्त' मावज्ञासीत्, भवानिति शेषः। [अस्मच्छ्लोकगतो वा भवत् शब्दः विभक्तिविपरिणामेन अत्र द्रष्टव्यः। अन्यथा मध्यम पुरुषः स्यात् ॥ मन्यतेः कर्मणि माङि लुङ् ॥ अलङ्कारस्तु व्यतिरेक एव। 'भूधरस्थिरम्' इति उपमासङ्कृति—सङ्करः] ॥५३॥

Charcha.

1. N.B.—लभ्यम् (लभ + यत् कर्मणि) and दुर्लभाः (दुर् + लभ + खल् कर्मणि), असुरक्ष्यभूतयः and रक्षितारम्, अन्तविरसाः and स्वन्तम् are contrasted to show the diff. of लाभसम्पद and मित्रलाभ। latter is लभ्य, other दुर्लभ & so on.

2. एकसुकृतेन—सुकृत is good deed. एकं सुकृतम् कर्मधा। तेन। करणे तृया।

3 असुरक्ष्य etc.—भूति is मङ्गल i. e. the benefit (power) to be derived. रक्ष+यत् कर्म्मणि=रक्ष्यम् to be saved. सु सहजेन रक्ष्यः इति सुरक्ष्यः easily protectable. न सुरक्ष्याः। तादृश्यः भूतयः येषाम्, बहु। The rendering असुरक्षभूतयः will be better सु सुखेन रक्ष्यते सु+रक्ष+खल् कर्म्मणि=सुरक्ष। न सुरक्षाः। तादृश्यः भूतयः येषाम्, बहु &c. as before Qual. लाभसम्पदः। सम्पद has its भूति (i e derivable benefit) असुरक्ष, for there is क्लेश in its रक्षा &c. See Malli also. Whereas मित्रलाभ is already a रक्षिता (न तु रक्ष्य)।

4. अन्तविरसाः—अन्तः विरसः येषाम्, बहु। Qual. लाभसम्पदः। wealth ends in bad sequel, whereas मित्रलाभ ends in happiness.

5. मित्रलाभम्—'अनु' इति अस्य हीनार्थे कर्म्मप्रवचनीयत्वे सति, कर्म्मप्रवचनीय योगे २या। See Malli also for rule.

6. लाभसम्पदः—लभ+घञ् कर्म्मणि=लाभः The thing acquired. तस्य सम्पदः, ६तत्। By maxim—भावानयने द्रव्यानयनम्—लाभसम्पद means लब्धसम्पद। Nom. to भवन्ति etc. understood.

7. नितान्तम्—अव्यय। Adverb.

8. हरन्ति—हृ+लट् अन्ति। Nom. अरातयः। The enemy can take away all, but not a friend. So a friend is above all.

9. भूधरस्थिरम्—धरतीति धरः (पचाद्यच्) ; भुवः धरः, शेषषष्ठीतत्। स इव स्थिरः। उपमानतत्। तम्। Qual. सुहृदम्। Such a firm friend is to be respected.

10. उपेयम्—उप+इ+यत् कर्म्मणि। To be sought. Qual. सुहृदम्। Such a दुर्लभ and so उपेय सुहृद must be accompanied. Further the सुहृद is not an ordinary one but a महीपतिः also. So take him in.

11. अवमंस्त—अव+मन+लुङ् त। Should neglect. विधौ वा

आशीरर्थे माङि सति लुङ्। See मा निरासि (Sl. 51). Nom. भवान् understood, so the verb is in प्रथमपुरुष।

12. *Voice*—भरातिभिः क्रियते &c....भवता महीपतिः स्थिरः, आगतः सुहृत् मा अवमंसि...&c.

54. Our master also your fit friend.

जेतुमेव भवता तपस्यते नायुधानि दधते मुमुक्षवः ।
प्राप्स्यते च सकलं महीभृता सङ्गतेन तपसः फलं त्वया ॥५४॥

Prose—भवता जेतुमेव तपस्यते, मुमुक्षवः आयुधानि न दधते। (ततः) महीभृता (किरातपतिना) सह सङ्गतेन त्वया तपस सकलं फलं प्राप्स्यते ।

Eng.—You practise penance for victory surely, for one desiring liberation can not take up weapon. You will reap all the fruits of penance by contracting friendship with this lord of kiratas.

Malli.—ननु मुमुक्षोः किं मित्रसंग्रहेण ? इत्यत्राह—जेतुमिति। 'भवता जेतुम्' जयार्थम् 'एव तपस्यते' तपश्चर्य्यते ["कर्म्मणोरोमन्थ—" इत्यादिना चरणे क्यङ्। ततः भावे लट्]। कुतः ?—'मुमुक्षवः' मोक्षार्थिनः 'आयुधानि न दधते' न धारयन्ति। अतः मित्रसंग्रहः कार्य्यः इति भावः। तथापि किं भवत्स्वामिसख्येन ? तत्राह प्राप्स्यते इति, 'महीभृता' सह 'सङ्गतेन त्वया सकलं तपसः फलं प्राप्स्यते' अतः ते सखा अस्मत्स्वामी युक्त इत्यर्थः ॥५४॥

Charcha.

1. तपस्यते—तपः चरति इति तपस्+क्यङ्=तपस्य (नामधातु)+लट् ति =तपस्यति practise penance. Here परस्मैपद comes by the vartitka.—"तपसः परस्मैपदं च"। Then however by वाच्यान्तर (भाववाच्य) तपस्य+लट ते भावे=तपस्य ते। Penance is being practised. Nom. भवता। See Malli. also.

2. दधते—धा + लट अन्ते। Nom. सुसुखवः।

3. प्राप्यते—प्र + आप + लट यते। Is to be got. Nom. त्वया।

4. सहीभृता—ऊह्य सहशब्दयोगे ३या॥ सङ्गतम्—सम् + गम + क्त कर्त्तरि =सङ्गत united ; तेन। Qual. त्वया। Or—सङ्गत is friendship. तेन। करणे ३या।

55. *His quarrel for an arrow is to establish his prowess.*

वाजिभूमिरिभराजकाननं सन्ति रत्ननिचयाश्च भूरिशः।
काञ्चनेन किमिवास्य पत्त्रिणा केवलं न सहते विलङ्घनम्॥५५॥

Prose.—वाजिभूमिः इभराजकाननं (गजोत्पत्तिस्थानं) भूरिशः रत्ननिचयाश्च सन्ति। (अतः) अस्य (किरातस्य) काञ्चनेन पत्रिणा किमिव (भवेत्)? असौ केवलं विलङ्घनं न सहते।

Eng.—He has horses, property, (or—land for horses), places abounding in lordly elephants, as also immense jewels; what will he do with a golden arrow? But the fact is, he can't brook transgression.

[N. B.—And as you have encroached his property, so he can't tolerate this. Hence he is apparently in collusion with you. But as he has benefited you by killing the boar, so take him as your friend.]

Malli.—ननु अकिञ्चनः कुत्र उपयुज्यते?—तत्राह, वाजीति। 'तस्य' भूपतेः 'वाजिभूमिः' अश्वाकरः 'इभराजकाननं' इभराजानां काननं गजोत्पत्तिस्थानं 'भूरिशः रत्ननिचयाश्च सन्ति' इति भावः। ननु ईदृग्‌व्यः किम् एकस्मै काञ्चनपत्र-काङ्क्षाय कलहायते?—तत्राह—'अस्य काञ्चनेन' सौवर्णेन 'पत्रिणा' शरेण 'किमिव' न किञ्चित प्रयोजनम् अस्तीत्यर्थः, परन्तु 'केवलं विलङ्घनं' व्यतिक्रमं 'न सहते' नायं शरलुब्धः, किन्तु अधिक्षेपासहिष्णुः इत्यर्थः। [अत्र प्रथमार्द्धे समृद्धिमद्वस्तुवर्णनात् उदात्तालङ्कारः]।

Charcha

1. वाजिभूमि.—वाजिसहिता भूमिः शाकपार्थिववत्। Nom. to अस्ति। Or—वाजिनः भूमिः—वाजिभूमिः land abounding in horses. This is the meaning adopted by Malli ; and this is better, for it corresponds with इभराजकाननम्।

2. इभराज etc.—इभ elephant. तेषां राजा इति इभराजः with समासान्त (टच्) in तत् पुरुष by the rule "राजाहः सखिभ्यष्टच्"। इभराजानां काननम् the forest where elephants reside, ६तत्। Nom. to अस्ति।

3. भूरिशः—भूरि (acc. to some अव्यय) means many. भूरयः इति भूरि + शस् = भूरिशः many. Qual. रत्ननिचयाः (which is nom. to सन्ति)॥ अस् + लट अन्ति = सन्ति॥

4. पविणा—करणे ३या, करण of साधनादि क्रिया understood पविणा किमिव साध्यते (Or—भवेत्) &c.

5. सहते—सह + लट ते। Tolerate. Nom. असौ (i. e. किरातपतिः)।

56. He can sacrifice all if prayed for.

सावलेपमुपलिप्सिते परैः अभ्युपैति विकृतिं रजस्यपि
अर्थितस्तु न महान् समीहते जीवितं किमुधनं धनायितुम् ॥५६

Prose.—महान् (स किरातपतिः) परैः सावलेपं (सगर्वं) रजसि (धूलौ अपि) उपलिप्सिते (सति) विकृतिम् अभ्युपैति ; अर्थितः (सन्) तु जीवितं किमुधनं धनायितुं (धनीकर्त्तुम् रक्षितुमिति यावत्) न समीहते।

Eng.—That high-souled one attains derangement (i. e. anger), if dust even is haughtily demanded by others, but he

does not like to save his own life even, what to speak of wealth, if suppliantly prayed for.

Malli —ननु ईदृग्लुब्धः किम् उपकर्त्ता ?—तत्राह, सावलेपमिति। 'महान' स 'रजसि अपि' धूलौ अपि 'परैः सावलेप'' सगर्वम् 'उपलिप्सिते' उपलब्धुमिष्टे जिघृक्षिते सति 'विकृतिमभ्युपैति' प्रकुप्यति इत्यर्थः। 'अर्थितः' याचितः 'तु जीवित' धनायितु'' धनीकर्त्तुम् [क्यजन्तात् तुमुन्] 'न समीहते' नोत्सहते, जीवितम् अपि आत्मनः न इच्छति, किन्तु अर्थितः प्रयच्छति इत्यर्थः, तर्हि 'धनं किमु' धनम् आत्मनः एषितु' धनायितुम् इति विग्रहः। [अत्र इच्छामात्रमर्थः, अन्यथा धनम् इत्यनेन पौनरुक्त्य' स्यात्। "सुपः आत्मनः क्यच्" ; "अशनायोदन्यधनाया बुभुक्षा-पिपासा-गर्धेषु" इति निपातनात् आकारः]॥ ५६॥

Charcha.

1. सावलेपम्—अव + लिप + घञ् भावे = अवलेपः brag (गर्व)। तेन सह वर्त्तमानम्। तुल्ययोगे सह—by "तेन सहेति तुल्ययोगे ; तत् यथा तथा। Adv. Qual. उपलिप्सिते।

2. उपलिप्सिते—उप + लभ + सन् + क्त कर्मणि = उपलिप्सित wished to be taken. तस्मिन्। Pred. to रजसि॥ रजसि has भावे ७मी by "यस्य च भावेन भावलक्षणम्"।

3. परैः—अनुक्ते कर्त्तरि ३या।

4. अभ्युपैति—अभि + उप + इ + लट ति। Attains to. Nom. महान् (which refers to किरातपति)॥ विकृतिगमन is here क्रोधप्रापण। See Malli.

5. अर्थितः—अर्थ + णिच् + क्त कर्मणि = अर्थितः requested. Pred. to महान्।

6. समीहते—सम् + ईह + लट ते। Wishes. Nom महान्।

7. धनायितुम्—धनं लिप्सते इति धन + क्यच् + लट् ति = धनायति greeds

for money. धनाय (नामधातु)+तुमुन्=धनायितुम् to save ; 'To save' (in case of जीवित) will give the idea of hoarding (as in case of money)। In case of धनम् it means only इच्छा। Thus Malli says "धनम् आत्मनः एषितुं धनायितुम्......अत्रइच्छामात्रमर्थः, अन्यथा" &c. ; for rule here see Malli "अशनायोदन्यधनाया—"।

57. Let there be सख्य *between you two.*

तत् तदीयविशिखातिसर्जनात् अस्तु वां गुरु यदृच्छयागतम् ।
राघवप्लवगराजयोरिव प्रेम युक्तमितरेतराश्रयम् ॥ ५७ ॥

Prose—तत् (तस्मात्) तदीयविशिखातिसर्जनात् (तदीयविशिखं प्रदाय) वाम् राघवप्लवगराजयोरिव यदृच्छया आगतं (स्वेच्छासम्भूतं) गुरु (महत्) युक्तम् इतरेतराश्रयम् प्रेम अस्तु ।

Eng.—So by your giving back his arrow let there be between you two as between Rama and Sugriva (the monkey king), mutual firm befitting friendship, spontaneously grown.

Malli.—उक्तमर्थं निगमयति, तदिति। 'तत्' तस्मात् 'तदीय विशिखातिसर्जनात्' तदीयविशिखस्य अतिसर्जनात् प्रत्यर्पणात्, 'वां' युवयोः ["युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोः वां नावौ "इति वामादेशः] 'राघवप्लवगराजयोरिव' रामसुग्रीवयोः इव 'यदृच्छया' दैवात् 'आगतम्, गुरु' महत् 'युक्तम्' अनुरूपम् 'इतरेतराश्रयम्' अन्योन्यविषयं 'प्रेम' सख्यम् 'अस्तु' ॥ ५७ ॥

Charcha.

1. तदीय etc.—तदीयः विशिखः कर्मधा (as in अन्यदीयविशिखः in sl. 46). तस्य अतिसर्जनम् (प्रदानम्), ६तत् । तस्मात् । हेतौ ५मी । Or better—ल्यप्लोपे ५मी ; thus विशिखातिसर्जनं कृत्वा i. e., विशिखम् अतिसृज्य=विशिखातिसर्जनात् ।

2. अस्तु—अस्+लोट् तु। Let there be. Nom. प्रेम। The

base प्रेमन् is seen in both masc. and neuter e.g., "प्रेमाणमामनन्ति" and "भद्रं प्रेम सुमानुषस्य" &c. Uttar charit. Here प्रेम is neuter. प्रार्थनायां लोट्।

3. यदृच्छया—या ऋच्छा (गतिः) इति यदृच्छा, spontaneous course, कर्मधा। तया। प्रकृत्यादित्वात् ३या॥ Here आगतम् will mean उद्भूतम्, for otherwise no goodsense comes out.

4. राघव &c—रघोः गोत्रापत्यं पुमान् इति रघु+अण्=राघव Rama. प्लवेन (लम्फेन) गच्छतीति प्लव+गम+ड कर्त्तरि=प्लवगः a monkey. तेषां राजा इति प्लवगराजः with समासान्त (टच्), ६तत्। राघवश्च प्लवगराजश्च, द्वन्द्वः। तयोः। शेषे ६ष्ठी।

5. इतरेतराश्रयम्—इतरम् इतरम् इति इतरेतरम्, by व्यतिहारे द्वित्व and समासवद्भाव by the varttika "कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये समासवच्च बहुलम्"। इतरेतरस्य आश्रयः (आश्रयभूतम्), ६तत्। Qual. प्रेम। The प्रेम should grow by attaching both of you

58. We have no greed for arrow for we have many.

नाभियोक्तुमनृतं त्वमिष्यसे कस्तपस्विविशिखेषु चादरः।
सन्तिभूभृति शरा हि नः परे ये पराक्रमवसूनि वज्रिणः॥५८॥

Prose—त्वम् (अस्माभिः) अनृतं अभियोक्तुम् न इष्यसे। तपस्विविशिखेषु कः च आदरः (भवति); हि (यस्मात्) नः भूभृति (शैले) परे (अनेके) शराः सन्ति, ये वज्रिणः (इन्द्रस्य) पराक्रमवसूनि (शौर्य्यरूपाणि)।

Eng.—You are not being wished by us to be falsely alleged, and we have no greed for sage's arrows; for in this mountain (here), we have many arrows that are reckoned as wealth (i. e. centre) of powers to Indra, the wielder of thunderbolt.

Malli.—ननु शरलोभात् मिथ्याभियुज्यसे ?—इत्याह, नेति। 'त्वमनृत" मिथ्या 'अभियोक्तुम्' अभ्याख्यातुम् [ब्रूञोऽर्थग्रहणात् द्विकर्म्मता। "मिथ्याभियोगोऽभ्याख्यानम्" इत्यमरः] अस्माभिः इति शेषः। 'न इष्यसे' न इष्टोसि। कुतः ?—'तपस्विविशिखेषु' तपस्वी मुनिः शोच्यश्च ["मुनिशोच्यौ तपस्विनौ" इति शाश्वतः] तस्य विशिखेषु च 'कः आदरः' का आस्था ? न काचित् इत्यर्थः। 'हि' यस्मात् 'नः' अस्माकं 'भूभृति' शैले 'परे' अन्येऽपि 'शराः सन्ति'—ये शराः 'वज्रिणः' शक्रस्य 'पराक्रमवसूनि' पराक्रमधनानि, शौर्य्यसर्वस्वभूता इत्यर्थः। [वज्रिग्रहणात् वज्रादपि अतिरिक्ता सूच्यते]। अत्र शरेषु पराक्रमसाधनेषु पराक्रमरूपेण वस्तु व्यज्यते ॥५८॥

Charcha

1. अभियोक्तुम्—अभि + युज + तुमुन् to falsely allege.

2. इष्यसे—इष + लट से कर्म्मणि। Is being wished. उक्तकर्म्म is त्वम्। Here अभियोगेषण is ब्रुव्यर्थक, so is द्विकर्म्मक ; hence in voice change the अप्रधानकर्म्म 'त्वम्' is voiced by "दुहादेरप्रधाने"। अनुक्तकर्त्ता is अस्माभिः understood here. See Malli also.

3. तपस्विविशिखेषु—६तत्। See Malli. विषये अधि ७मी।

4. भूभृति—भुवं बिभर्त्ति इति भू + भृ + क्विप् कर्त्तरि = भूभृत् a mountain.. It also means a king. अधि' ७मी।

5. सन्ति—अस् + लट अन्ति। There are. Nom. शराः।

6. पराक्रमवसूनि—वसु wealth. परा + क्रम + घञ् भावे = पराक्रम is valour. पराक्रमस्य वसूनि (वसुस्थानानि), the treasure of prowess,. ६तत्। Pred. to ये (i. e. ये शराः)। Here the विधेयविशेषण is नपुंसक though ये is masc—this is due to the dictum "विधेयोद्देश्ययोः लिङ्गवचनेषु न तन्त्रता"। The शर is विक्रमवसु i. e., they are wealth so to say, for these give power and valour to the possessor. The epithet also suggests that the arrows were more powerful than वज्र of वज्रिन्। See Malli also.

59. *If you need, then ask arrows from our lord.*

मार्गणैरथ तव प्रयोजनं नाथसे किमु पतिं न भूभृतः ।
त्वद्विधं सुहृदमेत्य सोर्थिनं किं न यच्छति विजित्य मेदिनीम् ॥५९

Prose—अथ तव मार्गणैः (शरैः) प्रयोजनं (भवेत), तदा भूभृतः पतिं (पर्वतस्थकिरातपतिं) किमु न नाथसे (न याचसे) ? सः (अस्मत्स्वामी) त्वद्विधम् सुहृदम् अर्थिनं एत्य (प्राप्य) मेदिनीं विजित्य किं (द्रव्यं) न यच्छति (सर्वमेव यच्छतीति भावः) ?

Eng—If however you require arrows, why then don't you ask for these to the master of this mauntain (i. e. to our lord) ? What will he not give by conquering the world even, to one of your stamp who is a friend and suitor at the same time.

Malli—अथ ते शरापेक्षा चेत् तर्हि तथा उच्यताम् ?—इत्याह, मार्गणैरिति, 'अथ' उत 'तव मार्गणैः' शरैः 'प्रयोजनं' कृत्यं, तर्हि 'भूभृतः' गिरेः 'पतिं' प्रभुं 'किमु न नाथसे' किम् न याचसे ? ["नाथृ-नाधृयाच्ञोपतापैश्वर्याशीःषु" इति धातोर्लट]। न च याच्ञाभङ्गशङ्का कार्य्या इत्याह, त्वदिति, 'स' अस्मत्स्वामी 'त्वद्विधं' तवेव विधा प्रकारोयस्य तं त्वद्विधं त्वादृशं महानुभावम् इत्यर्थः। तथापि 'सुहृदं' मित्रभूतम् 'अर्थिनम् एत्य' लब्ध्वा 'मेदिनीं विजित्य न यच्छति' न ददाति 'किं ? किन्तु दास्यत्येव ; किं पुन. शरान् इति भाव. ॥ ५९ ॥

Charcha.

1. मार्गणैः—मार्गण is arrow. तैः। करणे ३या।

2. नाथसे—नाथ+लट से। Do pray. Nom. त्वम्। Here the reading नाथसे is bad, for नाथ is आत्मनेपदी only when आशिष् is implied by the Varttika "आशिषि नाथः" but here no आशिष् is signified. So Bhottoji suggests the reading नाधसे here. Cp.

"अत्र 'नाधसे किमुपतिं न भूभृत:' इति पाठे 'आशिषि नाथ:' इति वार्त्तिकनियमेन नात्मनेपदप्राप्ति: इति विचार्य्य दीक्षितेन प्रोक्तम्—'नाधसे' इति पाठ्यम्"—*Jivananda.* 'किम्' an अव्यय, implies प्रश्न (interrogation).

3. त्वद्विधम्—त्वं इव विधा, इत्। त्वद्विधा इव विधा यस्य, बहु by the Varttka "सप्तम्युपमानपूर्व्वस्य उत्तरपदलोपश्च वक्तव्य:"। तम्। Qual. अर्थिनम्। You are a great one. You as a friend come to him to ask. If this be the case then our lord will do everything for you. That is, not only arrow but then he will give you all.

4. किम्—It means. किम् द्रव्यम्। Obj. of यच्छति। Acc. to Malli's construction किम् seems to imply प्रश्न, but then यच्छति is represented as अकर्म्मक and the meaning is not prominently suggested in the way stated in note 3.

5. यच्छति—दा + लट ति। भविष्यति लट प्रयोग:। The rule is "वर्त्तमानसामीप्ये वर्त्तमानवद्वा"। Nom. स:।

60. He won't baffle your desire.

तेन सूरिरुपकारिताधन: कर्त्तुमिच्छति न याचितं वृथा।
सीदतामनुभवन्निवार्थिनां वेद यत् प्रणयभङ्गवेदनाम् ॥६०॥

Prose.—तेन (हेतुना) उपकारिताधन: सूरि: (स: किरातपति:) (तव) याचितं वृथा कर्त्तुं न इच्छति ; यत् (यत:) सीदताम् (क्लिश्यमानानां) अर्थिनां प्रणयभङ्गवेदनाम् स अनुभवन् इव वेद (जानाति)।

Eng.—For this, that learned one (i e. our king) to whom doing other's good is the soul aim (wealth), cannot nullify your askance ; for he appreciates by feeling as if, the pain due to overthrow of prayer, of suffering suitors.

Malli.—यदुक्तम् "त्वद्विधम्" इत्यादि तत्र उपपत्तिमाह, तेनेति। 'तेन' कारणेन 'सूरिः' विद्वान् अत 'उपकारिताधनः' उपकारकत्वमात्रधनः स किरातभूपतिः, "याचितं याञ्चां 'वृथा' व्यर्थं कर्त्तुं न इच्छति'। कुतः ?—'यत्' येन कारणेन "सीदतां' क्लिश्य ताम् (? क्लिश्यमानाना) अर्थिनां प्रणयभङ्गवेदनाम्' याञ्चाभङ्ग-दुःखं' स्वयम् 'अनुभवन् इव वेद' वेत्ति। अतो न वैफल्याशङ्का कार्य्या इत्यर्थः ॥६०॥

Charcha.

1. तेन—हेतौ ३या।

2. उपकारिताधनः—उपकरोति इति उप+कृ+णिनि कर्त्तरि=उपकारिन् the doer of good. तस्य भाव इति उपकारिन्+तल्=उपकारिता the state of doing good to others. सा एव धनं यस्य, वहु। Qual. सूरिः।

3. याचितम्—याच+नपुंसके भावे क्त=याचितम् prayer.

4. इच्छति—इष+लट ति। wishes. Nom. सूरिः।

5. सीदताम्—सद+लटः स्थाने शतृ। तेषाम्। Qual. अर्थिनाम्॥ Note that अर्थवान् is one having wealth near at hand, and अर्थिन् is one to whom wealth is not near (the rule for इनि being "अर्थात्चासन्निहिते")।

6. अनुभवन्—अनु+भू+शतृ। Pred. to सः।

7. वेद—विद+लट् ति। Nom. सः (सूरिः)।

8. प्रणयभङ्ग &c.—प्रणय is याञ्चा here. प्रणयस्य भङ्गः ६तत्। तेन वेदना, सुप्सुपा। ताम्। Obj. of वेद॥ यत् the अव्यय implies 'हेतु' (cause) here.

9 *Remark.*—The root क्लिश उपतापे is दिवादि आत्मनेपदी, so Malli's क्लिश्यताम् should be क्लिश्यमानानाम्। Poets however sometimes use क्लिश as परस्मैपदी, Cp,—"नृपात्मजौ चिक्लिशतुः सखीतौ"—in Bhatti III.

61. Without power or friendship you cant expect anything from a high one.

शक्तिरर्थपतिषु स्वयङ्ग्रहं प्रेम कारयति वा निरत्ययम् ।
कारणद्वयमिदं निरस्यतः प्रार्थनाधिकबले विपत्फला ॥ ६१ ॥

Prose.—अर्थपतिषु (विषये) शक्तिः निरत्ययं प्रेम वा स्वयंग्रहं कारयति । इदं कारणद्वयं निरस्यतः (त्यजतः जनस्य) अधिकबले प्रार्थना विपत्फला (भवति) ।

Eng.—Power over a king or candid love with him only can urge one to forceful taking away. If one discarding these two causes, tries to get a powerful one's wealth then the result is disastrous.

Malli.—ननु स्वयंग्राहिणः किं ग्राह्यादैन्यम् ? — तत्राह, शक्तिरिति । 'अर्थपतिषु' विषये 'शक्तिः' सामर्थ्यं 'स्वयंग्रहं' स्वाम्यनुज्ञां विना ग्रहणं 'कारयति' । 'वा' यद्वा 'निरत्ययम्' अपराधेपि अविकारि 'प्रेम' कर्तृ 'स्वयं ग्रहं' कारयति', प्रबलः प्रियो वा परस्य धनं स्वयं गृह्णातीत्यर्थः । अन्यथा दोषमाह—'इदं' पूर्वोक्तं 'कारणद्वयं निरस्यतः' त्यजतः, पुंस इति शेषः ; 'अधिकबले' प्रबले विषये 'प्रार्थना' तद्धनजिघृक्षा 'विपत्फला' अनर्थफलिका ; अशक्तस्य अप्रियस्य सतः प्रबलधनग्रहणाशा फणिशिरोमणिग्रहणसाहसवत् अनर्थाय कल्पते इत्यर्थः ॥ ६१ ॥

Charcha.

1. अर्थपतिषु—अर्थानां पतयः the lords of wealth i. e. kings. इतत् । तेषु ; with regard to अर्थपति । विषयाधिं ७मी । The sense is—शक्तिः or प्रेम with regard to a अर्थपति i. e, शक्ति over a अर्थपति or प्रेम with a अर्थपति । These two causes can entitle one to take away his wealth whimsically without permission.

2. शक्तिः, प्रेम—प्रयोजक कर्ता of कारयति ॥ कृ+णिच्+लट् ति—

causes to take. Thus—स स्वयग्रहं करोति in णिच् becomes शक्तिः or प्रेम तं (तेन वा—see "हृक्रोरन्य तरस्याम्" ante) स्वयं ग्रहं कारयति।

2. A. स्वयंग्रहम्—ग्रह + अप् भावः ग्रहः taking. स्वयम् ग्रहः (ग्रहणम) सुप्सुपा। Obj. of कारयति।

3. निरत्ययम्—अति + इ + अच् = अत्यय extinction. अविद्यमानः अत्ययः यस्य, unceasing. बहु। Qual, प्रेम। Such love can prevail over one.

4. निरस्यतः—निर् + अस् + शतृ = निरस्यत् discarding, तस्य। Qual. जनस्य &c. understood.

5. प्रार्थना—i. e. तज्जनप्रार्थना। Nom to भवति &c.

6. विपत्फला—विपत् फलं यस्याः, बहु; has disaster for sequel. Pred. to प्रार्थना।

7. *Remark*—You just contract सख्य and प्रेम with our किरातपति, then only you can take his thing; or by force you can do so. But as regards force किरातपति is more powerful. So सख्य with him is your only course to take this arrow or wealth etc. That better power is not possible with Arjuna, is being stated in next sloka.

62. *No ascetic except* जामदग्न्य *can brag of power.*

अस्त्रवेदमधिगम्य तत्त्वतः कस्य चेह भुजवीर्य्यशालिनः।
जामदग्न्यमपहाय गीयते तापसेषु चरितार्थमायुधम् ॥६२॥

Prose.—इह (जगति) तापसेषु जामदग्न्यमपहाय अस्त्रवेदं तत्त्वतः अधिगम्य भुजवीर्य्यशालिनः कस्य वा आयुधं चरितार्थं गीयते ?

Eng.—Amongst ascetics who having strength of arms in this world, except Parasurama (son of sage Jamadagni), is

said to be successful in weapons after rightly mastering the science of missiles ?

[N. B.—Amongst sages none but जामदग्न्य is a successful warrior. But you the sage is not so. Hence you are not a formidable party for our किरातपति]।

Malli.—अथ शस्त्रार्थसम्पत्त्या शक्तत्वाभिमान: ?—तत्राह, अस्त्रवेदमिति, 'इह' जगति 'तापसेषु' तपस्विनांमध्ये ['यतश्च निर्धारणम्" इयि सप्तमी] 'जामदग्न्य' जमदग्नेः अपत्यं पुमान् जामदग्न्यः ["गर्गादिभ्यो यञ्"] तम्, 'अपहाय' परशुरामं विना इत्यर्थ: ; 'अस्त्रवेदं तत्त्वत: अधिगम्य' भुजवीर्य्येण शालते इति 'भुजवीर्य्यशालिनः' उभयसम्पन्नस्य इत्यर्थ: [शालनक्रियापेक्षया समानकर्त्तृकत्वात् क्त्वानिर्देश:] 'कस्यवा आयुधं' चरित: प्राप्त: अर्थ: येन तं 'चरितार्थं' सार्थकं 'गीयते' न कस्यापि इत्यर्थ: । [अत: तवापि तापसत्वात् अकिञ्चित्करस्य, तेन सह सख्यमेव मुख्यमिति भाव:]॥ ६२ ॥

Charcha.

1. अस्त्रवेदम्—वेद is lit. The vedas ; here "Art" or "science". अस्त्राणां वेद:, science of missiles ६तत् । तम् । Obj. of अधिगम्य (अधि+गम+ल्यप्) ॥ अधिगत्य is alt. form of अधिगम्य।

2. तत्त्वत:—तत्त्वेन इति तत्त्व+टा (३या) + तसि स्वार्थे = तत्त्वत: according to rule or rightly. An अव्यय। प्रकृत्यादित्वात् ३या।

3. भुजवीर्य्य &c.—भुजस्य वीर्य्यम्, ६तत् । तेन शालते इति भुजवीर्य्य+शाल+णिनि कर्त्तरि=भुजवीर्य्यशाली shining with power of arm. तस्य ॥ Qual. कस्य।

4. अपहाय—अप+हा (त्यागे)+ल्यप्। Having discarded.

5. गीयते—गै+लट ते कर्मणि। Is said. Nom. जनै: understood. उक्तकर्म is आयुधम्।

6. तापसेषु—Malli has निर्द्धारे षष्ठी, but truly speaking निर्द्धार can not be rightly est iblished here. निर्द्धार acc. to कैयट requires 3 things (i) the class from which an object is singled out (ii) the object singled out and (iii the basis of singling out. Here these three are not present unless the sentence is arranged thus—तपस्विषु जामदग्न्यः चरितार्थायुधः। So विषयाधिकरणे षष्ठी seems more ligical here.

7. चरितार्थम्—बहु। See Malli. Pred. to आयुधम्।

63. You hit the boar already killed by master—if this is accepted then only he will forgive you.

अभ्यघानि मुनिचापलात् त्वया यन्मृगः क्षितिपतेः परिग्रहः।
अक्षमिष्ट तदयं प्रमाद्यतां संवृणोति खलु दोषमज्ञता ॥ ६३ ॥

Prose.—त्वया मुनिचापलात् क्षितिपतेः परिग्रहः (परिग्रहभूतः) मृगः अभ्यघानि (इति) यत्, तत् अयम् (अस्मत्स्वामी) अक्षमिष्ट ; (तथाहि) अज्ञता, प्रमाद्यतां (अपराधिनां) दोषं संवृणोति (आच्छादयति)।

Eng.—The fact that the boar the accepted game of our master, is killed by you through fickleness natural to a sage, is forgiven by our master. Indeed ignorance only covers the fault of the careless perpetrator.

Expl.—You unknowingly killed the accepted game of our master and has thus come to take the arrow. All this is due to your ignorance. If you acknowledge this, then our master will not only pardon you but accept you as his friend. In fact, your sin will be modified if you say that this is due to

ignorance on your part. See Malli also "ननु युष्मत् मृगवध...... क्षमिष्यते इत्याह"।

Malli.—ननु युष्मत—मृगवध—शरहरणाभ्यां द्रोहिणी मम तेन सह कथं सख्यम् स्यात् ?—इत्याशङ्क्य, सत्यं तथापि तावत् मृगवधापराधः क्षमिष्यते इत्याह, अभ्यघानीति। 'त्वया मुनिचापलात्' ब्राह्मणचापल्यात् इत्यर्थः, 'क्षितिपतेः' अस्मत्स्वामिनः, परिगृह्यते इति 'परिग्रहः' तेन स्वीकृत इत्यर्थः ["परिग्रहः परिजने पत्न्यां स्वीकारमूलयोः" इति विश्वः] 'तत्' हननम् 'अयम्' अस्मत्स्वामी 'अक्षमिष्ट' सोढ़वान् एव। तथाहि 'प्रमाद्यतां' अविमृश्यकारिणाम् इत्यर्थः 'दोषम्' अपराधम् 'अज्ञता' अज्ञानिता 'संवृणोति' आच्छादयति 'खलु'। न अज्ञस्य अपराधो गण्यते इत्यर्थः ॥६३॥

Charcha

1. अभ्यघानि—अभि + हन + लुङ् चिण् कर्मणि। Was killed. Nom. त्वया। Its उक्तकर्म is मृगः।

2. मुनिचापलात्—चपल is fickle. तस्य भावः इति चपल + अण् (युवादित्वात्) = चापलम् fickleness. चापल्य with ष्यञ् ब्राह्मणादि is also correct. मुनेः चापलम्, ६तत्। तस्मात्। हेतौ ५मी।

3. परिग्रहः—परि + ग्रह + अप् = परिग्रहः the thing accepted. Same case with i. e. Qual. मृगः॥ Here mark the construction—इति यत् (वस्तु &c.) तत (वस्तु) अयं अक्षमिष्ट।

4. अक्षमिष्ट—क्षम + लुङ् त। Nom. अयम्।

5. प्रमाद्यताम्—प्र + मद दिवादि + शतृ = प्रमाद्यत् careless तेषाम्; of the careless. Adj. used substantively. शेषे ६ष्ठी।

6 संवृणोति—सम् + वृ स्वादि + लट ति। Covers. Nom. अज्ञता। अज्ञता alone can modify and cover one's fault (दोष)।

7. खलु—An अव्यय indicting निश्चय (containty) here as in "प्रवृत्तिसाराः खलु मादृशां गिरः" canto I.

64. So don't do misdeed then you fall in peril.

जन्मवेषतपसां विरोधिनीं मा कृथाः पुनरमूमपक्रियाम् ।
आपदेत्युभयलोकदूषणी वर्त्तमानमपथे हि दुर्म्मतिम् ॥ ६४ ॥

Prose—जन्मवेषतपसां विरोधिनीम् अमूम् अपक्रियाम् मा कृथाः। हि (यस्मात्) अपथे वर्त्तमानं दुर्म्मतिं (दुष्टमतिं पुरुषमित्यर्थः) उभयलोकदूषणी आपत् एति।

Eng.—Do not do this misdeed. antagonistic to your birth, dress and penance. For danger that defiles both the worlds, overcomes the idiot who treads a wrong path

[N. B.—The advice is—don't wilfully do such sinful act, then you fall in danger in as much as our master will take you to task.]

Malli.—अथ सुहृद्भावेन हितमुपदिशति, जन्मेति। 'जन्मवेषतपसां' जन्म सत्कुले प्रसूतिः, वेषो जटाकङ्कनादि, तपो नियमः, तेषां 'विरोधिनीं' विरुद्धाम् 'अमूम्' एवंविधाम् 'अपक्रियाम्' अपकारं 'पुनः' इतः परम् इत्यर्थः, 'मा कृथाः' मा कुरु [करोतेः कर्त्तरि माङिलुङ् ॥ "वयोवुद्ध्यर्थवाग्वेषश्रुताभिनयकर्म्मणाम् । आचरेत् सदृशीं वृत्तिमजिह्मामशठां तथा" इति स्मरणात्]। उक्तवैपरीत्ये दोषमाह, आपदिति। 'हि' यस्मात् 'अपथे वर्त्तमानं दुर्म्मतिं' पुरुषम् इति शेषः' उभौ लोकौ दूषयति हन्तीति 'उभयलोकदूषणी' ["तद्धितार्थे—" (?) इत्यादिना उत्तरपदसमासः] 'आपत् एति' प्राप्नोति [समासविषये उभशब्दप्रयोग एव साधुः। यदाह कैयटः—'उभादुदात्तो नित्यम्' इति नित्यग्रहणस्य इदं प्रयोजनं, वृत्तिविषये उभशब्दस्य प्रयोगो मा भूत्; उभशब्दस्य एव रूपं यथा स्यात् इति उभयत्र इत्यादि भवति" इति] ॥ ६४ ॥

Charcha.

१. जन्म &c.—For meaning, see Malli. जन्म च, वेषः च, तपः च, द्वन्द्वः। तेषाम्; शेषे ६ष्ठी।

2. विरोधिनीम्—वि + रुध + णिनि कर्त्तरि + ङीप् स्त्रियाम् ॥ Qual. अपक्रियाम् ॥ अप + कृ + श भावे = अपक्रिया misdeed. The misdeed here is with reference to killing other's games and taking other's arrow.

3. कृथाः—कृ + लुङ् थास् कर्त्तरि। Do. Nom. त्वम्। माङ्योगे लोडर्थे लुङ्। For gram. here see under मावमंस्त in sl. 53 ante. See Malli also.

4. पुनः—An अव्यय denoting पश्चान्तर। Cp. "पुनरप्रथमे भेदे"। This पश्चान्तर is expressed by Malli in "पुनः इतः परम्"।

5. एति—इ + लटति। goes to. Nom. आपत्।

6. उभयलोकदूषनी—उभौ लोकौ, उभयलोकौ, कर्मधा। In समास &c. उभ is replaced by उभय, See Kaiyata quoted in Malli. दूषयतीति दुष + णिच् + ल्युट + ङीप् = दूषणी defiler. उभयलोकयोः दूषणी, कर्मषष्ठीतत्। Qual. आपत्। The आपत् that will come to a miscreant will destroy his good course here and hereafter. दूषि + क्षु also gives दूषण but then the fem. is दूषणा, so we have recourse to ल्युट् here, Malli's उभौलोकौ दूषयति इति त्रिपदतत् by "तद्धितार्थ—" &c. here is defective. त्रिपदतत् in हाऊजात &c. is sanctioned by भाष्य; otherwise तत्पुरुष is of two words only. Thus Bhattoji under त्रिलोकनाथिन says that त्रिपदतत्—here as त्रयाणां लोकानां नाथः—is defective (Cp. "त्रिपदतत्पुरुषस्य इह दुर्लभत्वात्"—*Manorama.* So proceed here as done by us. See also our notes under त्रिमार्गगावीचिविमर्दशीत &c. in Raghu XIII.

7. अपथे—पथि उमौ। For formation of अपथ here see our notes under अपथात् in sl. 43.

7. दुर्मतिम—दुः दुष्टा मतिर्यस्य, बहु। तम्। Adj. used substantively. Obj. of एति।

65. Why did you being an ascetic hit the boar ?

यष्टुमिच्छसि पितॄन् न साम्प्रतं संवृतोऽर्चिचयिषुर्दिवौकसः ।
दातुमेव पदवीमपि क्षमः किं मृगेऽङ्ग विशिखं न्यवीविशः ॥६५॥

Prose.—साम्प्रतम् (अधुना) संवृतः (सन्) त्वं पितॄन् (पितृपुरुषान्) यष्टुं न इच्छसि, दिवौकसः अर्चिचयिषुः न (भवसि), अपि (मृगाय) पदवीं (मार्गं) दातुं क्षमः एव (भवसि), अङ्ग (भो), किं मृगे विशिखं न्यवीविशः ।

Eng.—Now being in a secluded place you are evidently not desirous of offering oblation to the manes, nor are you willing to worship the gods ; moreover you could have let the boar go, why, ho ! then did you throw your arrow on it.

Malli.—यदुक्तम् 'अभ्यघानि' इति तदेव स्फुटयति, यष्टुमिति । 'साम्प्रतं' सम्प्रति ["सम्प्रतीदानीमधुना साम्प्रतं तथा" इत्यमरः] 'पितॄन्' कव्यादान् 'यष्टुम्' अर्चयितुं 'न इच्छसि', यतः 'संवृतः' एकान्तेस्थितः (असि) । तथा 'दिवौकसः' देवान् 'अर्चिचयिषुः' अर्चयितुम् इच्छुरपि न असि । अतो न पित्रार्था इयं हिंसा, नापि देवतार्था ; देवाराधने तद्विहितत्वात् इति भावः । अथ "सर्वत आत्मानं गोपायीत" इति श्रुतेः, आत्मरक्षार्थम् इति चेत् न इत्याह, दातुमिति—'अङ्ग' हे, 'पदवीं' मार्गं 'दातुमेव' न तु हन्तुम् मुनित्वात् इति भावः, 'क्षमः अपि' योग्यः सन् अपि 'किं' किमर्थं 'मृगे विशिखं न्यवीविशः' निवेशितवान [विशतेः ण्यन्तात् लुङ्] । अभिधावतो मृगात् अपसरणेनैव आत्मरक्षणे कर्त्तव्ये यदवधीः तत् चापलमेव ; "न हिंस्यात् सर्व्वभूतानि" इतिश्रुतिनिषेधात् इति भावः ॥ ६५ ॥

Charcha.

1. इच्छसि - इष + लट सि । You wish. Nom. त्वम् ।
2. साम्प्रतम्— An अव्यय meaning 'इदानीम्' (now).
3. संवृतः - सम् + वृ + क्त कर्त्तरि = संवृतः being secluded (एकान्ते

स्थित:)। Qual. त्वम्। That you are in a secret place shows that you wont offer oblation to the manes.

4. अर्चिचयिषु: = अर्च + णिच् + सन् + उ = अर्चिचयिषु: willing to worship. Pred to त्वम्॥ दिवौकस: (derive ante) is Obj. here. As अर्चिचयिषु: ends in उकारान्त क्रत् so कर्म्म does not take ६ष्ठी here ; कर्म्म ६ष्ठी being barred by "न लोकाव्यय निष्ठाखलर्थतृनाम्"। From your attitude I see you are not about to worship the gods even. So your हिंसा to the animal is not for manes or gods but quite inopportune and wilful to create a misdeed. See Malli also all along.

5. क्षम:—क्षमते इति क्षम:। Pred. to त्वम। Here construction may be as त्वं क्षम: भवसि as in prose. Or—त्वं पदवीं दातुमेव क्षम: सन् किं विशिखं न्यवीविश: (as in Malli.). The boar was passing only by that way, it cannot show हिंसा in the आश्रम, so your हिंसा was not for आत्मरक्षा as well, but wilfully made to create a rupture. So the advice is give up fickleness and be a friend of our master (see next sloka). See Malli also at the end.

6. अङ्ग—An अव्यय denoting कोमलामन्त्रण ; Cp. "श्रूयतामङ्ग वामपि" in Sisu II.

7. न्यवीविश:—नि + विश + णिच + लुङ् स:। Did strike or throw. Nom. त्वम्।

66. *So away with this fickleness—none tolerate this.*

सज्जनोसि विजहीहि चापलं सर्वदा क इव वा सहिष्यते।
वारिधीनिव युगान्तवायव: क्षोभयन्त्यनिभृता गुरूनपि ॥६६॥

Prose.—(त्वं) सज्जनः असि, (अतः) चापलं विजहीहि ; सर्वदा कइव वा (चापलं) सहिष्यते ? (न कोऽपि सहिष्यते इत्यर्थः)। (यतः) युगान्त-वायवः वारिधीनिव (समुद्रानिव), अनिभृताः (चपला जना इत्यर्थः) गुरून् (धीरान्) क्षोभयन्ति।

Eng.—You are a good one, so away with fickleness ; who indeed will always tolerate your fickleness ? For the fickle excites the calm ones even, just like dissolution—wind agitating the calm oceans.

Malli.—किं बहुना ? परमार्थः श्रूयताम् इत्याह, सज्जन इति। 'सज्जनोसि' अतएव 'चापलं' चपलस्य कर्म्म 'विजहीहि' त्यज [जहातेः लोट। "आ च हौ" इतीकारः]। 'सर्व्वदा क इव वा' को वा 'सहिष्यते' [इवशब्दो वाक्यालङ्कारे। वा शब्दोऽवधारणे]। असहने कारणमाह, वारिधीनिति—'अनिभृताः' चपलाः पुनः पुनः अकार्य्यकारिणः 'गुरून्' धैर्य्ययुक्तान् 'अपि'। अन्यत्र—विशालानपि। 'युगान्तवायवः' प्रलयपवनाः 'वारिधीनिव' समुद्रानिव 'क्षोभयन्ति' [उपमानुप्राणितः अयमर्थान्तरन्यासः] ॥ ६६ ॥

Charcha.

1. विजहीहि—वि + हाक् त्यागे + लोट हि। Do forsake. Nom. त्वम्। Alt. forms are जहाहि by "आ च हौ", जहिहि also.

2. क इव—Here इव denotes वाक्यालङ्कार। See Malli also.

3. सहिष्यते—सह + लृट स्यते। Shall tolerate. Nom. कः।

4. युगान्तवायवः—युगान्तस्य or युगान्ते वायवः। ६तत्—or सुप् सुपा। Construe—(वारिधिपक्षे) 'अनिभृताः' चञ्चलाः युगान्तवायवः 'गुरून्' विशालान् वारिधीन् अपि क्षोभयन्ति। So (धीरपक्षे)—अनिभृताः यथा गुरून् क्षोभयन्ति तथा युगान्तवायवः वारिधीन् क्षोभयन्ति ॥ युगान्तवायवः is उपमान of अनिभृताः।

5. क्षोभयन्ति—क्षुभ + णिच् + लट, अन्ति। Do agitate. Nom. अनिभृताः and वायवः।

6. *Remark*—The sense is—fickleness will be tolerated by our master. But be not haughty about this matter, then your conduct will outclass his patience, and he will endanger your position. But say that all this is due to your ignorance and he will gladly take you as his friend. He is not an ordinary one, but Indra's deputy to protect the world (see next sloka).

67. *Indra has stationed our master here as protector of the world.*

अस्त्रवेदविदयं महीपतिः पर्व्वतीय इति मावजीगणः ।
गोपितुं भुवमिमां मरुत्वता शैलवासमनुनीय लम्भितः ॥ ६७ ॥

Prose—अयं महीपतिः अस्त्रवेदवित् ; अयं पर्व्वतीयः इति मा अवजीगणः (or—अस्त्रवेदवित् अयं महीपतिः पर्व्वतीयः इति मा अवजीगणः) ; मरुत्वता इमां भुवं गोपितुं (रक्षितुम्) अयम् अनुनीय शैलवासं लम्भितः (प्रापितः) ।

Eng.—This lord of kiratas is versed in the science of missiles ; do not set him at naught being mountaneous. He is caused by Indra to live in this mountain on request, to protect this earth.

Beng.—এই কিরাতপতি অস্ত্রবিদ্যাবিশারদ ; পর্ব্বতীয় বলিয়া একে অবজ্ঞা করিও না। স্বয়ং দেবেন্দ্র পৃথিবীরক্ষার জন্য, বিনয় সহকারে একে এই শৈলতে বাস করিতে বাধ্য করিয়াছেন ।

Malli.—नन्वयं किरातः क्षुभितः किं करिष्यति ?—तत्राह, अस्त्रेति । 'अयं' 'महीपतिः अस्त्रवेदवित्' निग्रहानुग्रहसमर्थः इति भावः । अतः पर्व्वते भवः 'पर्व्वतीयः' ["पर्व्वताच्च" इति छप्रत्ययः] 'इति' हेतोः 'मावजीगणः' वनेचरबुद्ध्या मावज्ञासीरित्यर्थः [गणयतेर्माङि लुङ् । "ई च गणः" इति ईकारः] । ननु

ईदृशश्चेत् किमर्थमिह वने वसति ?—तत्राह, गोपितुमिति। 'मरुत्वता' इन्द्रेण 'इमां भुवं गोपितुम्' रक्षितुं ["आयादय आर्द्धधातुके वा" इति विकल्पात् "गुपूधूप—" इत्यादिना न आयप्रत्ययः] 'अनुनीय' प्रार्थ्य 'शैलवासं' लम्भितः' प्रापितः ["ण्यन्ते कर्त्तुश्च कर्म्मणः" इति वचनात् अणिकर्त्तुः कर्म्मणि क्तः। "गतिबुद्धि—" इत्यादिना अणिकर्त्तुः कर्म्मत्वम्] ॥ ६७ ॥

Charcha.

1. अस्त्रवेदवित्—अस्त्रवेदं वेत्तीति अस्त्रवेद + विद + क्विप् कर्त्तरि = अस्त्रवेदवित् expert in अस्त्रवेद। Qual. or Pred. to मह्रीपतिः।

2. अवजीगण:—अव + गण + णिच् + लुङ् स्। Do defy. Nom. त्वम् ; लोडर्थे लुङ् by "माङि लुङ्"। अडागमनिषेध here is by the rule "न माङ्योगे॥ For पर्व्वतीय—see Malli. In अयं पर्व्वतीय इति, अयम् has इतियोगे (मा।

3. मरुत्वता—Deriv. in Sak VII. अनुक्ते प्रयोजके कर्त्तरि ३या।

4. गोपितुम्—गुप + तुमुन्। To protect. गोपायितुम् is also correct for आय in आर्धधातुक affirs of गुप &c. is optional—see Malli.

5. अनुनीय—अनु + नी + ल्यप् by requesting.

6. लम्भितः—लभ + णिच् + क्त कर्म्मणि = लम्भितः is caused to take up. Here लभ being prominently गत्यर्थ, its अणिकर्त्ता becomes कर्म्म by "गतिबुद्धिप्रत्यवसानार्थशब्दकर्म्माकर्म्मकाणाम् अणिकर्त्ता सणौ"। Thus स शैलवासं लब्धवान् become is णिच्—मरुत्वान् तं शैलवासं लम्भितवान् ; this in change of voices becomes मरुत्वता सः शैलवासम् लम्भितः (अणिकर्त्ता being voiced by "ण्यन्ते कर्त्तुश्च कर्म्मणः"—see Malli)। See also our notes under लम्भयन् in Canto II. sl. 55. The sense here is—so do not defy much a strong party & being strong he has forgiven you ; so take this सुयोग।

68 He has however forgiven you—give back the arrow and have his friendship.

तत्तितिक्षितमिदं मया मुनेः इत्यवोचत वचश्चमूपतिः ।
बाणमत्रभवते निजं दिशन् आप्नुहि त्वमपि सर्वसम्पदः ॥ ६८ ॥

Prose.—'तत् (तस्मात्) मुनेः इदं (चापलम्) मया तितिक्षितम् इति चमूपतिः (किरातपतिः) अवोचत ; अत्रभवते (पूज्याय अस्मत्स्वामिने) निजं बाणं (तदीयं शरं) दिशन् (प्रत्यर्पयन्) त्वमपि सर्वसम्पदः आप्नुहि ।

Eng.—"So this fickleness of the sage is forgiven by me"—the *kiratapati* has said this. You too enjoy all wealth by giving back to the honourable master his own arrow.

Malli.—उपसंहरति, तदिति । 'तत्' तस्मात् मुनिचापलात् 'मुनेः' सम्बन्धि 'इदं' मृगवधरूपम् अयशः 'मया तितिक्षितं' सोढम् इति वचः चमूपतिः 'अवोचत' । शरद्रोहस्य प्रत्यर्पणमेव प्रतीकार इत्याह—'अत्रभवते' पूज्याय स्वामिने [अत्रभवान् व्याख्यातः] 'निजं बाणं' तदीयं शरं 'दिशन्' प्रत्यर्पयन् 'त्वमपि सर्वसम्पदः आप्नुहि' । सखित्वं इति भावः ॥ ६८ ॥

Charcha.

1. तत्—Because all is due to you चापल्य and not done wilfully. अव्यय—हेतौ प्रभौ ।

2. तितिक्षितम्—तिज + सन स्वार्थे—(क्षमायाम् अर्थे) + क्त कर्म्मणि · तितिक्षितम् is tolerated, forgiven. Nom. मया ।

3. अवोचत—ब्रू + लुङ्, त = अवोचत said. Nom. चमूपतिः (i e. किरातचमूपतिः) । In आर्धधातुक affixes, ब्रू is replaced by वच by the rule "ब्रुवो वचि" । Then उमागम is by "वच उम्" when अङ् (of लुङ्) follows. Here avoid लुङ् from वच, for then (वच being परस्मैपदी) the form will be अवोचत् and not अवोचत ।

4. अवभवते—For Deriv. and samasa see ante ; क्रियायोगे ४र्थी। दिश+शतृ=दिशन् giving back. Qual. त्वम्।

5. आप्नुहि—आप+लोट हि। Do attain. Nom त्वम्।

69. So you should hanker for such companion of his.

आत्मनीनमुपतिष्ठते गुणाः सम्भवन्ति विरमन्ति चापदः।
इत्यनेकफलभाजि मास्मभूत् अर्थिता कथमिवार्य्यसङ्गमे ॥ ६८ ॥

Prose.—आत्मनीनम् (आत्महितं वस्तु) उपतिष्ठते (सङ्गच्छते) ; (ततः) गुणाः सम्भवन्ति आपदः च विरमन्ति। इति (हेतोः) अनेकफलभाजि आर्य्यसङ्गमे (साधुसङ्गे) अर्थिता (आकाङ्क्षा) कथमिव मा स्म भूत ?

Eng.—Wholesome matter befits all ; thereby merits accrue and dangers disperse. So why should there be not hankering after good company that confers innumerable advantages.

Expl.—Every one should do what is salutary to him. And company with the good is ever salutary to all. It is the source of various advantages. Under the circumstance you should be a friend of our lord who is good. You will gain every-thing thereby.

Malli—ननु सत्यमेतत् सख्यं न रोचते, किं पुनः तन्मूलाः सम्पदः ? तत्राह, आत्मनीनमिति। आत्मने हितम् 'आत्मनीनम्' ["आत्मन्विश्वजनभोगोत्तरपदात् खः"] 'उपतिष्ठते' सङ्गच्छते ["उपाद्देवपूजासङ्गतिकरणमित्रकरणपथिषु इति वाच्यम्" इति वक्तव्यात् आत्मनेपदम्]। 'गुणाः' विनयादयः सम्भवन्ति, आपदश्च विरमन्ति' ["व्याङ्परिभ्यो रमः" इति परस्मैपदम्] 'इति अनेकफलभाजि' नाना-फलोत्पादके 'आर्य्यसङ्गमे' साधुसङ्गतौ 'अर्थिता' अपेक्षा 'कथमिव मा स्म भूत्' सर्वदा भवत्येव ॥ ६९ ॥

Charcha.

1. उपतिष्ठते—उप + स्था + लट ते। Befits (सङ्गच्छते); उप + स्था is आत्मनेपद in the sense of सङ्गतिकरण here by the varttika "उपाद्देवपूजासङ्गतिकरण—" &c. (Malli). Nom. आत्मनीनम्। For deriv. of आत्मनीनम् (आत्मन् + ख)—see Malli. An object salutary to one befits him, and he should do it. What is the result then ?—गुणा: सम्भवन्ति, च आपद: विरमन्ति॥ सम् + भू + लट् अन्ति = सम्भवन्ति arise. Nom. गुणा:।

2. विरमन्ति—वि + रम + लट अन्ति। Stop. Nom. आपद:। वि + रम is परस्मैपदी by the rule "व्याङ्परिभ्यो रम."।

3. इति—An अव्यय indicating हेतु here.

4. अनेक etc.—अनेकं फलम्, कर्म्मधा। तत् भजते इति अनेकफल + भज + ण्वि कर्त्तरि = अनेकफलभाक् conferring many benefits : तस्मिन्। Qual. आर्य्यसङ्गमे (which has विषयाधिकरणे ७मी)।

5. अर्थिता—अर्थिन: भाव इति अर्थिन् + तल् भावे = अर्थिता hankering. Nom. to भूत्।

6. भूत्—भू + लुङ् द। Should be. माङ्योगे, लोडर्थे लुङ्, see "माङिलुङ्"। Then अडागम is prohibited by "न माङ्योगे"। Here लङ् is also optional, (for we have स्म) by the rule "स्मोत्तरे लङ् च"।

7. कथमिव—A compound अव्यय meaning "why" i. e., denoting interrogation.

70. *And he is here screened by that tree.*

दृश्यतामयमनोकहान्तरे तिग्महेतिपृतनाभिरन्वित:।
साहिवीचिरिव सिन्धुरुद्धत: भूपति: समयसेतुवारित:॥ ७० ॥

Prose.—तिग्महेतिपृतनाभिः अन्वितः (युक्तः) अयम् भूपतिः (चमूपतिः), साह्विवीचिः सिन्धुः इव उद्धतः (किन्तु) समयसेतुवारितः (सन्) अनोकहान्तरे (द्रुमान्तरे) दृश्यताम्।

Eng.—Let this our lord surrounded by army having sharp weapons, swollen (to attack) (you) like an ocean full of snakeful billows, but himself checked by bridge of law, be seen creened behind that tree,

[N. B.—He being near you, approach him as his friend and you will enjoy everything].

Beng.—তীক্ষ্ণায়ুধযুক্ত সৈন্যদ্বারা বেষ্টিত আমাদের কিরাতপতি, সসর্প উর্মিযুক্ত সমুদ্রের ন্যায় উদ্ধত হইয়াও মর্য্যাদাসেতুর খাতিরে সংযত হইয়া এই বৃক্ষের পশ্চাতে আছেন দেখিবেন।

Malli.—न च अयं दूरे वर्त्तते इत्याह, दृश्यतामिति। 'तिग्महेतिपृतनाभिः' तिग्महेतिभिः तीक्ष्णायुधाभिः ["हेतिर्ज्वालास्त्रसूर्य्यांशुषु" इति हेमचन्द्रः] पृतनाभिः वाहिनीभिः ["वाहिनी पृतना चमूः" इत्यमरः] 'अन्वितः भूपतिः,' साह्विवीचिः साहयः ससर्पाः वीचयः यस्य सः 'सिन्धुः' समुद्र 'इव उद्धतः' किन्तु 'समयसेतुवारितः' समयो मर्य्यादा सेतुरिव स समयसेतुः तेन वारितः। सन्। हस्तेन निर्दिशन् आह—'अयमनोकहान्तरे' द्रुमान्तर्धाने वर्त्तते इति शेषः। 'दृश्यताम्' ["अनोकहः कुटः शालः पलाशी द्रुद्रुमागमाः" इत्यमरः] ७० ".

Charcha.

१. दृश्यताम्—दृश + लोट ताम् कर्म्मणि। Be seen. अनुक्तकर्त्ता is त्वया ; Here उक्तकर्म्म is भूपतिः (wh. refers to किरातपति)।

२. अनोकहान्तरे—अनसः (शकटस्य) अकः (वेगः) इति अनोकः, ६तत्। अनोकं हन्ति इति अनोक + हन + ड = अनोकह tree. तस्य अन्तरम्, ६तत्। तस्मिन्। अधि' ७मी। As trees impede courses of carts, so it is अनोकह।

3. तिग्महेति etc.—पृतना is army. तिग्मा हेतयः यस्या इति तिग्महेतिः, बहु। तिग्महेतिः पृतना, कर्म्मधा। ताभिः। अनुक्ते कर्त्तरि ३या - अनुक्त कर्त्ता of अन्वितः (अनु + इ + क्त = अन्वितः) ॥ अन्वितः Qual. भूपतिः।

4. साहिवीचिः—अहि serpent. तेन सह वर्त्तमानाः इति साहयः, बहु। साहयः (ससर्पाः) वीचयः यस्य, बहु। Qual, सिन्धुः। As such सिन्धु is terrible and is about to attack, so our lord is also so.

5. समयसेतु etc.—समय is मर्य्यादा limit. समय एव सेतुः, कर्म्मधा। तेन वारितः। Pred. to भूपतिः। कर्म्मधा—here seems more reasonable than उपमिततत् (as in Malli). In persuance to your confession of अज्ञता about the matter, he can't attack yon and is remained here. So go and be his friend, if you wish to avoid peril—this is the sense here.

71. Your सख्य *with him will make you gain everything.*

सज्यं धनुर्वहति योऽहिपतिस्थवीयः
स्थेयान् जयन् हरितुरङ्गमकेतुलक्ष्मीम्।
अस्यानुकूलय मतिं मतिमन्ननेन
सख्या सुखं समभियास्यसि चिन्तितानि ॥७१॥

इति श्रीभारविकृतौ किरातार्जुनीये महाकाव्ये दूतवाक्यं नाम त्रयोदशः सर्गः।

Prose—स्थेयान् (स्थिरतरः) यः (किरातपतिः) हरितुरङ्गमकेतुलक्ष्मीम् जयन्, अहिपतिस्थवीय. सज्यं धनुर्वहति, हे मतिमन्, तस्य (किरातपतेः) मतिम् अनुकूलय। अनेन सख्या (हेतुना) चिन्तितानि सुखम् (अनायासेन) समभियास्यसि (प्राप्स्यसि)।

Eng.—The firm formidable *Kiratapati* that surpasses the beauty of the royal flag of Indra, carries a strung bow as big

as the serpent king (Sesha); O Intelligent one ! follow his mental attitude (i. e. be his friend), and through this friend you will easily attain all your desires.

Beng.—এই স্থির ও বলিষ্ঠ কিরাতপতি, ইন্দ্রের কেতুর শোভাকে জয় করিয়া (স্থিরভাবে দাঁড়াইয়া থাকিয়া) আরোপিতমৌর্বীক ধনু বহন করিয়া আছে। হে মতিমন্ (অর্জ্জুন), এবম্ভূত বীরের সহিত সখ্য স্থাপন কর। এই সখ্য দ্বারা তুমি অনায়াসে তোমার অভীষ্টলাভ করিবে।

Malli.—अथ अस्य विज्ञापनमेवाह, सज्यमिति। 'स्थेयान्' स्थिरतरः ["प्रियस्थिर—" इत्यादिना स्थादेशः] 'यः' चमूपतिः 'हरितुरङ्गमकेतुलक्ष्मीं' हरितुरङ्गमकेतोः इन्द्रध्वजस्यलक्ष्मीं शोभां 'जयन्'—अहिपतिस्थवीयः' अहिपतिः शेष इव स्थवीयः स्थूलतरम् ["स्थूलदूर—" "इत्यादिना पूर्वगुण यणादिपरलोपः] सह ज्यया 'सज्य' धनुः वहति'। हे 'मतिमन्', 'अस्य' चमूपतेः 'मतिम् अनुकूलय' अनुकूलां कुरु, सख्यं कुरु इत्यर्थः। मतिमत्तायाः फलमेतत इति भावः। कुत.—'सख्या अनेन' चमूपतिना हेतुना 'सुखम्' अक्लेशेन 'चिन्तितानि' मनोरथान् 'समभियास्यसि'। [वसन्ततिलका वृत्तम्] ॥७१॥

इति श्रीमहामहोपाध्याय कोलाचल-मल्लिनाथसूरिविरचितायां किरातार्जुनीय काव्यव्याख्यायां घण्टापथसमाख्यायां त्रयोदशः सर्गः।

Charcha.

1. सज्यम्—ज्या is string मौर्वी। Cp. मौर्वी ज्या शिञ्जिनी गुणः—*Amara*. ज्यया सह वर्त्तमानः इति सज्यम् with string on, तुल्ययोगे बहु—by "तेन सहेति तुल्ययोगे"। Qual. धनुः।

2. वहति—वह+लट ति। carries. Nom. यः।

3 अहिपति etc.—अतिशयेन स्थूलम् इति स्थूल+ईयसुन्=स्थवीयस्, big. Here there is mental comparision. अहिपतिः (शेषः) इव स्थवीयः इति अहिपतिस्थवीयः, उपमानतत् by "उपमानानि सामान्यवचनैः।"

Qual. धनु: । This is Malli's exposition. But this renders the ईयसुन् in स्थवीय: as subordinate ; so we suggest this explanation :—अहिपते: (शेषात्) स्थवीय: (स्थूलतरम) bigger than Sesha, सुप्सुपा । Rest as above. For rule on स्थवीयस्, See Malli.

4. स्थेयान्—स्थिर + ईयसुन् = स्थेयस् firmer (i. e. firmer than before). वौद्धातिशायनिके ईयसुन् । Qual. य: ॥ जि + शतृ = जयन् conquering. Qual. य: ।

5. हरितुरङ्गम etc.—For हरितुरङ्गम meaning 'Indra' see sl. 50. केतु is flag. हरितुरङ्गमस्य (इन्द्रस्य) केतु:, ६तत् । तस्य लक्ष्मी: (शोभा), ६तत् । ताम् । Obj. of जयन् । The किरातपति: stood in a firmer stronger attitude. And he had a big bow in hand. Thus he seemed more majestic than firm big flag of Indra. Or the sense may be such also ;—किरातपति with his big bow in hand was more beautiful than Indra with his royal flag on hand.

6. अनुकूलय—कूल is bank. But कुल means race. कूलमनुगत: इति अनुकूल: favourable, प्रादितत् । अनुकूलं कुरु इति अनुकूल + णिच् + लोट् हि = अनुकूलय do follow, Nom. त्वम् । Here णिच् after the base अनुकूल comes by the rule "तत्करोति तदाचष्टे इति णिच्" ॥ The address मतिमन् to अर्जुन suggests that he being 'an intelligent one' should be kiratapati's friend, otherwise he will meet disaster. To avoid disaster, he must be his friend.

7. सख्या—3rd. sing. of the base सखि । हेतौ ३या (Malli) ; But करण ३या seems more reasonable, for this सखि will be करण of चिन्तितप्रापण । The sense is owing to getting of friend.

8. सुखम्—क्रियाविशेषणे २या ।

9. समभियास्यसि—सम् + अभि + या + लृट् स्यसि। Shall get. Nom. त्वम्।

10. श्रीभारविकृतौ—श्रीभारवेः कृतिः work of Sri-Bharavi, इतत्। तस्याम्। Qual. महाकाव्ये॥ किरातार्जुनीये (deriv. in canto I) qualifies महाकाव्ये।

11. दूतवाक्यम्—दूतस्य वाक्यम्, इतत्। ऊह्य इति शब्दयोगे १मा। Construe—दूतवाक्यमिति नाम ; नाम is प्राकाशिय अव्यय।

11 A. त्रयोदश—त्रयश्च दश च or त्र्यधिका दश, इन्द्व वा शाकपार्थिवादि: त्रयोदशानां पूरण इति त्रयोदशन् + डट् = त्रयोदशः thirteenth. Qual. सर्गः।

In त्रयोदश, त्रयस् comes in place of त्रि when संख्या follows and the whole is not a बहु—compound, by the rule "त्रेस्त्रयः"।

12. *Metre*—The metre is वसन्ततिलका, see in canto I and XI.
